
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

१३४

नं १६

॥ईशावास्योपनिषत्प्रारंभः॥छ॥

(A)

Title -- उपनिषत्संग्रह (ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, ऐतरेय, तैत्तरिय(शिक्षा), चिति, छान्दोग्य, बृहदारण्यक, श्वेताश्वतर, बृहन्नारायणीय.)

Author -- ?

Date - ?

Sub - उपनिषत्

folio - 239.

Xerox -

॥श्रीगणेशायनमः॥ ॥हरिः ॐ॥ ॥ईशावास्यमिदꣳसर्वंयत्किंचजगत्यांजगत्॥
तेनत्यक्तेनभुंजीथामागृधःकस्यस्विद्धनं॥कुर्वन्नेवेहकर्माणिजिजीविषेच्छ
तꣳसमाः॥एवंत्वयिनान्यथेतोऽस्तिनकर्मलिप्यतेनरे॥असुर्यानामतेलोकाअं
धेनतमसाऽऽवृताः॥तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाः॥अनेजदेकंम
नसोजवीयोनैनद्देवाआप्नुवन्पूर्वमर्शत्॥तद्धावतोऽन्यानत्येतितिष्ठत्तस्मि
न्नपोमातरिश्वादधाति॥तदेजतितन्नैजतितद्दूरेतद्वंतिके॥तदंतरस्यसर्व
स्यतदुसर्वस्यास्यबाह्यतः॥यस्तुसर्वाणिभूतान्यात्मन्नेवानुपश्यति॥सर्वभू
तेषुचात्मानंततोनविजुगुप्सते॥यस्मिंसर्वाणिभूतान्यात्मैवाभूद्विजानतः॥
तत्रकोमोहःकःशोकएकत्वमनुपश्यतः॥सपर्यगाच्छुक्रमकायमव्रणमस्ना

विरꣳ शुद्धमपापविद्धं॥ कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छा
श्वतीभ्यः समाभ्यः॥ अंधं तमः प्रविशंति ये विद्यामुपासते॥ ततो भूय इव ते तमो
य उ विद्यायाꣳ रताः॥ अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया॥ इति शुश्रुम
धीराणां ये नस्तद्विचचक्षिरे॥ विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह॥ अविद्यया
मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ अंधं तमः प्रविशंति येऽसंभूतिमुपासते॥
ततो भूय इव ते तमो य उ संभूत्याꣳ रताः॥ अन्यदेवाहुः संभवादन्यदाहुरसंभ
वात्॥ इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे॥ संभूतिं च विनाशं च यस्तद्वेदो
भयꣳ सह॥ विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते॥ हिरण्मयेन पात्रेण स
त्यस्यापिहितं मुखं॥ तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥ पूषन्नेकर्षे यम

॥२॥ सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि॥ यो सावसौ पुरुषः सोहमस्मि॥ वायुरनिलममृतमथेदं भस्मांतं शरीरं॥ ॐ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥१८॥ ॥इतीशावास्योपनिषत्समाप्ता वाजसनेयिनां शाखिनां यजुर्वेदे॥ ॥अत्रायं शांतिपाठः॥ ॥ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ ॥ॐ शांतिः शांतिः शांतिः॥ ॥ॐ भद्रं नो अपि वातय मनः॥ ॥ॐ शांतिः शांतिः शांतिः॥ ॥इति शुक्लयजुः पाठे काण्वशाखायां संहितायां चत्वारिंशतिमोऽध्यायेपी यमीशावास्योपनिषत्॥

॥राम॥
॥२॥

८६५६

१३८

१६

॥अथकेनोपनिषत्प्रारंभः॥छ॥

Acc. No. 4857.
केनोपनिषत्

5

॥१॥

श्रीगणेशायनमः॥ ॥हरिःॐ॥ ॥केनेषितंपततिप्रेषितंमनःकेनप्राणःप्रथ
मःप्रैतियुक्तः॥केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्ति॥श्रोत्र
स्यश्रोत्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणः॥चक्षुषश्चक्षुरतिमुच्य
धीराःप्रेत्यास्माल्लोकादमृताभवंति॥नतत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनः॥
नविद्मोनविजानीमोयथैतदनुशिष्यात्॥अन्यदेवतद्विदितादथोअविदिता
दधि॥इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे॥यद्वाचाऽनभ्युदितंयेनवाग
भ्युद्यते॥तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते॥यन्मनसानमनुतेयेनाहुर्म
नोमतं॥तदेवब्रह्म॥यच्चक्षुषानपश्यतियेनचक्षूंषिपश्यति॥तदेवब्रह्मत्वंवि
द्धिनेदंयदिदमुपासते॥यच्छ्रोत्रेणनशृणोतियेनश्रोत्रमिदंश्रुतं॥तदेवब्रह्म

२ त्वंविद्धिनेदंयदिदमुपासते॥

॥राम॥

॥१॥

त्वं विद्धि नेदं यदिदमुपासते॥ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते॥ तदेव
ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥१॥ यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं
वेत्थ ब्रह्मणो रूपं॥ यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितं॥
नाहं मन्ये सुवेदेति नो न वेदेति वेद च॥ यो नस्तद्वेद तद्वेद नो न वेदेति वेद च॥
यस्यामतं तस्य मतं मतं यस्य न वेद सः॥ अविज्ञातं विजानतां विज्ञातमविजा
नतां॥ प्रतिबोधविदितं मतममृतत्वं हि विंदते॥ आत्मना विंदते वीर्यं विद्यया विं
दतेऽमृतं॥ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः॥ भूतेषु
भूतेषु विचिंत्य धीराः प्रेत्यास्माल्लोकादमृता भवंति॥२॥ ब्रह्म ह देवेभ्यो विजिग्ये
तस्य ह ब्रह्मणो विजये देवा अमहीयंत त ऐक्षंतास्माकमेवायं विजयोऽस्माकं

मेवायं महिमेतितद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानंत किमिदं यक्ष
मितितेऽग्निमब्रुवन्जातवेद एतद्विजानीहि किमेतद्यक्षमितितथेतितदभ्यद्र
वत्तमभ्यवदत्कोसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीतितस्मिं
स्त्वयि किं वीर्यमित्यपीदꣳ सर्वं दहेयं यदिदं पृथिव्यामितितस्मै तृणं निदधावेत
द्दहेतितदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतद
शाकं विज्ञातुं यदेतद्यक्षमित्यथ वायुमब्रुवन्वायवेतद्विजानीहि किमेतद्यक्ष
मितितथेतितदभ्यद्रवत्तमभ्यवदत्कोसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरि
श्वा वा अहमस्मीति तस्मिंस्त्वयि किं वीर्यमित्यपीदꣳ सर्वमाददीयं यदिदं पृथिव्या
मितितस्मै तृणं निदधावेतदादत्स्वेतितदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं

॥राम॥ ॥२॥

स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमित्यथेंद्रमब्रुवन्मघवन्ने
तद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे स तस्मिन्ने
वाकाशे स्त्रियमाजगाम बहुशोभमानामुमां हैमवतीं तां होवाच किमेतद्य
क्षमिति ॥३॥ ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव वि
दांचकार ब्रह्मेति तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिंद्र
स्ते ह्येनन्नेदिष्ठं पस्पृशुस्ते ह्येनत्प्रथमो विदांचकार ब्रह्मेति तस्माद्वा इंद्रोऽति
तरामिवान्यान्देवान्स ह्येनं नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदांचकार ब्रह्मेति ॥
तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इति ॥ न्यमीमिषदा३ इत्यधिदैवतम्
थाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पस्तद्ध त

॥केनो॥ ॥३॥

॥पत्रि॥

सयएतदेवंवेदाभिहैनंसर्वाणिभूतानिसंवा
द्धनंनामतद्धनमित्युपासितव्यं॥ सयएतदेवंवेदाभिहैनंसर्वाणिभूतानिसंवां
छंत्युपनिषदंभोब्रूहीत्युक्तातउपनिषत्‌॥ब्राह्मीवावतउपनिषदमब्रूमेति
तस्यैतपोदमःकर्मेतिप्रतिष्ठावेदाःसर्वांगानिसत्यमायतनंयोवाएतामेवंवे
दापहत्यपाप्मानमनंतेस्वर्गेलोकेज्येयेप्रतितिष्ठतिप्रतितिष्ठति॥४॥ ॥इ
तिसामवेदवर्तिनीकेनोपनिषच्चतुःखंडासमाप्ता॥ ॥अत्रायंशांतिपाठः॥ ॥राम॥ ॥३॥
ॐआप्यायंतुममांगानिवाक्प्राणश्चक्षुःश्रोत्रमथोबलमिंद्रियाणिचस
र्वाणिसर्वंब्रह्मोपनिषदंमाहंब्रह्मनिराकुर्यांमामाब्रह्मनिराकरोदनिराक
रणमस्त्वनिराकरणंमेअस्तुतदात्मनिनिरतेयउपनिषत्सुधर्मास्तेमयिसं
तुतेमयिसंतु॥१॥ ॥ॐशांतिःशांतिःशांतिः॥ ॥श्रीपरमेश्वरायनमः॥ ॥

१४८

नं १६

॥कठवल्युपनिषत्प्रारंभः॥७॥

Acc. No. 4858
कठवल्ली उपनिषत्
पत्र क्र. ३ गहा८.

11

॥कठो०॥ ॥पनि०॥

॥१॥

श्रीगणेशाय नमः॥ ॥हरिः ॐ॥ ॥उशन्ह वै वाजश्रवसः सर्ववेदसं ददौ॥ तस्य ह
नचिकेता नाम पुत्र आस॥ तꣳह कुमारꣳ सन्तं दक्षिणासु नीयमानासु श्रद्धाविवे
श सोऽमन्यत॥ पीतोदका जग्धतृणा दुग्धदोहा निरिंद्रियाः॥ अनंदा नाम ते लो
कास्तान्स गच्छति ता ददत्॥ स होवाच पितरं तत कस्मै मां दास्यसीति॥ द्वितीयं
तृतीयं तꣳहोवाच मृत्यवे त्वा ददामीति॥ बहूनामेमि प्रथमो बहूनामेमि मध्य
मः॥ किꣳस्विद्यमस्य कर्तव्यं यन्मयाऽद्य करिष्यति॥ अनुपश्य यथा पूर्वे प्रति

॥हरे॥

॥१॥

पश्य तथा परे॥ सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः॥ वैश्वानरः प्रवि
शत्यतिथिर्ब्राह्मणो गृहान्॥ तस्यैताꣳशान्तिं कुर्वन्ति हर वैवस्वतोदकं॥ आशाप्र
तीक्षे संगतꣳसूनृतां चेष्टापूर्ते पुत्रपशूꣳश्च सर्वान्॥ एतद्वृङ्क्ते पुरुषस्याल्प

मेधसो यस्यानश्नन्वसति ब्राह्मणो गृहे॥ तिस्रो रात्रीर्यदवात्सीर्गृहे मेऽनश्नन्ब्र
ह्मन्नतिथिर्नमस्यः॥ नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व॥
शांतसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माऽभि मृत्यो॥ त्वत्प्रसृष्टं माभि
वदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥ यथा पुरस्ताद्भविता प्रतीत औद्दाल
किरारुणिर्मत्प्रसृष्टः॥ सुखं रात्रीः शयिता वीतमन्युस्त्वां ददृशिवान्मृत्युमुखा
त्प्रमुक्तं॥ स्वर्गे लोके न भयं किंचनास्ति न तत्र त्वं न जरया बिभेति॥ उभे तीर्त्वा
शनायापिपासे शोकातिगो मोदते स्वर्गलोके॥ स त्वमग्निं स्वर्ग्यमध्येषि मृ
त्यो प्रब्रूहि तं श्रद्दधानाय मह्यं॥ स्वर्गलोका अमृतत्वं भजंत एतद्द्वितीयेन वृ
णे वरेण॥ प्र ते ब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नचिकेतः प्रजानन्॥ अनं

तल्लोकाप्तिमथोप्रतिष्ठां विद्धि त्वमेतं निहितं गुहायां ॥ लोकादिमग्निं तमुवाच
तस्मै या इष्टिका यावतीर्वा यथा वा ॥ स चापि तत्प्रत्यवदद्यथोक्तमथास्य मृत्युः
पुनरेवाह तुष्टः ॥ तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ॥ त
वैव नाम्ना भवितायमग्निः सृंकां चेमामनेकरूपां गृहाण ॥ त्रिणाचिकेत
स्त्रिभिरेत्य संधिं त्रिकर्मकृत्तरति जन्ममृत्यू ॥ ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शांतिमत्यंतमेति ॥ त्रिणाचिकेतस्त्रयमेतद्विदित्वा य एवं विद्वां
श्चिनुते नाचिकेतं ॥ स मृत्युपाशान्पुरतः प्रणोद्य शोकातिगो मोदते स्वर्गलो
के ॥ एष तेऽग्निर्नचिकेतः स्वर्ग्यो यमवृणीथा द्वितीयेन वरेण ॥ एतमग्निं
तवैव प्रवक्ष्यंति जनासस्तृतीयं वरं नचिकेतो वृणीष्व ॥ येयं प्रेते विचिकित्सा

॥हरे॥ ॥२॥

तयोः श्रेय आददानस्य साधु भवति हीयतेऽर्थाद्य उ प्रेयो वृणीते ॥ श्रेयश्च प्रेय
श्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः ॥ श्रेयो हि धीरोऽभि प्रेयसो वृणीते
प्रेयो मंदो योगक्षेमाद्वृणीते ॥ स त्वं प्रियान्प्रियरूपांश्च कामानभिध्यायन्नचिके
तोऽत्यस्राक्षीः ॥ नैतां सृंकां वित्तमयीमवाप्तो यस्यां मज्जंति बहवो मनुष्याः ॥ दू
रमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता ॥ विद्याभीप्सितं नचिकेत
सं मन्ये न त्वा कामा बहवो लोलुपंत ॥ अविद्यायामंतरे वर्तमानाः स्वयं धीराः पं
डितं मन्यमानाः ॥ दंद्रम्यमाणाः परियंति मूढा अंधेनैव नीयमाना यथांधाः ॥ न
सांपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं ॥ अयं लोको नास्ति पर इ
ति मानी पुनः पुनर्वशमापद्यते मे ॥ श्रवणायापि बहुभिर्यो न लभ्यः शृण्वंतो

15

पि बहवो यं न विद्युः॥ आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशि
ष्टः॥ न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिंत्यमानः॥ अनन्यप्रोक्ते गति
रत्र नास्त्यणीयान्ह्यतर्क्यमणुप्रमाणात्॥ नैषा तर्केण मतिरापनेया प्रोक्तान्ये
नैव सुज्ञानाय प्रेष्ठ॥ यां त्वमापः सत्यधृतिर्बतासि त्वादृङ्नो भूयान्नचिकेतः प्रष्टा॥
जानाम्यहं शेवधिरित्यनित्यं न ह्यध्रुवैः प्राप्यते हि ध्रुवं तत्॥ ततो मया नचि
केतश्चितोऽग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यं॥ कामस्याप्तिं जगतः प्रतिष्ठां क्र
तोरनंत्यमभयस्य पारं॥ स्तोमं महदुरुगायं प्रतिष्ठां दृष्ट्वा धृत्या धीरो नचिके
तोऽत्यस्राक्षीः॥ तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं॥ अध्या
त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति॥ एतच्छ्रुत्वा संपरिगृह्य

मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य ॥ स मोदते मोदनीयँ हि लब्ध्वा विवृतँ सद्म नचि
केतसं मन्ये ॥ अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ॥ अन्यत्र भू
ताच्च भव्याच्च यत्तत्पश्यसि तद्वद ॥ सर्वे वेदा यत्पदमामनंति तपाँसि सर्वाणि
च यद्वदंति ॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
एतद्ध्येवाक्षरं ब्रह्म एतद्ध्ये वाक्षरं परं ॥ एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तत्
स्य तत् ॥ एतदालंबनँ श्रेष्ठमेतदालंबनं परं ॥ एतदालंबनं ज्ञात्वा ब्रह्मलोके मही
यते ॥ न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ॥ अजो नि
त्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ॥ हंता चेन्मन्यते हंतुँ हतश्चेन्मन्य
ते हतं ॥ उभौ तौ न विजानीतो नायँ हंति न हन्यते ॥ अणोरणीयान्महतो महीया

॥कठ॥ ॥५॥

लि२

नात्मास्य जंतोर्निहितो गुहायां॥ तमक्रतुः पश्यति वीतशोको धातुः प्रसादा
न्महिमानमात्मनः॥ आसीनो दूरं व्रजति शयानो याति सर्वतः॥ कस्तं मदामदं देवं
मदन्यो ज्ञातुमर्हति॥ अशरीरं शरीरेष्वनवस्थेष्ववस्थितं॥ महांतं विभुमात्मा
नं मत्वा धीरो न शोचति॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुते
न॥ यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां॥ नाविरतो दु
श्चरितान्नाशांतो नासमाहितः॥ नाशांतमानसो वापि प्रज्ञानेनैनमाप्नुयात्॥
यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः॥ मृत्युर्यस्योपसेचनं क इत्था वेद यत्र
सः॥२॥ ॥इति कठवल्ल्युपनिषदि प्रथमाध्याये द्वितीया वल्ली॥ ॥२॥ ॥ऋतं
पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे॥ छायातपौ ब्रह्मविदो वदं

॥पनि॥ ॥हरे॥ ॥५॥

तिपं॰चाग्नयो ये च त्रिणाचिकेताः॥ यः सेतुरीजानानामक्षरं ब्रह्म यत्परं॥ अभ
यं तितीर्षतां पारं नाचिकेतं शकेमहि॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु॥
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ इंद्रियाणि हयानाहुर्विषयांस्तेषु गोच
रान्॥ आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः॥ यस्त्वविज्ञानवान्भवत्य
युक्तेन मनसा सदा॥ तस्येंद्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥ यस्तु विज्ञा
नवान्भवति युक्तेन मनसा सदा॥ तस्येंद्रियाणि वश्यानि सदश्वा इव सारथेः॥
यस्त्वविज्ञानवान्भवत्यमनस्कः सदाऽशुचिः॥ न स तत्पदमाप्नोति संसारं चा
धिगच्छति॥ यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः॥ स तु तत्पदमाप्नो
ति यस्माद्भूयो न जायते॥ विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः॥ सोऽध्वनः

॥कठ॥

॥६॥

॥पत्रि॥

पारमाप्नोति तद्विष्णोः परमं पदं॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः॥ म
नसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः॥ एष सर्वेषु भूतेषु गूढोत्मा न प्रका
शते॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्य
च्छेज्ज्ञान आत्मनि॥ ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छांत आत्मनि॥ उ
त्तिष्ठत जाग्रत प्राप्य वरान्निबोधत॥ क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथ
स्तत्कवयो वदंति॥ अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगंधवच्च
यत्॥ अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते॥ नाचि
केतमुपाख्यानं मृत्युप्रोक्तं सनातनं॥ उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके मही

॥हरे॥

॥६॥

यते॥ य इमं परमं गुह्यं श्रावयेद्ब्रह्मसंसदि॥ प्रयतः श्राद्धकाले वा तदानंत्याय

कल्पते तदानंत्याय कल्पत इति॥ १७॥ ॥ इति कठवल्ल्युपनिषदि प्रथमाध्याय

स्तृतीया वल्ली च समाप्ता॥ ॥ ३॥ ॥ परांचि खानि व्यतृणत्स्वयंभूस्तस्मात्परा

ङ् पश्यति नांतरात्मन्॥ कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमि

च्छन्॥ पराचः कामाननुयंति बालास्ते मृत्योर्यंति विततस्य पाशं॥ अथ धीरा

अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयंते॥ येन रूपं रसं गंधं शब्दान्स्प

र्शांश्च मैथुनान्॥ एतेनैव विजानाति किमत्र परिशिष्यते एतद्वै तत्॥ स्वप्नांतं

जागरितांतं चोभौ येनानुपश्यति॥ महांतं विभुमात्मानं मत्वा धीरो न शोचति॥

य इमं मध्वदं वेदात्मानं जीवमंतिकात्॥ ईशानं भूतभव्यस्य न ततो विजिगु

21

॥७॥

स्तन्‌ एतद्वैतत्‌॥ यः पूर्वं तपसो जातमद्भ्यः पूर्वमजायत॥ गुहां प्रविश्य तिष्ठंतं यो
भूतेभिर्व्यपश्यत एतद्वैतत्‌॥ या प्राणेन संभवत्यदितिर्देवतामयी॥ गुहां प्रवि
श्य तिष्ठंतीं या भूतेभिर्व्यजायत एतद्वैतत्‌॥ अरण्योर्निहितो जातवेदा गर्भ इ
वेत्सुभृतो गर्भिणीभिः॥ दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्नि
रेतद्वैतत्‌॥ यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति॥ तं देवाः सर्वे अर्पितास्तदु
नात्येति कश्चन एतद्वैतत्‌॥ यदेवेह तदमुत्र यदमुत्र तदन्विह॥ मृत्योः स मृ
त्युमाप्नोति य इह नानेव पश्यति॥ मनसैवेदमाप्तव्यं नेह नानास्ति किंचन॥ मृ
त्योः स मृत्युं गच्छति य इह नानेव पश्यति॥ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि
तिष्ठति॥ ईशानं भूतभव्यस्य न ततो विजुगुप्सत एतद्वैतत्‌॥ अंगुष्ठमात्रः पु

॥हरे॥

॥७॥

रुषोज्योतिरिवाधूमकः॥ ईशानो भूतभव्यस्य स एवाद्य स उश्वः एतद्वैतत्॥१३॥ य
थोदकं दुर्गे वृष्टं पर्वतेषु विधावति॥ एवं धर्मान्पृथक्पश्यंस्तानेवानुविधाव
ति॥ यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति॥ एवं मुनेर्विजानत आत्मा भ
वति गौतम॥१५॥ ॥ इति कठवल्ल्युपनिषदि द्वितीयाध्याये चतुर्थवल्ली॥ ॥४॥
पुरमेकादशद्वारमजस्यावक्रचेतसः॥ अनुष्ठाय न शोचति विमुक्तश्च वि
मुच्यते एतद्वैतत्॥१॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोण
सत्॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥२॥ ऊ
र्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति॥ मध्ये वामनमासीनं विश्वे देवा उपास
ते॥३॥ अस्य विस्रंसमानस्य शरीरस्थस्य देहिनः॥ देहाद्विमुच्यमानस्य किमत्र

॥कठ॥

॥१८॥

॥पनि॥

परिचक्षते एतद्वै तत्॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन॥ इतरेण तु जी
वंति यस्मिन्नेतावुपाश्रितौ॥ हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं॥ यथा च म
रणं प्राप्य आत्मा भवति गौतम॥ योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः॥ स्था
णुमन्येनुसंयंति यथाकर्म यथाश्रुतं॥ य एष सुप्तेषु जागर्ति कामं कामं पुरुषो
निर्मिमाणः॥ तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिंल्लोकाः श्रिताः स
र्वे तदु नात्येति कश्चन एतद्वै तत्॥ अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रति
रूपो बभूव॥ एकस्तथा सर्वभूतांतरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥ वायुर्य
थैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव॥ एकस्तथा सर्वभूतांतरात्मा रू
पं रूपं प्रतिरूपो बहिश्च॥ सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बा

॥हरे॥

॥१८॥

ह्यदोषैः॥ एकस्तथा सर्वभूतांतरात्मा न लिप्यते लोकदुःखेन बाह्यः॥ एको वशी
सर्वभूतांतरात्मैकं रूपं बहुधा यः करोति॥ तमात्मस्थं येऽनुपश्यंति धीरास्तेषां
सुखं शाश्वतं नेतरेषां॥ नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विद
धाति कामान्॥ तमात्मस्थं येऽनुपश्यंति धीरास्तेषां शांतिः शाश्वती नेतरेषां॥
तदेतदिति मन्यंतेऽनिर्देश्यं परमं सुखं॥ कथं नु तद्विजानीयां किमु भाति विभा
ति वा॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमेव
भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥ ५॥ ॥ इति कठवल्ल्युपनिष
दि द्वितीयाध्याये पंचमावल्ली॥ ॥५॥ ॥ ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः
सनातनः॥ तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते॥ तस्मिंल्लोकाः श्रिताः सर्वे

॥कठ०॥

॥९॥

॥उपनि०॥

तदु नात्येति कश्चन॥ एतद्वै तत्॥ यदिदं किंच जगत्सर्वं प्राण एजति निःसृतं॥
महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवंति॥ भयादस्याग्निस्तपति भया
त्तपति सूर्यः॥ भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचमः॥ इह चेदशकद्बोद्धुं
प्राक् शरीरस्य विस्रसः॥ ततः सर्गेषु लोकेषु शरीरत्वाय कल्पते॥ यथादर्शे
तथात्मनि यथा स्वप्ने तथा पितृलोके॥ यथाऽप्सु परीव ददृशे तथा गंधर्व
लोके छायातपयोरिव ब्रह्मलोके॥ इंद्रियाणां पृथग्भावमुदयास्तमयौ च
यत्॥ पृथगुत्पद्यमानानां मत्वा धीरो न शोचति॥ इंद्रियेभ्यः परं मनो मनसः
सत्वमुत्तमं॥ सत्वादधि महानात्मा महतोऽव्यक्तमुत्तमं॥ अव्यक्तात्तु परः पु
रुषो व्यापकोऽलिंग एव च॥ यं ज्ञात्वा मुच्यते जंतुरमृतत्वं च गच्छति॥ नसं

॥हरे॥

॥९॥

दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं॥ हृदा मनीषा मनसाऽभि
क्लृप्तो य एतद्विदुरमृतास्ते भवंति॥ यदा पंचावतिष्ठंते ज्ञानानि मनसा सह॥
बुद्धिश्च न विचेष्टति तामाहुः परमां गतिं॥ तां योगमिति मन्यंते स्थिरामिंद्रि
यधारणां॥ अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥ नैव वाचा न मनसा
प्राप्तुं शक्यो न चक्षुषा॥ अस्तीति ब्रुवतोऽन्यत्र कथं तदुपलभ्यते॥ अस्तीत्ये
वोपलब्धव्यस्तत्त्वभावेन चोभयोः॥ अस्तीत्येवोपलब्धस्य तत्त्वभावः प्रसीद
ति॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः॥ अथ मर्त्योऽमृतो भवत्यत्र ब्र
ह्म समश्नुते॥ यदा सर्वे प्रभिद्यंते हृदयस्येह ग्रंथयः॥ अथ मर्त्योऽमृतो भव
त्येतावदनुशासनं॥ शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृ

ले स्युः॥ तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंति॥ अंगुष्ठमात्रः
पुरुषोंतरात्मा सदा जनानां हृदये सन्निविष्टः॥ तं स्वाच्छरीरात्प्रवृहेन्मुंजादि
वेषीकां धैर्येण तं विद्याच्छुक्रममृतं तं विद्याच्छुक्रममृतमिति॥ मृत्युप्रोक्तां
नचिकेतोथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नं॥ ब्रह्मप्राप्तो विरजोभूद्विमृ
त्युरन्योप्येवं विदध्यात्ममेव॥१८॥ ॥सह नाववतु॥ सह नौ भुनक्तु॥ सह वीर्यं
करवावहै॥ तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ॐ शांतिः शांतिः शांतिः॥
॥ ॥इति यजुर्वेदे कठशाखायां कठवल्ल्युपनिषदि द्वितीयाध्यायः षष्ठमा व
ल्ली समाप्ता॥ ॥वल्ल्यः षट्॥ ॥अध्यायद्वयं॥ ॥ॐ नमो भगवते वैवस्वता
य मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च॥ ॥सह नाववत्विति वै शांतिपाठः॥

॥हरे॥
॥१०॥

१२८

न१६

॥अथप्रश्नोपनिषत्सारंभदलमिदं॥

Acc. No. 4859.

प्रश्नोपनिषद्.

folio - 8.

॥१॥

श्रीगणेशायनमः॥ ॥हरिः ॐ॥ ॥सुकेशाचभारद्वाजःशैब्यश्चसत्यकामःसौ
र्यायणीचगार्ग्यःकौशल्यश्चाश्वलायनोभार्गवोवैदर्भिःकबंधीकात्यायनस्ते
हैतेब्रह्मपराब्रह्मनिष्ठाःपरंब्रह्मान्वेषमाणाएषहवैतत्सर्वंवक्ष्यतीति॥तेहस
मित्पाणयोभगवंतंपिप्पलादमुपसन्नाः॥तान्हसऋषिरुवाच॥भूयएवतप
साब्रह्मचर्येणश्रद्धयासंवत्सरंसंवत्स्यतयथाकामंप्रश्नान्पृच्छथयदिविज्ञा
स्यामःसर्वंहवोवक्ष्यामइति॥अथकबंधीकात्यायनउपेत्यपप्रच्छभगवन्कुतोह
वाइमाःप्रजाःप्रजायंतइति॥तस्मैसहोवाचप्रजाकामोहवैप्रजापतिःसतपोऽत
प्यतसतपस्तप्त्वासमिथुनमुत्पादयतेरयिंचप्राणंचेत्येतौमेबहुधाप्रजाःक
रिष्यतइत्यादित्योहवैप्राणोरयिरेवचंद्रमारयिर्वाएतत्सर्वंयन्मूर्तंचामूर्तंच

॥राम॥
॥१॥

तस्मान्मूर्त्तमेव रयिरथादित्य उदयन्यत्प्राचीं दिशं प्रविशति तेन प्राच्यान्प्राणा
न्रश्मिषु सन्निधत्ते यद्दक्षिणां यत्प्रतीचीं यदुदीचीं यदधो यदूर्ध्वं यदंतरा दि
शो यत्सर्वं प्रकाशयति तेन सर्वान्प्राणान्रश्मिषु सन्निधत्ते स एष वैश्वानरो वि
श्वरूपः प्राणोऽग्निरुदयते तदेतदृचाऽभ्युक्तं ॥ विश्वरूपं हरिणं जातवेदसं प
रायणं ज्योतिरेकं तपंतं ॥ सहस्ररश्मिः शतधा वर्त्तमानः प्राणः प्रजानामुदय
त्येष सूर्यः ॥ संवत्सरो वै प्रजापतिस्तस्यायने दक्षिणं चोत्तरं च तद्ये ह वै तदिष्टा
पूर्ते कृतमित्युपासते ते चांद्रमसमेव लोकमभिजयंते त एव पुनरावर्त्तंते तस्मा
देत ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यंते एष ह वै रयिर्यः पितृयाणोऽथोत्तरेण
तपसा ब्रह्मचर्येण श्रद्धया विद्ययात्मानमन्विष्यादित्यमभिजयंते एतद्वै प्रा

प्र२

॥प्रश्नो॥ ॥२॥ ॥प नि॥

एतद्वा आयतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्त्तंत इत्येषनि
रोधस्तदेषः श्लोकः। पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणं॥
अथेमे अन्य उ परे विचक्षणं सप्तचक्रे षळर आहुरर्पितमिति॥ मासो वै प्रजाप
तिस्तस्य कृष्णपक्ष एव रयिः शुक्लः प्राणस्तस्मादेत ऋषयः शुक्ल इष्टं कुर्वंतीतर
इतरस्मिन्नहोरात्रो वै प्रजापतिस्तस्याहरेव प्राणो रात्रिरेव रयिः प्राणं वा एते
प्रस्कंदंति ये दिवा रत्या संयुज्यंते ब्रह्मचर्यमेव तद्यद्रात्रौ रत्या संयुज्यंते ऽन्नं वै प्र
जापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्रजायंत इति। तद्ये ह वै तत्प्रजापतिव्रतं
चरंति ते मिथुनमुत्पादयंते तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यं येषु सत्यं प्र
तिष्ठितं तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति॥१६॥ ॥इति

॥राम॥ ॥२॥

प्रश्नोपनिषदि प्रथमाध्याये प्रथमः प्रश्नः॥ ॥१॥ ॥अथ हैनं भार्गवो वैदर्भिः प
प्रच्छ भगवन्कत्येव देवाः प्रजां विधारयंते कतर एतत्प्रकाशयंते कः पुनरेषां व
रिष्ठ इति॥ तस्मै स होवाचाकाशो ह वा एष देवो वायुरग्निरापः पृथिवी वाङ्मनश्च
क्षुः श्रोत्रं च ते प्रकाश्याभिवदंति वयमेतद्बाणमवष्टभ्य विधारयामस्तान्वरि
ष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणम
वष्टभ्य विधारयामीति ते ऽश्रद्दधाना बभूवुः सोऽभिमानादूर्ध्वमुत्क्रमत इव
तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामंते तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठंते
तद्यथा मक्षिका मधुकरराजानमुत्क्रामंतं सर्वा एवोत्क्रामंते तस्मिंश्च प्रतिष्ठमा
ने सर्वा एव प्रातिष्ठंत एवं वाङ्मनश्चक्षुः श्रोत्रं च ते प्रीताः प्राणं स्तुन्वंति तेषोऽग्नि

॥प्रश्नो॥ ॥२॥

॥प्रनि॥

स्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुरेष पृथिवी रयिर्देवः सदसच्चामृ
तं च यत्॥ अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितं॥ ऋचो यजूंषि सामानि यज्ञः
क्षत्रं ब्रह्म च॥ प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे॥ तुभ्यं प्राण प्रजास्त्विमा
बलिं हरंति यः प्राणैः प्रतितिष्ठसि॥ देवानामसि वह्नितमः पितॄणां प्रथमा
स्वधा॥ ऋषीणां चरितं सत्यमथर्वांगिरसामसि॥ इंद्रस्त्वं प्राण तेजसा रुद्रोसि
परिरक्षिता॥ त्वमंतरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः॥ यदा त्वमभिवर्षस्य
थेमाः प्राण ते प्रजाः॥ आनंदरूपास्तिष्ठंति कामायान्नं भविष्यतीति॥ व्रात्यस्त्वं
प्राणैकर्षिरत्ता विश्वस्य सत्पतिः॥ वयमाद्यस्य दातारः पिता त्वं मातरिश्वनः॥
या ते तनूर्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि॥ या च मनसि संतता शिवां तां

॥राम॥ ॥३॥

कुरु मोत्क्रमीः॥ प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितं॥ मातेव पुत्रान्रक्ष
स्व श्रीश्च प्रज्ञांच विधेहि न इति॥ तमेतामृचोऽभिवदंति प्राणायनमइ
ति॥२॥ ॥इति प्रश्नोपनिषदि प्रथमोध्यायो द्वितीयप्रश्नश्च समाप्तः॥ ॥२॥
अथ हैनं कौशल्यश्चाश्वलायनः पप्रच्छ भगवन्कुत एष प्राणो जायते कथ
मायात्यस्मिंच्छरीर आत्मानं वा प्रविभज्य कथं प्रातिष्ठते केनोत्क्रमते कथं बा
ह्यमभिधत्ते कथमध्यात्ममिति॥ तस्मै स होवाचातिप्रश्नान्पृच्छसि ब्रह्मिष्ठोसी
ति तस्मात्तेहं ब्रवीम्यात्मन एष प्राणो जायते यथैषा पुरुषे छायैतस्मिन्नेतदा
ततं मनोनुकृतेनायात्यस्मिंच्छरीरे यथा सम्राडेवाधिकृतान्विनियुंक्ते एतान्
ग्रामानेतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्राणान्पृथक्पृथगेव

॥प्र॰भो॰॥ ॥प॰नि॰॥

॥४॥

सन्निधत्ते पायूपस्थेऽपानं चक्षुःश्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठ
ते मध्ये तु समान एष ह्येतद्धुतमन्नं समं नयति तस्मादेताः सप्तार्चिषो भवंति
हृदि ह्येष आत्मात्रैतदेकशतं नाडीनां तासां शतं शतमेकैकस्यां द्वासप्ततिर्द्वा
सप्ततिः प्रतिशाखानाडीसहस्राणि भवंत्यासु व्यानश्चरत्यथैकयोर्ध्व उदानः
पुण्येन पुण्यं लोकं नयति पापेन पापमुभाभ्यामेव मनुष्यलोकमादित्यो ॥राम॥
ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः पृथिव्यां या देवता ॥४॥
सैषा पुरुषस्यापानमवष्टभ्यांतरा यदाकाशः स समानो वायुर्व्यानस्तेजो ह वा
व उदानस्तस्मादुपशांततेजाः पुनर्भवमिंद्रियैर्मनसि संपद्यमानैर्यच्चित्तस्ते
नैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयति ॥ए

यं विद्वान्प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेषः श्लोकः ॥ उत्पत्तिमा
यतिं स्थानं विभुत्वं चैव पंचधा ॥ अध्यात्मं चैव प्राणस्य विज्ञायामृतमश्नुते वि
ज्ञायामृतमश्नुत इति ॥ १२ ॥ इति प्रश्नोपनिषदि द्वितीयाध्याये तृतीयः प्रश्नः ॥
॥ ३ ॥ अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ भगवन्नेतस्मिन्पुरुषे कानि स्व
पंति कान्यस्मिन्जाग्रति कतर एष देवः स्वप्नान्पश्यति कस्यैतत्सुखं भवति क
स्मिन्नु सर्वे संप्रतिष्ठिता भवंतीति ॥ तस्मै स होवाच यथा गार्ग्य मरीचयोऽर्कस्या
स्तं गच्छतः सर्वा एतस्मिंस्तेजोमंडल एकीभवंति ताः पुनः पुनरुदयतः प्रच
रंत्येवं ह वै तत्सर्वं परे देवे मनस्येकी भवंति तेन तर्ह्येष पुरुषो न शृणोति न प
श्यति न जिघ्रति न रसयते न स्पृशते नाभिवदते नादत्ते नानंदयते न विसृजते

॥प्रश्नो॥ ॥५॥

॥प०नि॥

नेयायते स्वपितीत्याचक्षते प्राणाग्नय एवैतस्मिन्पुरे जाग्रति॥ गार्हपत्यो ह
वा एषोऽपानो व्यानोऽन्वाहार्यपचनो यद्गार्हपत्यात्प्रणीयते प्रणयनादाहव
नीयः प्राणो यदुच्छ्वासनिःश्वासावेतावाहुती समं नयतीति स समानो मनो ह
वाव यजमान इष्टफलमेवोदानः स एनं यजमानमहरहर्ब्रह्म गमयत्यत्रैष
देवः स्वप्ने महिमानमनुभवति यद्दृष्टं दृष्टमनुपश्यति श्रुतं श्रुतमेवार्थमनु
शृणोति देशदिगंतरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति दृष्टं चादृष्टं च
श्रुतं चाश्रुतं चानुभूतं चाननुभूतं च सच्चासच्च सर्वं पश्यति सर्वः पश्यति
स यदा तेजसाऽभिभूतो भवत्यत्रैष देवः स्वप्नान्न पश्यत्यथ तदैतस्मिञ्छरी
रे एतत्सुखं भवति स यथा सोम्य वयांसि वासोवृक्षं संप्रतिष्ठंते एवं ह वै तत्स

नैर

॥राम॥ ॥५॥

र्वं पर आत्मनि संप्रतिष्ठते पृथिवी च पृथिवीमात्रा चापश्चापोमात्रा च तेजश्च
तेजोमात्रा च वायुश्च वायुमात्रा चाकाशश्चाकाशमात्रा च चक्षुश्च द्रष्टव्यं च
श्रोत्रं च श्रोतव्यं च घ्राणं च घ्रातव्यं च रसश्च रसयितव्यं च त्वक्च स्पर्शयित
व्यं च वाक्च वक्तव्यं च हस्तौ चादातव्यं चोपस्थश्चानंदयितव्यं च पायुश्च वि
सर्जयितव्यं च पादौ च गंतव्यं च मनश्च मंतव्यं च बुद्धिश्च बोद्धव्यं चाहंकार
श्चाहंकर्तव्यं च चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यं च प्राणश्च वि
धारयितव्यं चैष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मंता बोद्धा कर्ता विज्ञाना
त्मा पुरुषः स परेऽक्षरे आत्मनि संप्रतिष्ठते परमेवाक्षरं प्रतिपद्यते स यो ह वै त
दच्छायमशरीरमलोहितं शुभ्रमक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वो भ

वतितदेषः श्लोकः॥ विज्ञानात्मा सह देवैश्च सर्वैः प्राणा भूतानि संप्रतिष्ठंति॥ य
त्र तदक्षरं वेदयते यस्तु सोम्य स सर्वज्ञः सर्वमेवाविवेशेति॥४॥ ॥इति प्रश्नोपनि
षदि द्वितीयाध्यायश्चतुर्थप्रश्नश्च समाप्तः॥ ॥४॥ ॥अथ हैनं शैब्यः सत्यका
मः पप्रच्छ स यो ह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतम
वाव स तेन लोकं जयतीति॥ तस्मै स होवाचैतद्वै सत्यकाम परं चापरं च ब्रह्म य
दोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति स यद्येकमात्रमभिध्यायीत
स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते तमृचो मनुष्यलोकमुपन
यंते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवत्यथ यदि द्वि
मात्रेण मनसि संपद्यते सोंतरिक्षं यजुर्भिरुन्नीयते सोमलोकं स सोमलोके वि

भूतिमनुभूय पुनरावर्त्ततेयः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेणपरं पुरु
षमभिध्यायीतसतेजसिसूर्येसंपन्नोयथापादोदरस्त्वचाविनिर्मुच्यतएवंह
वैसपाप्मनाविनिर्मुक्तःससामभिरुन्नीयतेब्रह्मलोकंसएतस्माज्जीवघना
त्परात्परंपुरिशयंपुरुषमीक्षतेतदेतौश्लोकौभवतः॥तिस्रोमात्रामृत्युमत्यः
प्रयुक्ताअन्योन्यसक्ताअनविप्रयुक्ताः॥क्रियासुबाह्याभ्यंतरमध्यमासुसम्य
क्प्रयुक्तासुनकंपतेज्ञः॥ऋग्भिरेतंयजुर्भिरंतरिक्षंससामभिर्यत्तत्कवयोवेद
यंते॥तमोंकारेणैवायतनेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरं
चेति॥५॥ ॥इतिप्रश्नोपनिषद्दित्तीयाध्यायेपंचमःप्रश्नः॥ ॥५॥ ॥अथ
हैनंसुकेशाचभारद्वाजःपप्रच्छभगवन्हिरण्यनाभःकौशल्योराजपुत्रोमामु

41

।।प्रश्नो।। ।।प्र० नि०।।

।।१७।।

पेत्यैनं प्रश्नमपृच्छत षोडशकलं भारद्वाज पुरुषं वेत्थ तमहं कुमारमब्रुवं नाहमिमं वेद यद्यहमिममवेदिषं कथं ते नावक्ष्यमिति समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं स तूष्णीं रथमारुह्य प्रवव्राज तं त्वा पृच्छामि क्वासौ पुरुष इति।। तस्मै स होवाचेहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्तीति स ईक्षांचक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामीति कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते स एषोऽकलोऽमृतो भवति।। तदेष श्लो

।।रामः।।

।।१७।।

समुद्र इत्येवं प्रोच्यते एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति भिद्येते चासां नामरूपे

कः॥ अरा इव रथनाभौ कला यस्मिन्प्रतिष्ठिताः॥ तं वेद्यं पुरुषं वेद यथा मा वो
मृत्युः परिव्यथा इति॥ तान्होवाचैतावदेवाहमेतत्परं ब्रह्म वेद नातः परम
स्तीति॥ ते तमर्चयंतस्त्वं हि नः पिता यो ऽस्माकमविद्यायाः परं पारं तारयसीति
नमः परमऋषिभ्यो नमः परमऋषिभ्यः॥ ६॥ ॥इति पिप्पलादाथर्वणशाखा
यां प्रश्नोपनिषदि तृतीयाध्यायः षष्ठः प्रश्नश्च समाप्तः॥ ॥६॥ ॥ॐ नमो ब्र
ह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यो नमो गुरुभ्यः॥
सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि॥ ॥७॥ ॥इति समाप्ता
प्रश्नोपनिषत्॥ ॥प्रश्नखंड उपनिषद्॥ ॥अध्यायानां त्रयं॥ ॥अत्र शांतिपा
ठः भद्रं कर्णेभिः स्वस्ति न इंद्र० शं न इंद्राग्नी इत्यादि मंत्रत्रयं ज्ञेयं विद्वद्भिः॥

॥प्रश्नो॥

॥८॥

॥इतिप्रश्नोपनिषत्समाप्ता॥छ॥

॥पनि॥

॥राम॥

॥८॥

४०

श्रीं ९८

॥अथ मुंडकोपनिषत्प्रारंभः॥७॥

Acc. No. 4860

मुण्डकोपनिषद्

folio - 7.

॥मुं० ३॥

॥१॥

॥कौ०प०॥

श्रीगणेशाय नमः॥ ॥हरिः ॐ॥ ॥ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता
भुवनस्य गोप्ता॥ स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह॥ अ
थर्वणे यां प्रवदेत ब्रह्माऽथर्वा तां पुरोवाचांगिरे ब्रह्मविद्यां॥ स भारद्वाजाय सत्य
वाहाय प्राह भारद्वाजोंऽगिरसे परावरां॥ शौनको ह वै महाशालोंऽगिरसं विधिवदु
पसन्नः पप्रच्छ कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति॥ तस्मै स हो
वाच द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदंति परा चैवापरा च॥ तत्रापरा

॥हरे॥

॥१॥

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छंदो
ज्योतिषमिति॥ अथ परा यया तदक्षरमधिगम्यते॥ यत्तदद्रेश्यमग्राह्यमगो
त्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं॥ नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं

२ तीतिहासपुराणन्यायमीमांसाधर्मशास्त्रधी
स्था

यद्भूतयोनिं परिपश्यंति धीराः ॥ यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्या-
मोषधयः संभवंति ॥ यथा सतः पुरुषात्केशलोमानि तथाऽक्षरात्संभवतीह
विश्वं ॥ तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ॥ अन्नात्प्राणो मनः सत्यं लो-
काः कर्मसु चामृतं ॥ यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ॥ तस्मादेतद्ब्रह्म ना-
मरूपमन्नं च जायते ॥ १ ॥ तदेतत्सत्यं ॥ मंत्रेषु कर्माणि कवयो यान्यपश्यंस्ता-
नि त्रेतायां बहुधा संततानि ॥ तान्याचरथ नियतं सत्यकामा एष वः पंथाः सु-
कृतस्य लोके ॥ यदा लेलायते ह्यर्चिः समिद्धे हव्यवाहने ॥ तदाऽऽज्यभागावंतरे-
णाहुतीः प्रतिपादयेत् ॥ यस्याग्निहोत्रमदर्शमपौर्णमासमनाग्रायणमति-
थिवर्जितं च ॥ अहुतमवैश्वदेवमविधिना हुतमासप्तमांस्तस्य लोकान्हिनस्ति ॥

॥मुंड॥ ॥२॥ ॥कोप॥

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा॥ स्फुलिंगिनी विश्व
रुची च देवी लेलायमाना इति सप्त जिह्वाः॥ एतेषु यश्चरते भ्राजमानेषु यथाका
लं चाहुतयो ह्याददायन्॥ तं नयंत्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेको
ऽधिवासः॥ एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहंति।
प्रियां वाचमभिवदंत्योऽर्चयंत्य एष वः पुण्यः सुकृतो ब्रह्मलोकः॥ प्लवाह्येते अ
दृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म॥ एतच्छ्रेयो येऽभिनंदंति मूढा ज
रामृत्युं ते पुनरेवापियंति॥ अविद्यायामंतरे वर्त्तमानाः स्वयंधीराः पंडितंमन्य
मानाः॥ जघन्यमानाः परियंति मूढा अंधेनैव नीयमाना यथांऽधाः॥ अविद्या
यां बहुधा वर्त्तमाना वयं कृतार्था इत्यभिमन्यंति बालाः॥ यत्कर्मिणो न प्रवेदयं

॥हरे॥ ॥२॥

तिरागात्तेनातुराः क्षीणलोकाश्च्यवंते॥ इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेद
यंते प्रमूढाः॥ नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशंति॥ तपःश्र
द्धे ये ह्युपवसंत्यरण्ये शांता विद्वांसो भैक्ष्यचर्यां चरंतः॥ सूर्यद्वारेण ते विरजाः प्रया
ंति यत्रामृतः स पुरुषो ह्यव्ययात्मा॥ परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेद
मायान्नास्त्यकृतः कृतेन॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रि
यं ब्रह्मनिष्ठं॥ तस्मै स विद्वानुपसन्नाय सम्यक्प्रशांतचित्ताय शमान्विताय॥
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां॥ २॥ ॥ इति प्रथममुंड
के॥ ॥१॥ ॥ तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते
सरूपाः॥ तथाऽक्षराद्विविधाः सोम्य भावाः प्रजायंते तत्र चैवापियंति॥ दिव्यो

ह्यमूर्त्तः पुरुषः सबाह्याभ्यंतरो ह्यजः॥ अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः॥
एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धा
रिणी॥ अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो
हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मा॥ तस्मादग्निः समिधो यस्य
सूर्यः सोमात्पर्जन्य ओषधयः पृथिव्यां॥ पुमान्रेतः सिंचति योषितायां बह्वीः
प्रजाः पुरुषात्संप्रसूताः॥ तस्मादृचः साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षि
णाश्च॥ संवत्सरश्च यजमानश्च लोकाः सोमो यत्र पवते यत्र सूर्यः॥ तस्माच्च दे
वा बहुधा संप्रसूताः साध्या मनुष्याः पशवो वयांसि॥ प्राणापानौ व्रीहियवौ तपश्च
श्रद्धा सत्यं ब्रह्मचर्यं विधिश्च॥ सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः स

ब्राम

सहोमाः॥सप्तइमेलोकायेषुचरंतिप्राणागुहाशयानिहिताःसप्तसप्त॥अतः
समुद्रागिरयश्चसर्वेऽस्मात्स्यंदंतेसिंधवःसर्वरूपाः॥अतश्चसर्वाओषधयोर
सश्चयेनेषभूतैस्तिष्ठतेह्यंतरात्मा॥पुरुषएवेदंविश्वंकर्मतपोब्रह्मपरामृतं॥ए
तद्योवेदनिहितंगुहायांसोऽविद्याग्रंथिंविकिरतीहसोम्य॥२॥आविःसन्निहि
तंगुहाचरंमहत्पदं॥अत्रैतत्सर्वंमर्पितमेजत्प्राणन्निमिषच्चयत्॥एतज्जान
थसदसद्वरेण्यंपरंविज्ञानाद्यद्वरिष्ठंप्रजानां॥यदर्चिमद्यदणुभ्योऽणुचयस्मि
ल्लोकानिहितालोकिनश्च॥तदेतदक्षरंब्रह्मसप्राणस्तदुवाङ्मनः॥तदेतत्सत्यं
तदमृतंतद्वेद्धव्यंसोम्यविद्धि॥धनुर्गृहीत्वौपनिषदंमहास्त्रंशरंह्युपासानिशि
तंसंधयीत॥आयम्यतद्भावगतेनचेतसालक्ष्यंतदेवाक्षरंसोम्यविद्धि॥प्र

51

॥मुं ३॥ ॥कोप॰॥

॥४॥

णवोधनुःशरोह्यात्माब्रह्मतल्लक्ष्यमुच्यते॥अप्रमत्तेनवेद्धव्यंशरवत्तन्मयोभ
वेत्॥४॥यस्मिन्द्यौःपृथिवीचांतरिक्षमोतंमनःसहप्राणैश्चसर्वैः॥तमेवैकंजान
थआत्मानमन्यावाचोविमुंचथामृतस्यैषसेतुः॥अराइवरथनाभौसंहतायत्र
नाड्यःसएषोंतश्चरतेबहुधाजायमानः॥ॐमित्येवंध्यायथआत्मानंस्वस्ति
वःपारायतमसःपरस्तात्॥यःसर्वज्ञःसर्वविद्यस्यैषमहिमाभुवि॥दिव्येब्र
ह्मपुरेह्येषव्योम्न्यात्माप्रतिष्ठितः॥मनोमयःप्राणशरीरनेताप्रतिष्ठितोन्ने
हृदयंसन्निधाय॥तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाति॥
भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥क्षीयंतेचास्यकर्माणितस्मिन्दृष्टेप
रावरे॥हिरण्मयेपरेकोशेविरजंब्रह्मनिष्कलं॥तच्छुभ्रंज्योतिषांज्योतिस्त

॥हरे॥

॥४॥

न तत्र सूर्यादिकं वपुः प्रकाशेन भांति याता नेचयांति देवताः॥ यत्र देवकृत सिभूतभावनः स्वयंविभ्रसा विरजः प्रभा

यदात्मविदो विदुः॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥ ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण॥ अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठं॥४॥ ॥इति द्वितीयमुंडकं॥२॥ ॥द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं॥ तदा विद्वान्पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति॥ प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन्विद्वान्भवते नातिवादी॥

53

॥मुंड॥

॥५॥

आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः॥ सत्येन लभ्यस्तपसा ह्येष
आत्मा सम्यक्ज्ञानेन ब्रह्मचर्येण नित्यं॥ अंतःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्य
ति यतयः क्षीणदोषाः॥ सत्यमेव जयति नानृतं सत्येन पंथा विततो देवयानः॥ ये
नाक्रमंत्यृषयो ह्याप्तकामा यत्र तत्सत्यस्य परमं निधानं॥ बृहच्च तद्दिव्यमचिं
त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति॥ दूरात्सुदूरे तदिहांतिके च पश्यत्स्विहै
व निहितं गुहायां॥ न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा॥
ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः॥ एषोऽणुरा
त्मा चेतसा वेदितव्यो यस्मिन्प्राणः पंचधा संविवेश॥ प्राणैश्चित्तं सर्वमोतं प्र
जानां यस्मिन्विशुद्धे विभवत्येष आत्मा॥ यं यं लोकं मनसा संविभाति विशुद्ध

॥कोप.॥

॥हरे॥

॥५॥

सत्वः कामयते यांश्च कामान्॥ तं तं लोकं जयते तांश्च कामांस्तस्मादात्मज्ञं ह्यर्चये
द्भूतिकामः॥१॥ स वेदैतत्परमं ब्रह्मधाम यत्र विश्वं निहितं भाति शुभ्रं॥ उ
पासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तंति धीराः॥ कामान्यः कामयते म
न्यमानः स कामभिर्जायते तत्र तत्र॥ पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्र
विलीयंति कामाः॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन॥ य
मेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां॥ नायमात्मा बल
हीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिंगात्॥ एतैरुपायैर्यतते यस्तु विद्वां
स्तस्यैष आत्मा विशते ब्रह्मधाम॥ संप्राप्यैनमृषयो ज्ञानतृप्ताः कृतात्मानो वीत
रागाः प्रशांताः॥ ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशंति॥ वेदां

॥फोप॥

मुं ३॥

॥६॥

तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः॥ ते ब्रह्मलोकेषु
परांतकाले परामृतात्परिमुच्यंति सर्वे॥ गताः कलाः पंचदश प्रतिष्ठा देवाश्च सर्
वें प्रतिदेवतासु॥ कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवंति॥
यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छंति नामरूपे विहाय॥ तथा विद्वान्नाम
रूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मै
व भवति नास्याब्रह्मवित्कुले भवति॥ तरति शोकं तरति पाप्मानं गुहाग्रंथि
भ्यो विमुक्तोऽमृतो भवति॥ तदेतदृचाऽभ्युक्तं॥ क्रियावंतः श्रोत्रिया ब्रह्मनिष्ठाः
स्वयं जुह्वत एकर्षिं श्रद्धयंतः॥ तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिव
द्यैस्तु चीर्णं॥ तदेतत्सत्यमृषिरंगिराः पुरोवाच नैतदचीर्णव्रतोऽधीते॥ नमः पर

हरे॥

॥६॥

मऋषिभ्योनमः परमऋषिभ्यः॥११॥ ॥इति अथर्वणवेदे मुंडकोपनिषदि
तृतीयं मुंडकं॥ ॥३॥ ॥स्वं उपनिषद्॥ ॥मुंडकानि त्रीणि॥ ॥अथायं शांतिपा
ठः॥ ॥ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः॥ स्थिरै रं
गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ स्वस्ति न इंद्रो वृद्धश्रवाः स्व
स्ति नः पूषा विश्ववेदाः॥ स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द
धातु॥ ॥ॐ शांतिः शांतिः शांतिः॥ ॥ॐ शं न इंद्राग्नी भवतामवोभिः शं न इंद्रा
वरुणा रातहव्या॥ शमिंद्रासोमा सुविताय शंयोः शं न इंद्रापूषणा वाजसातौ॥
॥ ॥ॐ शांतिः शांतिः शांतिः॥ ॥

57

॥मुंड॥
॥७॥

॥इतिमुंडकोपनिषत्समाप्ता॥७॥

॥कोप॰॥
॥हरे॥
॥७॥

१२६

।।अथ मांडुक्योपनिषत्सारं भः।।छ।।

Acc. No. 4861

माण्डुक्योपनिषत्

folio - 2.

59

॥मांडु॥

॥१॥

मा १

॥श्रीप॥

श्रीगणेशाय नमः॥ ॥हरिः ॐ॥ ॥ॐमित्येतदक्षरमिदं सर्वं तस्योपव्या
ख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंका
र एव सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म॥ सोयमात्मा चतुष्पात्॥ जागरितस्थानो बहिःप्र
ज्ञः सप्तांग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः॥ स्वप्नस्था
नोंतःप्रज्ञः सप्तांग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः॥
यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति तत्सुषुप्तं सुषुप्तस्था
न एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः॥ ए
ष सर्वेश्वर एष सर्वज्ञ एषोंतर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानां॥ नांतः
प्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहार्यम

॥राम॥

॥१॥

ग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपंचोपशमं शांतं शिव
मद्वैतं चतुर्थं मन्यंते स आत्मा स विज्ञेयः॥ सोयमात्माऽध्यक्षरमोंकारोऽधिमा
त्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति॥ जागरितस्थानो वैश्वा
नरोऽकारः प्रथमा मात्रा आप्तेरादिमत्वाद्वाप्नोति ह वै सर्वान्कामानादिश्च भव
ति य एवं वेद॥ स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वो
त्कर्षति ह वै ज्ञानसंततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद॥
सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतेर्वा मिनोति ह वा इदं सर्व
मपीतिश्च भवति य एवं वेद॥ अमात्रश्चतुर्थोऽव्यवहार्यः प्रपंचोपशमः शिवोऽ
द्वैत एवमोंकार आत्मैव संविशत्यात्मनात्मानं य एवं वेद॥१॥ ॥इति माण्डूक्योपनि

61

॥२॥

षदथर्वणवेदेप्रोक्ता॥ ॥अत्रशांतिपाठोभद्रंकर्णेभिरित्यादिऋक्त्रयं॥ ॥श्री॥

१२८

नं १५

॥अथऐतरेयोपनिषत्प्रारंभः॥

Acc. No. 4862.

ऐतरेयोपनिषद्

folio - 5.

63

॥१॥

॥श्रीगणेशाय नमः॥ ॥हरिः ॐ॥ ॥आत्मा वा इदमेक एवाग्र आसीन्नान्य
त्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतांभो मरीचीर्म
रमापोदोंभः परेण दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्ता
त्ता आपः स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति सोद्भ्य एव पुरुषं समु
द्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथांडं मुखा ॥हरे॥
द्वाग्वाचोग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निर
भिद्येतामक्षीभ्यां चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दि ॥१॥
शस्त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्य
त हृदयान्मनो मनसश्चंद्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः

शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥१॥ ता एता देवताः सृष्टा अस्मिन्म
हत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत्ता एनमब्रुवन्नायतनं नः प्रजा
नीहि यस्मिन्प्रतिष्ठिता अन्नमदामेति ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमि
ति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रु
वन्सुकृतं बतेति पुरुषो वाव सुकृतं ता अब्रवीद्यथायतनं प्रविशतेत्यग्निर्वा
ग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी
प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्रा
विशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रे
तो भूत्वा शिश्नं प्राविशंस्तमशनापिपासे अब्रूतामावाभ्यामभिप्रजानीहीति ते

॥ऐत॰॥

॥२॥

अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति तस्माद्यस्यै कस्यै
च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनापिपासे भवतः ॥५॥ स ईक्षतेमे नु
लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति सोऽपोऽभ्यतपत्ताभ्योऽभितप्ताभ्यो
मूर्तिरजायत या वै सा मूर्तिरजायतान्नं वै तत्तदेनत्सृष्टं पराङत्यजिघांसत्तद्
वाचाजिघृक्षत्तन्नाशक्नोद्वाचा ग्रहीतुं स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवा
न्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन ग्रहीतुं स यद्धैनत्प्राणेना
ग्रहैष्यदभिप्राण्य हैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषा ग्रही
तुं स यद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाश
क्नोच्छ्रोत्रेण ग्रहीतुं स यद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत्तत्त्वचाजिघृ

॥उप॰॥

॥हरे॥

॥२॥

क्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्मन
साजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्ध्यात्वाहैवान्नम
त्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्रहै
ष्यद्विसृज्यहैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वा
युरन्नायुर्वाएषयद्वायुःसईक्षतकथंन्विदंमदृतेस्यादितिसईक्षतकतरेणप्र
पद्याइतिसईक्षतयदिवाचाऽभिव्याहृतंयदिप्राणेनाभिप्राणितंयदिचक्षुषा
दृष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंयद्यपानेनाभ्यपानितं
यदिशिश्नेनविसृष्टमथकोहमितिसएतमेवसीमानंविदार्यैतयाद्वाराप्रापद्य
तसैषाविदृतिर्नामद्वास्तदेतन्नान्दनंतस्यत्रयआवसथास्त्रयःस्वप्नाअयमाव

67

॥ऐत०॥ ॥अपक्रामंतु गर्भिण्यः॥ ॥ ॥उप०॥

॥३॥

सथोऽयमावसथोऽयमावसथ इति स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वाव
दिषदिति स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती३ तस्मादिदंद्रो
नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि
देवाः परोक्षप्रिया इव हि देवाः॥३॥ ॥इति द्वितीयारण्यके चतुर्थोऽध्यायः॥ ॥श्री॥
पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः ॥हरे॥
संभूतमात्मन्येवात्मानं बिभर्त्ति तद्यदा स्त्रियां सिंचत्यथैनज्जनयति तदस्य
प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा स्वमंगं तथा तस्मादेनां न हि ॥३॥
नस्ति साऽस्यैतमात्मानमत्र गतं भावयति सा भावयित्री भावयितव्या भवति
तं स्त्री गर्भं बिभर्त्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति स यत्कुमारं जन्म

त

नोग्रे धिभावयत्यात्मानमेव तद्भावयत्येषां लोकानां संतत्या एवं संतता हीमे लो
कास्तदस्य द्वितीयं जन्म सोस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते थास्यायमि
तर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं
जन्म तदुक्तमृषिणा गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा॥ शतं मा
पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति गर्भ एवैतच्छयानो वामदेव एवमुवाच स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन्स्वर्गे लोके स
र्वान्कामानाप्त्वामृतः समभवत्समभवत्॥४॥ ॥इति द्वितीयारण्यके पंचमोध्या
यः॥ ॥५॥ ॥कोयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा पश्यति येन वा श्रृ
णोति येन वा गंधानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च वि

२॥यथास्थानं गर्भनिर्णयः॥ ॥

५जानि च जारु

जानाति यदेतद्धृदयं मनश्चैतत्संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्म
तिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि प्रज्ञान
स्य नामधेयानि भवंत्येष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इमानि च पंच भू
तानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजा
नीतराणि चेतराणि चांडजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा
हस्तिनो यत्किंचेदं प्राणि जंगमं च पतत्रि च यच्च स्थावरं सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने
प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म॥ स एतेन प्रज्ञेनात्मनाऽस्मा
ल्लोकादुत्क्रम्यामुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृतः समभवत्समभवत्॥
॥५॥ ॥इति द्वितीयारण्यके षष्ठोऽध्यायः॥ ॥६॥ ॥समाप्ता चेयमैतरेयोपनिषत्॥

॥४॥ महा३ ॥हरे॥ ॥४॥

अथायं शांतिपाठः॥ ॥ॐ वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमावि
रावीर्म एधि॥ वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रांसंद
धाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु व
क्तारमवतु वक्तारं॥ ६॥ ॥ॐ शांतिः शांतिः शांतिः॥ ॥इति ऋग्वेदोपनिषत्॥

अ० २

॥ऐत॰॥

॥५॥

॥इत्यैतरेयोपनिषत्समाप्ता॥

॥उप॰॥

॥हरे॥

॥५॥

७२८

4863

१८

॥अथतैत्तिरीयोपनिषत्प्रारंभः॥छ॥

Acc. No. 4863.

तैत्तिरीयोपनिषत् (शिक्षावल्ली)

folio - 13.

॥तैत्ति॥

॥१॥

॥श्रीगणेशायनमः॥ ॥हरिः ॐ॥ ॥शंनोमित्रः शंवरुणः॥ शंनोभवत्वर्यमा॥
शंनइंद्रोबृहस्पतिः॥ शंनोविष्णुरुरुक्रमः॥ नमोब्रह्मणे॥ नमस्तेवायो॥ त्वमेव
प्रत्यक्षंब्रह्मासि॥ त्वामेवप्रत्यक्षंब्रह्मवदिष्यामि॥ ऋतंवदिष्यामि॥ सत्यंवदिष्या
मि॥ तन्मामवतु॥ तद्वक्तारमवतु॥ अवतुमां॥ अवतुवक्तारं॥ ॥ॐ शांतिः शां
तिः शांतिः॥ ॥१॥ ॥शीक्षांव्याख्यास्यामः॥ वर्णःस्वरः॥ मात्राबलं॥ सामसंता
नः॥ इत्युक्तःशीक्षाध्यायः॥ २॥ शीक्षांपंचमं॥ सहनौयशः॥ सहनौब्रह्मवर्चसं॥ अ
थातःसंहितायाउपनिषदंव्याख्यास्यामः॥ पंचस्वधिकरणेषु॥ अधिलोकम
धिज्योतिषमधिविद्यमधिप्रजमध्यात्मं॥ तामहासंहिताइत्याचक्षते॥ अ
थाधिलोकं॥ पृथिवीपूर्वरूपं॥ द्यौरुत्तररूपं॥ आकाशःसंधिः॥ वायुःसंधानं॥

॥ष त्रि॥

॥शुक्ल॥

॥१॥

इत्यधिलोकं ॥ अथाधिज्योतिषं ॥ अग्निः पूर्वरूपं ॥ आदित्य उत्तररूपं ॥ आपः
संधिः ॥ वैद्युतः संधानं ॥ इत्यधिज्योतिषं ॥ अथाधिविद्यं ॥ आचार्यः पूर्वरूपं ॥
अंतेवास्युत्तररूपं ॥ विद्या संधिः ॥ प्रवचनꣳ संधानं ॥ इत्यधिविद्यं ॥ अथाधि
प्रजं ॥ माता पूर्वरूपं ॥ पितोत्तररूपं ॥ प्रजा संधिः ॥ प्रजननꣳ संधानं ॥ इत्यधि
प्रजं ॥ अथाध्यात्मं ॥ अधरा हनुः पूर्वरूपं ॥ उत्तरा हनुरुत्तररूपं ॥ वाक् संधिः ॥
जिह्वा संधानं ॥ इत्यध्यात्मं ॥ इतीमा महासꣳहिताः ॥ य एवमेता महासꣳहिता
व्याख्याता वेद ॥ संधीयते प्रजया पशुभिः ॥ ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण
लोकेन ॥ ३ ॥ संधिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥ ३ ॥ यश्छंदसा
मृषभो विश्वरूपः ॥ छंदोभ्योध्यमृतात्संबभूव ॥ स मेंद्रो मेधया स्पृणोतु ॥

॥२॥

अमृतस्य देव धारणो भूयासं ॥ शरीरं मे विचर्षणं ॥ जिह्वा मे मधुमत्तमा ॥ क
र्णाभ्यां भूरि विश्रुवं ॥ ब्रह्मणः कोशोसि मेधयापिहितः ॥ श्रुतं मे गोपाय ॥ आव
हंती वितन्वाना ॥ कुर्वाणा चीरमात्मनः ॥ वासांसि मम गावश्च ॥ अन्नपाने च सर्
वदा ॥ ततो मे श्रियमावह ॥ लोमशां पशुभिः सह स्वाहा ॥ आमायंतु ब्रह्मचारिणः
स्वाहा ॥ विमायंतु ब्रह्मचारिणः स्वाहा ॥ प्रमायंतु ब्रह्मचारिणः स्वाहा ॥ दमायं
तु ब्रह्मचारिणः स्वाहा ॥ शमायंतु ब्रह्मचारिणः स्वाहा ॥ यशो जनेऽसानि स्वाहा ॥ ॥ कृष्ण ॥
श्रेयान्वस्यसोसानि स्वाहा ॥ तं त्वा भग प्रविशानि स्वाहा ॥ स मा भग प्रविश स्वाहा ॥ ॥२॥
तस्मिंसहस्रशाखे ॥ निभगाहं त्वयि मृजे स्वाहा ॥ यथापः प्रवता यंति ॥ यथा मा
सा अहर्जरं ॥ एवं मां ब्रह्मचारिणः ॥ धातरायंतु सर्वतः स्वाहा ॥ प्रतिवेशोसि प्र

मा भा हिंस मां पद्यस्व ॥ ४ ॥ विलन्वा नारा मायंतु ब्रह्मचारिणः स्वाहा धा लरायंतु
सर्वतः स्वाहै कंच ॥ ४ ॥ भूर्भुवः सुवरिति वा एतास्तिस्रो व्याहृतयः ॥ तासा मुहस्मै
तां चतुर्थीं ॥ महाचमस्यः प्रवेदयते ॥ मह इति ॥ तद्ब्रह्म ॥ स आत्मा ॥ अंगान्यन्या
देवताः ॥ भूरिति वा अयं लोकः ॥ भुव इत्यंतरिक्षं ॥ सुवरित्यसौ लोकः ॥ मह इ
त्यादित्यः ॥ आदित्येन वाव सर्वे लोका महीयंते ॥ भूरिति वा अग्निः ॥ भुव इति वा
युः ॥ सुवरित्यादित्यः ॥ मह इति चंद्रमाः ॥ चंद्रमसा वाव सर्वाणि ज्योतींषि मही
यंते ॥ भूरिति वा ऋचः ॥ भुव इति सामानि ॥ सुवरिति यजूंषि ॥ मह इति ब्र
ह्म ॥ ब्रह्मणा वाव सर्वे वेदा महीयंते ॥ भूरिति वै प्राणः ॥ भुव इत्यपानः ॥ सुव
रिति व्यानः ॥ मह इत्यन्नं ॥ अन्नेन वाव सर्वे प्राणा महीयंते ॥ ता वा एताश्चत

77

स्वश्चतुर्थी ॥ चतस्रश्चतस्रो व्याहृतयः ॥ ता यो वेद ॥ स वेद ब्रह्म ॥ सर्वेस्मै देवा
बलिमावहंति ॥ ५ ॥ असौ लोको यजूंषि वेद द्वे च ॥ ५ ॥ स य एषोंतर्हृदय आ
काशः ॥ तस्मिन्नयं पुरुषो मनोमयः ॥ अमृतो हिरण्मयः ॥ अंतरेण तालुके ॥
य एष स्तन इवावलंबते ॥ सेंद्रयोनिः ॥ यत्रासौ केशांतो विवर्त्तते ॥ व्यपोह्य शीर्ष
कपाले ॥ भूरित्यग्नौ प्रतितिष्ठति ॥ भुव इति वायौ ॥ सुवरित्यादित्ये ॥ मह इ
ति ब्रह्मणि ॥ आप्नोति स्वाराज्यं ॥ आप्नोति मनसस्पतिं ॥ वाक्पतिश्चक्षुष्पतिः ॥ श्रो
त्रपतिर्विज्ञानपतिः ॥ एतत्ततो भवति ॥ आकाशशरीरं ब्रह्म ॥ सत्यात्म प्राणारा
मं मन आनंदं ॥ शांतिसमृद्धममृतं ॥ इति प्राचीनयोग्योपास्व ॥ ६ ॥ वायावमृ
तमेकं च ॥ ६ ॥ पृथिव्यंतरिक्षं द्यौर्दिशोऽवांतरदिशाः ॥ अग्निर्वायुरादित्यश्चं

द्रमा नक्षत्राणि॥ आप ओषधयो वनस्पतय आकाश आत्मा॥ इत्यधिभूतं॥
अथाध्यात्मं॥ प्राणो व्यानोपान उदानः समानः॥ चक्षुः श्रोत्रं मनो वाक् त्वक्॥
चर्म मांसं स्नावास्थि मज्जा॥ एतदधिविधाय ऋषिरवोचत्॥ पाङ्क्तं वा इदं
सर्वं॥ पाङ्क्तेनैव पाङ्क्तं स्पृणोतीति॥ ७॥ सर्वमेकं च॥ ॐमिति ब्रह्म॥ ॐमिती
दं सर्वं॥ ॐमित्येतदनुकृतिर्ह स्म वा अप्यो श्रावयेत्याश्रावयंति॥ ॐमिति
सामानि गायंति॥ ॐ शोमिति शस्त्राणि शंसंति॥ ॐमित्यध्वर्युः प्रतिग
रं प्रतिगृणाति॥ ॐमिति ब्रह्मा प्रसौति॥ ॐमित्यग्निहोत्रमनुजानाति॥ ॐ
मिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति॥ ब्रह्मैवोपाप्नोति॥ ८॥ ॐद
श॥ ८॥ ऋतं च स्वाध्यायप्रवचने च॥ सत्यं च स्वाध्यायप्रवचने च॥ तपश्च स्वा

ध्यायप्रवचने च ॥ दमश्च स्वाध्यायप्रवचने च ॥ शमश्च स्वाध्यायप्रवचने
च ॥ अग्नयश्च स्वाध्यायप्रवचने च ॥ अग्निहोत्रं च स्वाध्यायप्रवचने च ॥ अ
तिथयश्च स्वाध्यायप्रवचने च ॥ मानुषं च स्वाध्यायप्रवचने च ॥ प्रजा च स्वा
ध्यायप्रवचने च ॥ प्रजनश्च स्वाध्यायप्रवचने च ॥ प्रजातिश्च स्वाध्यायप्रव
चने च ॥ सत्यमिति सत्यवचा राथीतरः ॥ तप इति तपोनित्यः पौरुशिष्टिः ॥ स्वा
ध्यायप्रवचने एवेति नाको मौद्गल्यः ॥ तद्धि तपस्तद्धि तपः ॥ १ ॥ प्रजा च स्वाध्या
यप्रवचने च षट् च ॥ ९ ॥ अहं वृक्षस्य रेरिवा ॥ कीर्तिः पृष्ठं गिरेरिव ॥ ऊर्ध्वप
वित्रो वाजिनीव स्वमृतमस्मि ॥ द्रविणꣳ सवर्चसं ॥ सुमेधा अमृतोक्षितः ॥ इ
ति त्रिशंकोर्वेदानुवचनं ॥ १० ॥ अहꣳ षट् ॥ १० ॥ वेदमनूच्याचार्योंतेवासिन

मनुशास्ति॥ सत्यं वद॥ धर्मं चर॥ स्वाध्यायान्मा प्रमदः॥ आचार्याय प्रियं ध
नमाहृत्य प्रजातंतुं मा व्यवछेत्सीः॥ सत्यान्न प्रमदितव्यं॥ धर्मान्न प्रमदि
तव्यं॥ कुशलान्न प्रमदितव्यं॥ भूत्यै न प्रमदितव्यं॥ स्वाध्यायप्रवचनाभ्यां न
प्रमदितव्यं॥ देवपितृकार्याभ्यां न प्रमदितव्यं॥ मातृदेवो भव॥ पितृदेवो भव॥
आचार्यदेवो भव॥ अतिथिदेवो भव॥ यान्यनवद्यानि कर्माणि॥ तानि सेवित
व्यानि॥ नो इतराणि॥ यान्यस्माकं सुचरितानि॥ तानि त्वयोपास्यानि॥ नो इत
राणि॥ ये के चास्मच्छ्रेयांसो ब्राह्मणाः॥ तेषां त्वयासनेन प्रश्वसितव्यं॥ श्रद्ध
या देयं॥ अश्रद्धयाऽदेयं॥ श्रिया देयं॥ ह्रिया देयं॥ भिया देयं॥ संविदा देयं॥
अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्॥ ये तत्र ब्राह्मणाः सं

मर्शिनः॥ युक्ता अयुक्ताः॥ अलूक्षा धर्मकामाः स्युः॥ यथा ते तत्र वर्तेरन्॥ त
था तत्र वर्तेथाः॥ अथाभ्याख्यातेषु॥ ये तत्र ब्राह्मणाः संमर्शिनः॥ युक्ता अयु
क्ताः॥ अलूक्षा धर्मकामाः स्युः॥ यथा ते तेषु वर्तेरन्॥ तथा तेषु वर्तेथाः॥ एष
आदेशः॥ एष उपदेशः॥ एषा वेदोपनिषत्॥ एतदनुशासनं॥ एवमुपासित
व्यं॥ एवमु चैतदुपास्यं॥११॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं ता नित्यर्यो
पास्यानि स्यात्तेषु वर्तेरन्नस्मच॥११॥ ॥शं नो मित्रः शं वरुणः॥ शं नो भवत्वर्य
मा॥ शं न इंद्रो बृहस्पतिः॥ शं नो विष्णुरुरुक्रमः॥ नमो ब्रह्मणे॥ नमस्ते वायो॥ त्व
मेव प्रत्यक्षं ब्रह्मासि॥ त्वामेव प्रत्यक्षं ब्रह्मावादिषं॥ ऋतमवादिषं॥ सत्यमवा
दिषं॥ तन्मामावीत्॥ तद्वक्तारमावीत्॥ आवीन्मां॥ आवीद्वक्तारं॥ ॥ॐ शांतिः॥

तिः शांतिः ॥ ॥१२॥ ॥ॐ शंनः शीक्षां सह नौ यश्छंदसां भूः स यः पृथिव्योमि
ऋतं चाहं वेद मनुश्च शंनो द्वादश ॥ शंनो मह इत्यादिश्यो नोइशाणि त्रयोविं
शतिः ॥१२॥ ॥इति तैत्तिरीयोपनिषदि शीक्षानाम प्रथमः प्रपाठकः ॥ ॥१॥ ॥
सह नाववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु ॥
मा विद्विषावहै ॥ ॐ शांतिः शांतिः शांतिः ॥१॥ ॥ब्रह्मविदाप्नोति परं ॥ तदेषाऽभ्यु
क्ता ॥ सत्यं ज्ञानमनंतं ब्रह्म ॥ यो वेद निहितं गुहायां ॥ परमे व्योमन् ॥ सोऽश्नु
ते सर्वान्कामान्सह ॥ ब्रह्मणा विपश्चितेति ॥ तस्माद्वा एतस्मादात्मन आकाशः
संभूतः ॥ आकाशाद्वायुः ॥ वायोरग्निः ॥ अग्नेरापः ॥ अद्भ्यः पृथिवी ॥ पृथिव्या
ओषधयः ॥ ओषधीभ्योऽन्नं ॥ अन्नात्पुरुषः ॥ स वा एष पुरुषोऽन्नरसमयः ॥

तस्येदमेव शिरः॥ अयं दक्षिणः पक्षः॥ अयमुत्तरः पक्षः॥ अयमात्मा॥ इदं पु
च्छं प्रतिष्ठा॥ तदप्येष श्लोको भवति॥ २॥ अन्नाद्वै प्रजाः प्रजायंते॥ याः काश्च
पृथिवीं श्रिताः॥ अथो अन्नेनैव जीवंति॥ अथैनदपियंत्यंततः॥ अन्नं हि भू
तानां ज्येष्ठं॥ तस्मात्सर्वौषधमुच्यते॥ सर्वं वै तेऽन्नमाप्नुवंति॥ येऽन्नं ब्रह्मोपास
ते॥ अन्नं हि भूतानां ज्येष्ठं॥ तस्मात्सर्वौषधमुच्यते॥ अन्नाद्भूतानि जायंते॥
जातान्यन्नेन वर्द्धंते॥ अद्यतेऽत्ति च भूतानि॥ तस्मादन्नं तदुच्यत इति॥ तस्मा
द्वा एतस्मादन्नरसमयात्॥ अन्योंतर आत्मा प्राणमयः॥ तेनैष पूर्णः॥ स वा ए
ष पुरुषविध एव॥ तस्य पुरुषविधतां॥ अन्वयं पुरुषविधः॥ तस्य प्राण एव
शिरः॥ व्यानो दक्षिणः पक्षः॥ अपान उत्तरः पक्षः॥ आकाश आत्मा॥ पृथिवी पु

॥ हरम ॥
॥ ६ ॥

छं प्रतिष्ठा ॥ तदप्येषः श्लोको भवति ॥ ३ ॥ प्राणं देवा अनु प्राणंति ॥ मनुष्याः
पशवश्च ये ॥ प्राणो हि भूतानामायुः ॥ तस्मात्सर्वायुषमुच्यते ॥ सर्वमेव त आ
युर्यंति ॥ ये प्राणं ब्रह्मोपासते ॥ प्राणो हि भूतानामायुः ॥ तस्मात्सर्वायुषमुच्य
त इति ॥ तस्यैष एव शारीर आत्मा ॥ यः पूर्वस्य ॥ तस्माद्वा एतस्मात्प्राणमया
त् ॥ अन्योंतर आत्मा मनोमयः ॥ तेनैष पूर्णः ॥ स वा एष पुरुषविध एव ॥ त
स्य पुरुषविधतां ॥ अन्वयं पुरुषविधः ॥ तस्य यजुरेव शिरः ॥ ऋग्दक्षिणः
पक्षः ॥ सामोत्तरः पक्षः ॥ आदेश आत्मा ॥ अथर्वांगिरसः पुच्छं प्रतिष्ठा ॥ तद
प्येषः श्लोको भवति ॥ ४ ॥ यतो वाचो निवर्तंते ॥ अप्राप्य मनसा सह ॥ आनंदं ब्र
ह्मणो विद्वान् ॥ न बिभेति कदाचनेति ॥ तस्यैष एव शारीर आत्मा ॥ यः पूर्वस्य ॥

85

॥ ७॥

तस्माद्वा एतस्मान्मनोमयात्॥ अन्योंतर आत्मा विज्ञानमयः॥ तेनैष पूर्णः॥
स वा एष पुरुषविध एव॥ तस्य पुरुषविधतां॥ अन्वयं पुरुषविधः॥ तस्य श्र-
द्धैव शिरः॥ ऋतं दक्षिणः पक्षः॥ सत्यमुत्तरः पक्षः॥ योग आत्मा॥ महः पुच्छं प्रति-
ष्ठा॥ तदप्येष श्लोको भवति॥ ५॥ विज्ञानं यज्ञं तनुते॥ कर्माणि तनुतेपि च॥
विज्ञानं देवाः सर्वे॥ ब्रह्म ज्येष्ठमुपासते॥ विज्ञानं ब्रह्म चेद्वेद॥ तस्माच्चेन्न प्र-
माद्यति॥ शरीरे पाप्मनो हित्वा॥ सर्वान्कामान्समश्नुत इति॥ तस्यैष एव शा-
रीर आत्मा॥ यः पूर्वस्य॥ तस्माद्वा एतस्माद्विज्ञानमयात्॥ अन्योंतर आत्मा-
नंदमयः॥ तेनैष पूर्णः॥ स वा एष पुरुषविध एव॥ तस्य पुरुषविधतां॥ अ-
न्वयं पुरुषविधः॥ तस्य प्रियमेव शिरः॥ मोदो दक्षिणः पक्षः॥ प्रमोद उत्तरः प-

॥ रु ६॥
॥ ७॥

क्षः॥ आनंद आत्मा॥ ब्रह्म पुच्छं प्रतिष्ठा॥ तदप्येषः श्लोको भवति॥ ६॥ असन्ने
व स भवति॥ असद्ब्रह्मेति वेद चेत्॥ अस्ति ब्रह्मेति चेद्वेद॥ संतमेनं ततो विदुरि
ति॥ तस्यैष एव शारीर आत्मा॥ यः पूर्वस्य॥ अथातोनुप्रश्नाः॥ उताविद्वानमुं
लोकं प्रेत्य॥ कश्चन गच्छती ३॥ आहो विद्वानमुं लोकं प्रेत्य॥ कश्चित्समश्नुता ३ उ॥
सोऽकामयत॥ बहु स्यां प्रजायेयेति॥ स तपोऽतप्यत॥ स तपस्तप्त्वा॥ इदं स
र्वमसृजत॥ यदिदं किंच॥ तत्सृष्ट्वा॥ तदेवानुप्राविशत्॥ तदनुप्रविश्य॥ सच्च
त्यच्चाभवत्॥ निरुक्तं चानिरुक्तं च॥ निलयनं चानिलयनं च॥ विज्ञानं चावि
ज्ञानं च॥ सत्यं चानृतं च सत्यमभवत्॥ यदिदं किंच॥ तत्सत्यमित्याचक्षते॥
तदप्येषः श्लोको भवति॥ ७॥ असद्वा इदमग्र आसीत्॥ ततो वै सदजायत॥

तदात्मानं स्वयमकुरुत॥तस्मात्तत्सुकृतमुच्यत इति॥यद्वै तत्सुकृतं॥रसो
वै सः॥रसं ह्येवायं लब्ध्वानंदी भवति॥को ह्येवान्यात्कः प्राण्यात्॥यदेष आ
काश आनंदो न स्यात्॥एष ह्येवानंदयाति॥यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ
निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते॥अथ सोऽभयं गतो भवति॥यदा ह्येवैष
एतस्मिन्नुदरमंतरं कुरुते॥अथ तस्य भयं भवति॥तत्त्वेव भयं विदुषो म
न्वानस्य॥तदप्येषः श्लोको भवति॥७॥भीषास्माद्वातः पवते॥भीषोदेति सू
र्यः॥भीषास्मादग्निश्चेंद्रश्च॥मृत्युर्धावति पंचम इति॥सैषानंदस्य मीमां
सा भवति॥युवा स्यात्साधुयुवाऽध्यायकः॥आशिष्ठो दृढिष्ठो बलिष्ठः॥तस्ये
यं पृथिवी सर्वा वित्तस्य पूर्णा स्यात्॥स एको मानुष आनंदः॥ते ये शतं मानु

षां आनंदाः॥ सएको मनुष्यगंधर्वाणामानंदः॥ श्रोत्रियस्यचाकामहतस्य॥ ते
येशतंमनुष्यगंधर्वाणामानंदाः॥ सएको देवगंधर्वाणामानंदः॥ श्रोत्रिय
स्यचाकामहतस्य॥ तेयेशतं देवगंधर्वाणामानंदाः॥ सएकः पितॄणांचिरलो
कलोकानामानंदः॥ श्रोत्रियस्यचाकामहतस्य॥ तेयेशतं पितॄणांचिरलो
कलोकानामानंदाः॥ सएक आजान जानांदेवानामानंदः॥ श्रोत्रियस्यचा
कामहतस्य॥ तेयेशतमाजानजानांदेवानामानंदाः॥ सएकः कर्मदेवानांदे
वानामानंदः॥ येकर्मणादेवानपियंति॥ श्रोत्रियस्यचाकामहतस्य॥ तेयेश
तंकर्मदेवानांदेवानामानंदाः॥ सएको देवानामानंदः॥ श्रोत्रियस्यचाकामह
तस्य॥ तेयेशतंदेवानामानंदाः॥ सएक इंद्रस्यानंदः॥ श्रोत्रियस्यचाकामहत

॥९॥

स्य॥ ते ये शतमिंद्रस्यानंदाः॥ स एको बृहस्पतेरानंदः॥ श्रोत्रियस्य चाकामहत
स्य॥ ते ये शतं बृहस्पतेरानंदाः॥ स एकः प्रजापतेरानंदः॥ श्रोत्रियस्य चाकाम
हतस्य॥ ते ये शतं प्रजापतेरानंदाः॥ स एको ब्रह्मण आनंदः॥ श्रोत्रियस्य चाका
महतस्य॥ स यश्चायं पुरुषे॥ यश्चासावादित्ये॥ स एकः॥ स य एवंवित्॥ अस्मा
ल्लोकात्प्रेत्य॥ एतमन्नमयमात्मानमुपसंक्रामति॥ एतं प्राणमयमात्मानमु
पसंक्रामति॥ एतं मनोमयमात्मानमुपसंक्रामति॥ एतं विज्ञानमयमात्मान
मुपसंक्रामति॥ एतमानंदमयमात्मानमुपसंक्रामति॥ तदप्येष श्लोको भ
वति॥ १॥ यतो वाचो निवर्त्तंते॥ अप्राप्य मनसा सह॥ आनंदं ब्रह्मणो विद्वा
न्॥ न बिभेति कुतश्चनेति॥ एतं ह वाव न तपति॥ किमहं साधु नाकरवं॥ कि

॥कृष्ण॥
॥९॥

मह्ं पापमकरवमिति ॥ स य एवं विद्वानेते आत्मानं स्पृणुते ॥ उभे ह्येवैष एते
आत्मानं स्पृणुते ॥ य एवं वेद ॥ इत्युपनिषत् ॥ ९ ॥ ॥ इति तैत्तिरीयोपनिष
दि ब्रह्मवल्ली नाम द्वितीयः प्रपाठकः ॥ ॥ २ ॥ ॥ भृगुर्वै वारुणिः ॥ वरुणं पितर
मुपससार ॥ अधीहि भगवो ब्रह्मेति ॥ तस्मा एतत्प्रोवाच ॥ अन्नं प्राणं चक्षुः
श्रोत्रं मनो वाचमिति ॥ तं होवाच ॥ यतो वा इमानि भूतानि जायंते ॥ येन जा
तानि जीवंति ॥ यत्प्रयंत्यभिसंविशंतीति ॥ तद्विजिज्ञासस्व ॥ तद्ब्रह्मेति ॥ स तपो
तप्यत ॥ स तपस्तप्त्वा ॥ १ ॥ अन्नं ब्रह्मेति व्यजानात् ॥ अन्नाद्ध्येव खल्विमा
नि भूतानि जायंते ॥ अन्नेन जातानि जीवंति ॥ अन्नं प्रयंत्यभिसंविशंतीति ॥
तद्विज्ञाय ॥ पुनरेव वरुणं पितरमुपससार ॥ अधीहि भगवो ब्रह्मेति ॥ तं

होवाच॥ तपसा ब्रह्म विजिज्ञासस्व॥ तपो ब्रह्मेति॥ स तपो तप्यत॥ स तपस्त-
प्त्वा॥ २॥ प्राणो ब्रह्मेति व्यजानात्॥ प्राणाद्ध्येव खल्विमानि भूतानि जायंते॥
प्राणेन जातानि जीवंति॥ प्राणं प्रयंत्यभिसंविशंतीति॥ तद्विज्ञाय॥ पुनरेव
वरुणं पितरमुपससार॥ अधीहि भगवो ब्रह्मेति॥ तं होवाच॥ तपसा
ब्रह्म विजिज्ञासस्व॥ तपो ब्रह्मेति॥ स तपो तप्यत॥ स तपस्तप्त्वा॥ ३॥ म-
नो ब्रह्मेति व्यजानात्॥ मनसो ह्येव खल्विमानि भूतानि जायंते॥ मनसा जा-
तानि जीवंति॥ मनः प्रयंत्यभिसंविशंतीति॥ तद्विज्ञाय॥ पुनरेव वरुणं पि-
तरमुपससार॥ अधीहि भगवो ब्रह्मेति॥ तं होवाच॥ तपसा ब्रह्म विजिज्ञा-
सस्व॥ तपो ब्रह्मेति॥ स तपो तप्यत॥ स तपस्तप्त्वा॥ ४॥ विज्ञानं ब्रह्मेति व्य-

जानात्॥ विज्ञानाद्ध्येव खल्विमानि भूतानि जायंते॥ विज्ञानेन जातानि जी
वंति॥ विज्ञानं प्रयंत्यभिसंविशंतीति॥ तद्विज्ञाय॥ पुनरेव वरुणं पितरमुप
ससार॥ अधीहि भगवो ब्रह्मेति॥ तं होवाच॥ तपसा ब्रह्म विजिज्ञासस्व॥
तपो ब्रह्मेति॥ स तपोतप्यत॥ स तपस्तप्त्वा॥ ५॥ आनंदो ब्रह्मेति व्यजानात्॥
आनंदाद्ध्येव खल्विमानि भूतानि जायंते॥ आनंदेन जातानि जीवंति॥ आनं
दं प्रयंत्यभिसंविशंतीति॥ सैषा भार्गवी वारुणी विद्या॥ परमे व्योमन्प्रतिष्ठि
ता॥ य एवं वेद प्रतितिष्ठति॥ अन्नवानन्नादो भवति॥ महान्भवति प्रजया प
शुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥ ६॥ अन्नं न निंद्यात्॥ तद्व्रतं॥ प्राणो वा अ
न्नं॥ शरीरमन्नादं॥ प्राणे शरीरं प्रतिष्ठितं॥ शरीरे प्राणः प्रतिष्ठितः॥ तदेत

९३

॥पनि॰॥

॥तैत्ति॰॥

॥११॥

दन्नमन्ने प्रतिष्ठितं॥ सय एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति॥ अन्न
वानन्नादो भवति॥ महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥
॥७॥ अन्नं न परिचक्षीत॥ तद्व्रतं॥ आपो वा अन्नं॥ ज्योतिरन्नादं॥ अप्सु ज्यो
तिः प्रतिष्ठितं॥ ज्योतिष्यापः प्रतिष्ठिताः॥ तदेतदन्नमन्ने प्रतिष्ठितं॥ सय
एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति॥ अन्नवानन्नादो भवति॥ महा

॥कृष्ण॥

॥११॥

न्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥८॥ अन्नं बहु कुर्वी
त॥ तद्व्रतं॥ पृथिवी वा अन्नं॥ आकाशोन्नादः॥ पृथिव्यामाकाशः प्रतिष्ठितः॥
आकाशे पृथिवी प्रतिष्ठिता॥ तदेतदन्नमन्ने प्रतिष्ठितं॥ सय एतदन्नम
न्ने प्रतिष्ठितं वेद प्रतितिष्ठति॥ अन्नवानन्नादो भवति॥ महान्भवति प्रज

यापशुभिर्ब्रह्मवर्चसेन॥ महान्कीर्त्या॥९॥ न कंचन वसतौ प्रत्याचक्षीत॥ तद्व्र
तं॥ तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात्॥ आराध्यस्मा अन्नमित्याच
क्षते॥ एतद्वै मुखतोन्नꣳ राद्धं॥ मुखतोस्मा अन्नꣳ राध्यते॥ एतद्वै मध्यतो
न्नꣳ राद्धं॥ मध्यतोस्मा अन्नꣳ राध्यते॥ एतद्वा अंततोन्नꣳ राद्धं॥ अंततोस्मा
अन्नꣳ राध्यते॥ य एवं वेद॥ क्षेम इति वाचि॥ योगक्षेम इति प्राणापानयोः॥
कर्मेति हस्तयोः॥ गतिरिति पादयोः॥ विमुक्तिरिति पायौ॥ इति मानुषीः समा
ज्ञाः॥ अथ दैवीः॥ तृप्तिरिति वृष्टौ॥ बलमिति विद्युति॥ यश इति पशुषु॥ ज्यो
तिरिति नक्षत्रेषु॥ प्रजातिरमृतमानंद इत्युपस्थे॥ सर्वमित्याकाशे॥ तत्प्रति
ष्ठेत्युपासीत॥ प्रतिष्ठावान्भवति॥ तन्मह इत्युपासीत॥ महान्भवति॥ तन्मन

इत्युपासीत ॥ मानवान्भवति ॥ तन्नम इत्युपासीत ॥ नम्यंतेऽस्मै कामाः ॥ तद्ब्र
ह्मेत्युपासीत ॥ ब्रह्मवान्भवति ॥ तद्ब्रह्मणः परिमर इत्युपासीत ॥ पर्येणं म्रि
यंते द्विषंतः सपत्नाः ॥ परि येऽप्रिया भ्रातृव्याः ॥ स यश्चायं पुरुषे ॥ यश्चासा
वादित्ये ॥ स एकः ॥ स य एवंवित् ॥ अस्माल्लोकात्प्रेत्य ॥ एतमन्नमयमात्मा
नमुपसंक्रम्य ॥ एतं प्राणमयमात्मानमुपसंक्रम्य ॥ एतं मनोमयमात्मा
नमुपसंक्रम्य ॥ एतं विज्ञानमयमात्मानमुपसंक्रम्य ॥ एतमानंदमयमा
त्मानमुपसंक्रम्य ॥ इमांल्लोकान्कामान्नी कामरूप्यनुसंचरन् ॥ एतत्साम गा
यन्नास्ते ॥ हा ३ वु हा ३ वु हा ३ वु ॥ अहमन्नमहमन्नमहमन्नं ॥ अहम
न्नादो ३ ऽहमन्नादो ३ ऽहमन्नादः ॥ अहं श्लोककृदहं श्लोककृदहं श्लोककृत् ॥

अहमस्मि प्रथमजा ऋता ३ स्य ॥ पूर्वं देवेभ्यो अमृतस्य ना ३ भायि ॥ यो मा ददा
ति स इदेवमा ३ वाः ॥ अहमन्नमन्नमदन्तमा ३ द्मि ॥ अहं विश्वं भुवनमभ्यभ
वां ॥ सुवर्णज्योतीः ॥ य एवं वेद ॥ इत्युपनिषत् ॥ १० ॥ ॥ इति श्रीमद्यजुर्वेदे तै
त्तिरीयशाखायां तैत्तिरीयोपनिषदि भृगुवल्ली नाम तृतीयः प्रपाठकः ॥ ॥
॥ ३ ॥ ॥ समाप्तश्चेयं तैत्तिरीयोपनिषत् ॥ ॥ अथायं शांतिपाठः ॥ ॥ सह ना
ववतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु ॥ मा वि
द्विषावहै ॥ ॥ ॐ शांतिः शांतिः शांतिः ॥ ॥ इति वल्लीत्रयं यजुर्वेदीयं ॥ ॥

॥तै॰क्षि॰॥

॥१३॥

॥प॰नि॰॥

॥इति तैत्तिरीयोपनिषत्समाप्ता॥

॥कृष्ण॥

॥१३॥

४८९३

१३१

१

4864

नं ९६

॥ अथ चित्त्युपनिषत्प्रारंभः ॥ ॥

Acc. No. 4864
चित्तिउपनिषत्
folio - 11.

॥उप॥

॥चित्ति॥

॥१॥

श्रीगणेशाय नमः॥ ॥हरिः ॐ॥ ॥तच्छंयोरावृणीमहे॥ गातुंयज्ञा
य॥ गातुंयज्ञपतये॥ दैवीस्वस्तिरस्तु नः॥ स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगा
तु भेषजं॥ शंनो अस्तु द्विपदे॥ शं चतुष्पदे॥ ॥ॐ शांतिः शांतिः शांतिः॥
॥ ॥ॐ चित्तिः स्रुक्॥ चित्तमाज्यं॥ वाग्वेदिः॥ आधीतं बर्हिः॥ केतो अ
ग्निः॥ विज्ञातमग्निः॥ वाक्पतिर्होता॥ मन उपवक्ता॥ प्राणो हविः॥ सामा
ध्वर्युः॥ वाचस्पते विधे नामन्॥ विधेम ते नाम॥ विधेस्त्वमस्माकं नाम॥ वा
चस्पतिः सोमं पिबतु॥ आस्मासु नृम्णं धात्स्वाहा॥१॥ अध्वर्युः पंचच॥१॥
पृथिवी होता॥ द्यौरध्वर्युः॥ रुद्रोऽग्नीत्॥ बृहस्पतिरुपवक्ता॥ वाचस्पते वा
चो वीर्येण॥ संभृततमेनायक्ष्यसे॥ यजमानाय वार्यं॥ आसुवस्करस्मै॥

॥राम॥

॥१॥

वाचस्पतिः सोमं पिबति॥जजनदिंद्रमिंद्रियाय स्वाहा॥२॥पृथिवी होता द
यौ॥२॥अग्निर्होता॥अश्विनाध्वर्यू॥त्वष्टाग्नीत्॥मित्र उपवक्ता॥सोमः सो
मस्य पुरोगाः॥शुक्रः शुक्रस्य पुरोगाः॥श्रातास्त इंद्र सोमाः॥वातापेर्हवन
श्रुतः स्वाहा॥३॥अग्निर्होतिष्टो॥३॥सूर्यं ते चक्षुः॥वातं प्राणः॥द्यां पृष्ठं॥
अंतरिक्षमात्मा॥अंगैर्यज्ञं॥पृथिवीं शरीरैः॥वाचस्पतेच्छिद्रया वाचा॥
अच्छिद्रया जुह्वा॥दिवि देवावृधं होत्रामेरयस्व स्वाहा॥४॥सूर्यं ते नव॥४॥
महाहविर्होता॥सत्यहविरध्वर्युः॥अच्युतपाजा अग्नीत्॥अच्युतमना उप
वक्ता॥अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ॥अयास्य उद्गाता॥वाच
स्पते हृद्विधे नामन्॥विधेम ते नाम॥विधेस्त्वमस्माकं नाम॥वाचस्पतिः सोम

या२

॥ चि० ॥
॥ २ ॥

॥ उप० ॥

मपात्॥ मा देव्यस्तंतुश्छेदि मा मनुष्यः॥ नमो दिवे॥ नमः पृथिव्यै स्वाहा॥ ५॥ अ
पात्री॥ णि च॥ ५॥ वाघ्घोता॥ दीक्षापत्नी॥ वातोध्वर्युः॥ आपोभिगरः॥ मनोह
विः॥ तपसि जुहोमि॥ भूर्भुवः सुवः॥ ब्रह्म स्वयंभु॥ ब्रह्मणे स्वयंभुवे स्वाहा॥
॥ ६॥ वाघ्घोतानव॥ ६॥ ब्राह्मण एकहोता॥ स यज्ञः॥ स मे ददातु प्रजां पशून् पुष्टिं
यशः॥ यज्ञश्च मे भूयात्॥ अग्निर्द्विहोता॥ स भर्ता॥ स मे ददातु प्रजां पशून् पुष्टिं
यशः॥ भर्ता च मे भूयात्॥ पृथिवी त्रिहोता॥ स प्रतिष्ठा॥ स मे ददातु प्रजां पशून् पु
ष्टिं यशः॥ प्रतिष्ठा च मे भूयात्॥ अंतरिक्षं चतुर्होता॥ स विष्ठाः॥ स मे ददातु प्र
जां पशून् पुष्टिं यशः॥ विष्ठाश्च मे भूयात्॥ वायुः पंचहोता॥ स प्राणः॥ स मे ददा
तु प्रजां पशून् पुष्टिं यशः॥ प्राणश्च मे भूयात्॥ चंद्रमा षड्ढोता॥ स ऋतून् कल्पया

॥ राम ॥
॥ २ ॥

ति॥ समे ददातु प्रजां पशून्पुष्टिं यशः॥ ऋतवश्च मे कल्पंतां॥ अन्नं॰ स होता॥
स प्राणस्य प्राणः॥ समे ददातु प्रजां पशून्पुष्टिं यशः॥ प्राणस्य च मे प्राणो भूया
त्॥ घोरः स होता॥ सोऽनाधृष्यः॥ समे ददातु प्रजां पशून्पुष्टिं यशः॥ अनाधृष्य
श्च भूयासं॥ आदित्यो नवहोता॥ स तेजस्वी॥ समे ददातु प्रजां पशून्पुष्टिं य
शः॥ तेजस्वी चाहं भूयासं॥ प्रजापतिर्दशहोता॥ स इदं॰ सर्वं॥ समे ददातु प्रजां
पशून्पुष्टिं यशः॥ सर्वं च मे भूयात्॥७॥ प्रतिष्ठा प्राणश्च मे भूयादनाधृष्यः
सर्वं च मे भूयात्॥७॥ अग्निर्यजुर्भिः॥ सविता स्तोमैः॥ इंद्र उक्थामदैः॥ मि
त्रावरुणावाशिषा॥ अंगिरसो धिष्णियैरग्निभिः॥ मरुतः सदोहविर्धानाभ्यां॥
आपः प्रोक्षणीभिः॥ ओषधयो बर्हिषा॥ अदितिर्वेद्या॥ सोमो दीक्षया॥ त्वष्टे

॥उप॥

॥स्वि॰॥

॥३॥

धमेन॥विष्णुर्यज्ञेन॥वसवआज्येन॥आदित्यादक्षिणाभिः॥विश्वेदेवाऊर्जा॥
पूषास्वगाकारेण॥बृहस्पतिः पुरोधया॥प्रजापतिरुद्गीथेन॥अंतरिक्षंपवि
त्रेण॥वायुःपात्रैः॥अहं श्रद्धया॥८॥दीक्षयापात्रेरेकेंच॥८॥सेनेंद्रस्यधे
ना बृहस्पतेः॥पथ्यापूष्णः॥वाग्वायोः॥दीक्षासोमस्य॥पृथिव्यग्नेः॥वसूनांगा
यत्री॥रुद्राणांत्रिष्टुप्॥आदित्यानांजगती॥विष्णोरनुष्टुप्॥वरुणस्यविरा

॥एमा॥

ट्॥यज्ञस्यपंक्तिः॥प्रजापतेरनुमतिः॥मित्रस्यश्रद्धा॥सवितुःप्रसूतिः॥सू

॥३॥

र्यस्यमरीचिः॥चंद्रमसोरोहिणी॥ऋषीणामरुंधती॥पर्जन्यस्यविद्युत्॥च
तस्रोदिशः॥चतस्रोवांतरदिशः॥अहश्चरात्रिश्च॥कृषिश्चवृष्टिश्च॥त्वि
षिश्चापचितिश्च॥आपश्चौषधयश्च॥ऊर्क्चसूनृताचदेवानांपत्नयः॥९॥

अनुष्टुप्छन्दाः षट्त्वं ॥९॥ देवस्यत्वा सवितुः प्रसवे ॥ अश्विनोर्बाहुभ्यां ॥ पूष्णो
हस्ताभ्यां प्रतिगृह्णामि ॥ राजात्वा वरुणो नयतु देवि दक्षिणेग्नये हिरण्यं ॥ तेना
मृतत्वमश्यां ॥ वयो दात्रे ॥ मयो मह्यमस्तु ॥ प्रतिग्रहीत्रे ॥ क इदं कस्मा अदात् ॥
कामः कामाय ॥ कामो दाता ॥ कामः प्रतिग्रहीता ॥ कामं समुद्रमाविश ॥ कामे
न्त्वा प्रतिगृह्णामि ॥ कामैतत्ते ॥ एषा ते काम दक्षिणा ॥ उत्तानस्त्वांगिरसः प्रतिगृ
ह्णातु ॥ सोमाय वासः ॥ रुद्राय गां ॥ वरुणायाश्वं ॥ प्रजापतये पुरुषं ॥ मनवे त
ल्पं ॥ त्वष्ट्रे अजं ॥ पूष्णेऽविं ॥ निरृत्या अश्वतरगर्दभौ ॥ हिमवतो हस्तिनं ॥ गंधर्वा
प्सराभ्यः स्रगलंकरणे ॥ विश्वेभ्यो देवेभ्यो धान्यं ॥ वाचेन्नं ॥ ब्रह्मणे ओदनं ॥
समुद्रायापः ॥ उत्तानायांगिरसायानः ॥ वैश्वानराय रथं ॥ वैश्वानरः प्रत्नथा

॥ उप ॥

॥ स्वि ॥
॥ ४ ॥

नाकमारुहत्॥ दिवःपृष्टं भंदमानः सुमन्मभिः॥ सपूर्ववज्जनयज्जंतवे धनं॥
समानमज्मापरियाति जागृविः॥ राजात्वावरुणोनयतु देवि दक्षिणे वैश्वानरा
यरथं॥ तेनामृतत्वमश्यां॥ वयोदात्रे॥ मयोमह्यमस्तु॥ प्रतिग्रहीत्रे॥ कइदंक
स्माअदात्॥ कामः कामाय॥ कामोदाता॥ कामः प्रतिग्रहीता॥ कामंसमुद्रमावि
श॥ कामेनत्वा प्रतिगृह्णामि॥ कामैतत्ते॥ एषातेकामदक्षिणा॥ उत्तानस्त्वा गृ
ह्णातु॥ १०॥ दातापुरुषमापः प्रतिग्रहीत्रेनवंचा॥ १०॥ सुवर्णं घर्मं
परिसः प्रतिगृह्णातु॥ १०॥ दातापुरुषमापः प्रतिग्रहीत्रेनवंचा॥ १०॥ सुवर्णं घर्मं
पारिवेदवेनं॥ इंद्रस्यात्मानंदशधाचरंतं॥ अंतः समुद्रे मनसाचरंतं॥ ब्रह्मा
न्वविंदद्दशहोतारमर्णे॥ अंतः प्रविष्टः शास्ताजनानां॥ एकः सन्बहुधावि
चारः॥ शतंशुक्राणियत्रैकंभवंति॥ सर्वेवेदायत्रैकंभवंति॥ सर्वेहोतारो

॥ राम ॥
॥ ४ ॥

यत्रैकं भवंति॥समानसीन आत्मा जनानां॥अंतः प्रविष्टः शास्ता जनानां स
र्वात्मा॥सर्वाः प्रजा यत्रैकं भवंति॥चतुर्होतारो यत्र संपदं गच्छंति देवैः॥समानं
सीन आत्मा जनानां॥ब्रह्मेंद्रमग्निं जगतः प्रतिष्ठां॥दिव आत्मानं सवितारं
बृहस्पतिं॥चतुर्होतारं प्रदिशोनुकॢप्तं॥वाचो वीर्यं तपसान्वविंदत्॥अंतः
प्रविष्टं कर्तारमेतं॥त्वष्टारं रूपाणि विकुर्वंतं विपश्चिं॥अमृतस्य प्राणं
यज्ञमेतं॥चतुर्होतॄणामात्मानं कवयो निचिक्युः॥अंतः प्रविष्टं कर्तारमेतं॥
देवानां बंधु निहितं गुहासु॥अमृतेन कॢप्तं यज्ञमेतं॥चतुर्होतॄणामात्मा
नं कवयो निचिक्युः॥शतं नियुतः परिवेद विश्वा विश्ववारः॥विश्वमिदं वृणा
ति॥इंद्रस्यात्मा निहितः पंचहोता॥अमृतं देवानामायुः प्रजानां॥इंद्रं रा

107

॥ स्वि॰ ॥ ॥ उप॰ ॥

॥ ५ ॥

जान्ँ सवितारमेतं ॥ वायोरात्मानं कवयो निचिक्युः ॥ रश्मिं्ँ रश्मीनां मध्ये
तपंतं ॥ ऋतस्य पदे कवयो निपांति ॥ य आंडकोशे भुवनं बिभर्ति ॥ अनिर्भि
न्नः सन्नथ लोकान्विचष्टे ॥ यस्यांडकोशं्ँ शुष्ममाहुः प्राणमुल्बं ॥ तेन क्लृप्ता
मृतेनाहमस्मि ॥ सुवर्णकोशं्ँ रजसा परिवृतं ॥ देवानां वसुधानीं विराजं ॥ ४
अमृतस्य पूर्णां तामु कलां विचक्षते ॥ पादं्ँ षड्ढोतुर्न किलाविवित्से ॥ ये
नर्तवः पंचधोत क्लृप्ताः ॥ उत वा षड्ढा मनसोत क्लृप्ताः ॥ तं्ँ षड्ढोतारमृतु
भिः कल्पमानं ॥ ऋतस्य पदे कवयो निपांति ॥ अंतः प्रविष्टं कर्तारमेतं ॥ अंत
श्चंद्रमसि मनसा चरंतं ॥ सहैव संतं न विजानंति देवाः ॥ इंद्रस्यात्मानं्ँ शत
धा चरंतं ॥ इंद्रो राजा जगतो य ईशे ॥ सप्तहोता सप्तधा विक्लृप्तः ॥ परेण तंतु

॥ राम ॥

॥ ५ ॥

परिषिच्यमानं॥अंतरा रोहित्ये मनसा चरंतं॥देवानां हृदयं ब्रह्मान्वविंद
त्॥ब्रह्मैतद्ब्रह्मण उज्जभार॥अर्कं श्च्योतंतं सरिरस्य मध्ये॥आ यस्मिं
त्सप्त पेरवः॥मेहंति बकुलां श्रियं॥बह्वश्वामिंद्र गोमती॥अच्युतां बकुलां
श्रियं॥स हरिर्वसुवित्तमः॥पेरुरिंद्राय पिन्वते॥बह्वश्वामिंद्र गोमती॥अ
च्युतां बकुलां श्रियं॥मह्यमिंद्रो नियच्छतु॥शतं शता अस्य युक्ता हरीणां॥
अर्वाङा यातु वसुभी रश्मिरिंद्रः॥प्रमंहमाणो बकुलां श्रियं॥रश्मिरिंद्रः
सविता मे नियच्छतु॥घृतं तेजो मधुमदिंद्रियं॥मय्ययमग्निर्दधातु॥हरिः
पतंगः पटरी सुपर्णः॥दिविक्षयो नभसा य एति॥स न इंद्रः कामवरं ददातु॥
पंचारं चक्रं परिवर्तते पृथु॥हिरण्यज्योतिः सरिरस्य मध्ये॥अजस्रं ज्योतिर्न

॥ खि॰ ॥ ॥ उप॰ ॥

॥ ६ ॥

२ ह

भसासर्पदिति॥सनइंद्रःकामवरं ददातु॥सप्तयुंजंतिरथमेकचक्रं॥एकोअ
श्वोवहतिसप्तनामा॥त्रिणाभिचक्रमजरमनर्वं॥येनेमाविश्वाभुवनानि
तस्थुः॥भद्रंपश्यंतउपसेदुरग्रे॥तपोदीक्षामृषयःसुवर्विदः॥ततःक्षत्रंबल
मोजश्चजातं॥तदस्मैदेवाअभिसन्नमंतु॥श्वेतंरश्मिंबोभुज्यमानं॥अपां
नेतारंभुवनस्यगोपां॥इंद्रंनिचिक्युःपरमेव्योमन्॥रोहिणीःपिंगलाएक
रूपाः॥क्षरंतीःपिंगलाएकरूपाः॥शतंसहस्राणिप्रयुतानिनाव्यानां॥अ
यंश्वेतोरश्मिः॥परिसर्वमिदंजगत्॥प्रजांपुष्टिंधनानि॥अस्माकंददातु॥
श्वेतोरश्मिःपरिसर्वंबभूव॥सुवन्मह्यंपुष्टिंविश्वरूपान्॥पतंगमक्तमसु
रस्यमायया॥हृदापश्यंतिमनसामनीषिणः॥समुद्रेअंतःकवयोविचक्ष

॥ राम ॥

॥ ६ ॥

ते॥मरीचीनांपदमिच्छंति वेधसः॥ पतंगोवाचंमनसा बिभर्ति॥ तांगंधर्वोऽवि
दद्गर्भे अंतः॥ तांद्योतमानांस्वर्यंमनीषां॥ ऋतस्यपदे कवयोनिपांति॥ ये
ग्राम्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः॥ अग्निस्तांअग्रे
प्रमुमोक्तु देवः॥ प्रजापतिः प्रजया संविदानः॥ वीतं स्तोके स्तोके॥ युवमस्मा
सु नियच्छतं॥ प्रप्रयज्ञपतिं तिर॥ ये ग्राम्याः पशवो विश्वरूपाः॥ विरूपाः संतो
बहुधैकरूपाः॥ तेषांसप्तानामिह रंतिरस्तु॥ रायस्पोषाय सुप्रजास्त्वाय सु
वीर्याय॥ य आरण्याः पशवो विश्वरूपाः॥ विरूपाः संतो बहुधैकरूपाः॥ वायु
ष्टांअग्रे प्रमुमोक्तु देवः॥ प्रजापतिः प्रजया संविदानः॥ इडायैसृप्तं घृतवच्च
राचरं॥ देवाअन्वविंदन्गुहाहितं॥ य आरण्याः पशवो विश्वरूपाः॥ विरूपाः

॥ चि॰ ॥ ॥ ७ ॥ ॥ उप॰ ॥ ॥ राम ॥ ॥ ७ ॥

से२

संतो बहुधैकरूपाः॥ तेषांꣳ सद्मानामिह रंतिरस्तु॥ रायस्पोषाय सुप्रजा
स्त्वाय सुवीर्याय॥ ९॥ ओं आत्मा जननानां विकुर्वंतं विपश्चिं प्रजानां वसुधानीं वि
राजं च रं तं गोमतीमे नियच्छ॥ एकं चक्रं व्योमन्मायया देव एक रूपा अष्टो च॥ १०॥
सहस्रशीर्षा पुरुषः॥ सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वा॥ अत्य
तिष्ठद्दशांगुलं॥ पुरुष एवेदꣳ सर्वं॥ यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानः॥
यदन्नेनातिरोहति॥ एतावानस्य महिमा॥ अतो ज्यायाꣳश्च पूरुषः॥ पादोस्य
विश्वा भूतानि॥ त्रिपादस्यामृतं दिवि॥ त्रिपादूर्ध्व उदैत्पुरुषः॥ पादोस्येहाभ
वत्पुनः॥ ततो विष्वङ्व्यक्रामत्॥ साशनानशने अभि॥ तस्माद्विराडजायत॥
विराजो अधि पूरुषः॥ स जातो अत्यरिच्यत॥ पश्चाद्भूमिमथो पुरः॥ यत्पुरुषेण

अ॰

हविषा॥देवा यज्ञमतन्वत॥वसंतोअस्यासीदाज्यं॥ग्रीष्मइध्मःशरद्धविः॥
सप्तास्यासन्परिधयः॥त्रिःसप्तसमिधःकृताः॥देवा यद्यज्ञंतन्वानाः॥अबध्
न्पुरुषंपशुं॥तंयज्ञंबर्हिषिप्रौक्षन्॥पुरुषंजातमग्रतः॥तेनदेवाअयजंत॥
साध्याऋषयश्चये॥तस्माद्यज्ञात्सर्वहुतः॥संभृतंपृषदाज्यं॥पशूंस्तां
श्चक्रेवायव्यान्॥आरण्यान्ग्राम्याश्चये॥तस्माद्यज्ञात्सर्वहुतः॥ऋचःसामानि
जज्ञिरे॥छंदांसिजज्ञिरेतस्मात्॥यजुस्तस्मादजायत॥तस्मादश्वाअजायं
त॥येकेचोभयादतः॥गावोहजज्ञिरेतस्मात्॥तस्माज्जाताअजावयः॥यत्पु
रुषंव्यदधुः॥कतिधाव्यकल्पयन्॥मुखंकिमस्यकौबाहू॥काऊरूपादावुच्ये
ते॥ब्राह्मणोस्यमुखमासीत्॥बाहूराजन्यःकृतः॥ऊरूतदस्ययद्वैश्यः॥पद्भ्यां

N3

॥ श्वि॰ ॥ ॥ उप॰ ॥

॥ ८ ॥

शूद्रो अजायत ॥ चंद्रमा मनसो जातः ॥ चक्षोः सूर्यो अजायत ॥ मुखादिंद्र
श्चाग्निश्च ॥ प्राणाद्वायुरजायत ॥ नाभ्या आसीदंतरिक्षं ॥ शीर्ष्णो द्यौः समवर्त
त ॥ पद्भ्यां भूमिर्दिशः श्रोत्रात् ॥ तथा लोकाँ अकल्पयन् ॥ वेदाहमेतं पुरुषं
महांतं ॥ आदित्यवर्णं तमसस्तु पारे ॥ सर्वाणि रूपाणि विचित्य धीरः ॥ नामा
नि कृत्वाभिवदन्यदास्ते ॥ धाता पुरस्ताद्यमुदाजहार ॥ शक्रः प्रविद्वान्प्रदिश
श्चतस्रः ॥ तमेवं विद्वानमृत इह भवति ॥ नान्यः पंथा अयनाय विद्यते ॥ यज्ञे
न यज्ञमयजंत देवाः ॥ तानि धर्माणि प्रथमान्यासन् ॥ ते ह नाकं महिमानः सचं
त ॥ यत्र पूर्वे साध्याः संति देवाः ॥ १ ॥ पुरुषः पुरोगतो जायत ह्येतो कल्पयन्ता
संदेवं ॥ १२ ॥ अद्भ्यः संभृतः पृथिव्यै रसाच्च ॥ विश्वकर्मणः समवर्तताधि ॥

॥ राम ॥

॥ ८ ॥

तस्यत्वष्टाविदधद्रूपमेति॥तत्पुरुषस्यविश्वमाजानमग्रे॥वेदाहमेतंपुरुषंम
हांतं॥आदित्यवर्णंतमसःपरस्तात्॥तमेवंविद्वानमृतइहभवति॥नान्यःपंथा
विद्यतेयनाय॥प्रजापतिश्चरतिगर्भेअंतः॥अजायमानोबहुधाविजायते॥त
स्यधीराःपरिजानंतियोनिं॥मरीचीनांपदमिच्छंतिवेधसः॥योदेवेभ्यआतप
ति॥योदेवानांपुरोहितः॥पूर्वोयोदेवेभ्योजातः॥नमोरुचायब्राह्मये॥रुचंब्रा
ह्मंजनयंतः॥देवाअग्रेतदब्रुवन्॥यस्त्वैवंब्राह्मणोविद्यात्॥तस्यदेवाअसन्व
शे॥ह्रीश्चतेलक्ष्मीश्चपत्न्यौ॥अहोरात्रेपार्श्वे॥नक्षत्राणिरूपं॥अश्विनौव्या
त्तं॥इष्टंमनीषाण॥अमुंमनीषाण॥सर्वंमनीषाण॥१३॥जायतेवरोसमत्व॥
॥१३॥सततंसन्म्रियमाणोबिभर्ति॥एकोदेवोबहुधानिविष्टः॥यदाभारंतंद्रयते—

॥चि॥ ॥उप॥

॥५॥ सभर्त्तुं॥ निधाय भारं पुनरस्तमेति॥ तमेव मृत्युममृतं तमाहुः॥ तं भर्त्तारं तमु गोप्तारमाहुः॥ सभृतो भ्रियमाणो बिभर्त्ति॥ य एनं वेद सत्येन भर्त्तुं॥ सद्यो जात उत जहात्येषः॥ उतो जरन्तं न जहात्येकं॥ उतो बहूनेकमहर्जहार॥ अतंद्रो देवः सदमेव प्रार्थः॥ यस्तद्वेद यत आबभूव॥ संधां च यां संदधे ब्रह्मणैषः॥ रमते तस्मिन्नुत जीर्णे शयाने॥ नैनं जहात्यहःसु पूर्व्येषु॥ त्वामापो अनु सर्वाश्चरंति जानतीः॥ वत्सं पयसा पुहानाः॥ त्वमग्निं हव्यवाहं समिंधे॥ त्वं धाता विश्वतः प्रजानां॥ त्वं यज्ञस्त्वमु वासि सोमः॥ तव देवा हवमायंति सर्वे॥ त्वमेकोसि बहूननुप्रविष्टः॥ नमस्ते अस्तु सुहवो म एधि॥ नमो वामस्तु शृणुतं हवं मे॥ प्राणापानावजिरं संचरंतौ॥ ह्वयामि वां ब्रह्मणा तूर्तमेतं॥ यो मां द्वेष्टि तं जहितं युवाना॥ प्राणापानौ ॥राम॥ ॥१॥

श्वा ४

116

संविदानो जहितं ॥ अमुष्यासुनामासंगसाथं ॥ तं मे देवा ब्रह्मणा संविदानो ॥ बध्वा
यद्दत्तं तमहं हनामि ॥ असज्जजान सत आबभूव ॥ यं यं जजान स उगोपेभ्यः ॥
यदाभारं तं द्दयते सभर्तुं ॥ पुरास्य भारं पुनरस्तमिति ॥ तद्दैत्वं श्राणो अंसवः ॥ महान्सो
गःप्रजापते ॥ भुजः करिष्यमाणः ॥ यद्देवान्प्राणयो नव ॥ १४ ॥ एकं प्रज्ञानांगसाथं
नव ॥ १४ ॥ हरिं हरंतमनुयंति देवाः ॥ विश्वस्येशानं रुषभं मतीनां ॥ ब्रह्मसरूप
मनु मेदमागात् ॥ अयनं मा विवधीर्विक्रमस्व ॥ माच्छिदो मृत्यो मा वधीः ॥ मा मे बलं
विरहो मा प्रमोषीः ॥ प्रजां मा मे रीरिष आयुरुग्र ॥ नृचक्षसं त्वा हविषा विधेम ॥
सद्यश्चकमानाय ॥ प्रवेपानाय मृत्यवे ॥ प्रास्मा आशा अशृण्वन् ॥ कामेनाजनयन्
पुनः ॥ कामेन मे काम आगात् ॥ हृदयाद्धृदयं मृत्योः ॥ यदमीषामदः प्रियं ॥ तदैतु

पमाममभि॥ परं मृत्यो अनुपरेहि पंथां॥ यस्ते स्व इतरो देवयानात्॥ चक्षुष्मते शृ
एवते ते ब्रवीमि॥ मा नः प्रजां रीरिषो मोत वीरान्॥ प्र पूर्व्यं मनसा वंदमानः॥ नाधमा
नो वृषभं चर्षणीनां॥ यः प्रजानामेकराण्मानुषीणां॥ मृत्युं यजे प्रथमजामृतस्य॥
॥ १५॥ मृत्यवे नीराङ्श्रुतास्वि॥ १५॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य॥ विश्व
माभासि रोचनं॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय
त्वा भ्राजस्वते॥ १६॥ आप्यायस्व मदिंतम सोम विश्वाभिरूतिभिः॥ भवा नः सुप्रथ
स्तमः॥ १७॥ ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छंतीमुषसं मर्त्यासः॥ अस्माभिरू नु प्र
तिचक्ष्याभूदो ते यंति ये अपरीषु पश्यान्॥ १८॥ ज्योतिष्मतीं त्वा सादयामि॥ ज्योति
ष्कृतं त्वा सादयामि॥ ज्योतिर्विदं त्वा सादयामि॥ भास्वतीं त्वा सादयामि॥ ज्वलंतीं त्वा सा

॥ राम ॥
॥ १० ॥

साञ्

दयामि॥ मल्मलाभवंतीं त्वा सादयामि॥ दीप्यमानां त्वा सादयामि॥ रोचमानां त्वा सा
दयामि॥ अजस्रां त्वा सादयामि॥ बृहज्ज्योतिषं त्वा सादयामि॥ बोधयंतीं त्वा साद
यामि॥ जाग्रतीं त्वा सादयामि॥ १९॥ प्रयायै स्वाहा यासाय स्वाहा वियासाय स्वाहा
संयासाय स्वाहोद्यासाय स्वाहावयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै
स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा॥ २०॥ चित्तं संतानेन भवं य
क्ना रुद्रं तनिम्ना पशुपतिं स्थूलहृदयेनाग्निं हृदयेन रुद्रं लोहितेन शर्वं म
तस्नाभ्यां महादेवमंतःपार्श्वेनौषिष्ठहनं शिंगिनीकोश्याभ्यां॥ २१॥ चित्तमेकं॥
॥२१॥ चित्तिः पृथिव्यग्निः सूर्यस्तच्चक्षुर्महाहविर्होता वाध्योता अप्सरस एकहोताग्नि
र्यजुर्भिः सेनेंद्रस्य देवस्य सुवर्णघर्मः सहस्रशीर्ष्णा भर्ता हरितस्तरणिराप्याय

119

॥ ११ ॥ स्वेयुक्ते ये ज्योतिष्मती अयासाय स्वित्तमे क्रों ँ शांतिः ॥ ॥ चित्तिर ग्निर्यजुर्भिरितः
प्रविष्टः प्रजापतिः प्रजयासंविदानो स्तस्य धीरस्य ज्योतिष्मंतं त्रिपंचा ज्ञात् ॥ ॥ ७ ॥
तच्छं योरावृणीमहे ॥ गातुं यज्ञाय ॥ गातुं यज्ञपतये ॥ देवीः स्वस्तिरस्तु नः ॥ स्वस्ति
र्मानुषेभ्यः ॥ ऊर्ध्वं जिगातु भेषजं ॥ शं नो अस्तु द्विपदे ॥ शं चतुष्पदे ॥ ॥ ॐ शांतिः
शांतिः शांतिः ॥ ॥ इति चित्युपनिषत्समाप्ता ॥ ॥ ७ ॥ ॥ यजुरारण्यके तृतीय
प्रपाठके एकोनविंशानुवाकेय मुपनिषत् ॥ ॥ ७ ॥ ॥ श्रीवेदपुरुषाय नमः ॥ ॥
चिति: शीक्षाब्रह्मविदा तुर्या भृगुरुदाहृता ॥ पंच मं पंच भस्मपारे च त
त्त्व निर्णयबोधकाः ॥ १ ॥

॥ रम ॥
॥ ११ ॥

१३२

नंबर १६

॥अथ छांदोग्योपनिषत्प्रारंभः॥

Acc. No. 4865.
छान्दोग्योपनिषत्.
folio - 65.

॥छांदो॥

॥१॥

॥श्रीगणेशायनमः॥ ॥ॐनमोब्रह्मादिभ्योब्रह्मविद्यासंप्रदायकर्तृभ्योनमः॥

॥ ॥हरिःॐ॥ ॥ओमित्येतदक्षरमुद्गीथमुपासीतोमितिह्युद्गायतितस्यो

पव्याख्यानमेषांभूतानांपृथिवीरसःपृथिव्याआपोरसोऽपामोषधयोरस

ओषधीनांपुरुषोरसःपुरुषस्यवाग्रसोवाचऋग्रसऋचःसामरसःसाम्न

उद्गीथोरसःसएषरसानांरसतमःपरमःपरार्ध्योष्टमोयदुद्गीथःकत

माकतमर्क्कतमत्कतमत्सामकतमःकतमउद्गीथइतिविमृष्टंभवतिवा

गेवर्क्प्राणःसामोमित्येतदक्षरमुद्गीथस्तद्वाएतन्मिथुनंयद्वाक्चप्राणश्च

र्क्सामचतदेतन्मिथुनमोमित्येतस्मिन्नक्षरेसंसृज्यतेयदावैमिथुनौ

समागच्छतआपयतोवैतावन्योन्यस्यकाममापयिताहवैकामानांभवति

॥ग्रंथप॥

॥हरिः॥

॥१॥

य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजा

नात्योमित्येव तदाहैषा उ एव समृद्धिर्यदनुज्ञा समर्द्धयिता ह वै कामानां भ

वति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते तेनेयं त्रयी विद्या वर्त्तते ओमि

त्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना

रसेन तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या चाविद्या च

यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेत

स्यैवाक्षरस्योपव्याख्यानं भवति ॥१॥ देवासुरा ह वै यत्र संयेतिर उभये प्रा

जापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ते ह नासिक्यं प्रा

णमुद्गीथमुपासांचक्रिरे तं हासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्र

॥छांदो॥

॥२॥

ति सुरभि च दुर्गंधि च पाप्मना ह्येष विद्धोथ ह वाचमुद्गीथमुपासांचक्रिरे तांऽहा
सुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा
थ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं प
श्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धमथ ह श्रोत्रमुद्गीथमुपासां
चक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयंऽशृणोति श्रवणीयं चाश्रव
णीयं च पाप्मना ह्येतद्विद्धमथ ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना
विविधुस्तस्मात्तेनोभयंऽसंकल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्म
ना ह्येतद्विद्धमथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तंऽहासु
रा ऋत्वा विदध्वंसुर्यथाऽश्मानमाखणमृत्वा विध्वंसेतैवं यथाश्मानमाखण

॥ग्योप॥

॥कृष्ण॥

॥२॥

णमृत्वा विध्वंसत एवं हैव स विध्वंसते य एवंविदि पापं कामयते यश्चैन
मभिदासति स एषोऽश्माखणो नैवैतेन सुरभि न दुर्गंधि विजानात्यपहतपा
प्मा ह्येष तेन यदश्नाति यत्पिबति तेनेतरान्प्राणानवत्येतमु एवांततोऽवित्वो
त्क्रामति व्याददात्येवांतत इति तं हांगिरा उद्गीथमुपासांचक्र एतमु एवांगि
रसं मन्यंतेऽंगानां यद्रसस्तेन तं ह बृहस्पतिरुद्गीथमुपासांचक्र एतमु एव
बृहस्पतिं मन्यंते वाग्घि बृहती तस्या एष पतिस्तेन तं हायास्य उद्गीथमुपा
सांचक्र एतमु एवायास्यं मन्यंत आस्याद्यदयते तेन तं ह बको दाल्भ्यो विदां
चकार स ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति आगाता ह
वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मं ॥ २ ॥ अथा

125

॥छांदो॥ ॥३॥ ॥ग्योप॥

धिदैवतं य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायत्युद्यं
स्तमो भयमपहंत्यपहंता ह वै भयस्य तमसो भवति य एवं वेद समान उ एवायं
चासौ चोष्णोयमुष्णोसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्मा
द्वा एतमिमममुं चोद्गीथमुपासीत॥ अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्रा
णिति स प्राणो यदपानिति सोऽपानोथ यः प्राणापानयोः संधिः स व्यानो यो व्या
नः सा वाक्तस्मादप्राणन्ननपानन्वाचमभिव्याहरति या वाक्सर्क्तस्मादप्राण
न्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्ननपानन्साम गाय
ति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायत्यतो यान्यन्यानि वीर्यवंति
कर्माणि यथाऽग्नेर्मंथनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानं॥

॥कृष्ण॥ ॥३॥

स्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत। अथ खल्वुद्गीथाक्षराण्युपासी
तोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थम
न्ने हीदं सर्वं स्थितं द्यौरेवोदंतरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्नि
स्थः सामवेद एवोद्यजुर्वेदो गीर्ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्न
वानन्नादो भवति य एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इत्यथ खल्वा
शीः समृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेद्यस्या
मृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेद्ये
न छंदसा स्तोष्यन्स्यात्तच्छंद उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तं स्तोममु
पधावेद्यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेदात्मानमंतत उपसृत्य स्तुवीत

होऽ

॥छांदो॥

॥४॥

॥स्योप॥

कामंध्यायन्नप्रमत्तोभ्याशोहयदस्मैसकामःसमृध्येतयत्कामःस्तुवीतेति
यत्कामःस्तुवीतेति॥३॥ओमित्येतदक्षरमुपासीतोमितिह्युद्गायतितस्योपव्या
ख्यानंदेवावैमृत्योर्बिभ्यतस्त्रयींविद्यांप्राविशंस्तेछंदोभिरछादयन्यदेभि
रछादयंस्तच्छंदसांछंदस्त्वंतानुतत्रमृत्युर्यथामत्स्यमुदकेपरिपश्येदेवं
पर्यपश्यदृचिसाम्नियजुषितेनुवित्वोर्ध्वाऋचःसाम्नोयजुषःस्वरमेवप्रा
विशन्यदावाऋचमाप्नोत्योमित्येवातिस्वरत्येवंसामैवंयजुरेषउस्वरोयदे
तदक्षरमेतदमृतमभयंतत्प्रविश्यदेवाअमृताअभयाअभवन्सयएतदे
वंविद्वानक्षरंप्रणौत्येतदेवाक्षरंस्वरममृतमभयंप्रविशतितत्प्रविश्यय
दमृतादेवास्तदमृतोभवति॥५॥अथखलुयउद्गीथःसप्रणवोयःप्रणवः

॥कृष्ण॥

॥४॥

सउद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ॐमिति ह्येष स्वरन्नेत्येतमु ए
वाहमभ्यगासिषं तस्मान्मम त्वमेकोसीति ह कौषीतकिः पुत्रमुवाच रश्मींस्त्वं
पर्यावर्तयाद्बहवो वै ते भविष्यंतीत्यधिदैवतमथाध्यात्मं य एवायं मुख्यः प्राण
स्तमुद्गीथमुपासीतोमिति ह्येष स्वरन्नेत्येतमु एवाहमभ्यगासिषं तस्मान्मम
त्वमेकोसीति ह कौषीतकिः पुत्रमुवाच प्राणांस्त्वं भूमानमभिगायताद्बहवो
वै मे भविष्यंतीत्यथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृष
दनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥५॥ इयमेवर्गग्निः
साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयत इयमेव
साऽग्निरमस्तत्साम ॥ अंतरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढं सा

॥छांदो॥ ॥ग्यो प॥

॥५॥

मतस्मादृच्यध्यूढꣳसामगीयतेंऽतरिक्षमेवसावायुरमस्तत्सामद्यौरेवर्गादि
त्यः सामतदेतदेतस्यामृच्यध्यूढꣳसामतस्मादृच्यध्यूढꣳसामगीयतेद्यौरेवसा
दित्योऽमस्तत्सामनक्षत्राण्येवर्क्चंद्रमाः सामतदेतदेतस्यामृच्यध्यूढꣳसाम
तस्मादृच्यध्यूढꣳसामगीयतेनक्षत्राण्येवसाचंद्रमाअमस्तत्सामाथयदेत
दादित्यस्यशुक्लंभाः सैवर्गथयन्नीलंपरःकृष्णंतत्सामतदेतदेतस्यामृच्यध्य
ढꣳसामतस्मादृच्यध्यूढꣳसामगीयतेऽथयदेवैतदादित्यशुक्लंभाः सैवसाथ
यन्नीलंपरःकृष्णंतदमस्तत्सामाथयएषोंतरादित्येहिरण्मयः पुरुषोदृश्यतेहि
रण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएवसुवर्णस्तस्ययथाकप्यासंपुंडरी
कमेवमक्षिणीतस्योदितिनामसएषसर्वेभ्यः पाप्मभ्यउदितउदेतिहवैसर्वेभ्यः

॥रुद्र॥

॥५॥

पाप्मभ्यो य एवं वेद तस्यर्क् साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गा
ता स एष ये चामुष्मात्परांचो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतं ॥६॥ अथाध्या
त्मं वागेवर्क्प्राणः साम तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गी
यते वागेव सा प्राणोऽमस्तत्साम चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्यध्यूढं सा
म तस्मादृच्यध्यूढं साम गीयते चक्षुरेव सात्माऽमस्तत्साम श्रोत्रमेवर्ङ्मनः सा
म तदेतदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयते श्रोत्रमेव सा म
नोऽमस्तत्सामाथ यदेतदक्ष्णः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदे
तदेतस्यामृच्यध्यूढं साम तस्मादृच्यध्यूढं साम गीयतेऽथ यदेवैतदक्ष्णः
शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्सामाथ य एषोऽन्तरक्षिणि पु

431

॥६॥

रुषोदृश्यतेसैवर्क्तत्सामतदुक्थंतद्यजुस्तद्ब्रह्मतस्यैतस्यतदेवरूपंयदमुष्य
रूपंयावमुष्यगेष्णौतौगेष्णौयन्नामतन्नामसएषयेचैतस्मादर्वाञ्चोलोकास्तेषां
चेष्टेमनुष्यकामानांचेतितद्यइमेवीणायांगायंत्येतंतेगायंतितस्मात्तेधनस
नयोथयएतदेवंविद्वान्सामगायत्युभौसगायतिसोऽमुनैवसएषयेचामुष्मा
त्पराञ्चोलोकास्तांश्चाप्नोतिदेवकामांश्चाथानेनैवयेचैतस्मादर्वाञ्चोलोका
स्तांश्चाप्नोतिमनुष्यकामांश्चतस्मादुहैवंविदुद्गाताब्रूयात्कंतेकाममागाया
नीत्येषह्येवकामागानस्येष्टेयएवंविद्वान्सामगायतिसामगायति ॥७॥ त्रयोहो
द्गीथेकुशलाबभूवुःशिलकःशालावत्यश्चैकितायनोदाल्भ्यःप्रवाहणोजैव
लिरितितेहोचुरुद्गीथेवैकुशलाःस्मोहंतोद्गीथेकथांवदामइतितथेतिहस

॥हस॥

॥६॥

५का

मुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवंतावग्रे वदतां ब्राह्मणयोर्वद
तोर्वाचं श्रोष्यामीति स ह सिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच ह
न्त त्वा पृच्छानीति पृच्छेति होवाच का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का
गतिरिति प्राण इति होवाच प्राणस्य का गतिरित्यन्नमिति होवाचान्नस्य का गति
रित्याप इति होवाचापां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गति
रिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकं सामाभिसंस्थाप
यामः स्वर्गसंस्तावं हि सामेति तं ह सिलकः शालावत्यश्चैकितायनं दाल्भ्य
मुवाचाप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति
मूर्धा ते विपतेदिति हंताहमेतद्भगवत्तो वेदानीति विद्धीति होवाचामुष्य लोकस्य

॥छांदो॥

॥७॥

॥ग्योप॥

कागतिरित्ययंलोकइतिहोवाचास्यलोकस्यकागतिरितिनप्रतिष्ठंलोकमतिन
येदितिहोवाचप्रतिष्ठांवयंलोकंसामाभिसंस्थापयामःप्रतिष्ठासंस्तावंहि
हिसामेतितंहप्रवाहणोजैवलिरुवाचान्तवद्वैकिलतेशालावत्यसामयस्त्वेत
र्हिब्रूयान्मूर्द्धातेविपतिष्यतीतिमूर्द्धातेविपतेदितिहंताहमेतद्भगवत्तोवेदा
नीतिविद्धीतिहोवाच॥८॥अस्यलोकस्यकागतिरित्याकाशइतिहोवाचस
र्वाणिहवाइमानिभूतान्याकाशादेवसमुत्पद्यंतेआकाशंप्रत्यस्तंयंत्याका
शोह्येवैभ्योज्यायानाकाशःपरायणंसएषपरोवरीयानुद्गीथःसएषोऽनं
न्तःपरोवरीयोहास्यभवतिपरोवरीयसोहलोकान्जयतियएतदेवंविद्वान्परो
वरीयांसमुद्गीथमुपास्तेतंहैतमतिधन्वाशौनकउदरशांडिल्यायोक्त्वो

॥रुद्र॥

॥७॥

वाचयावत्तएनंप्रजायामुद्गीथंवेदिष्यंतेपरोवरीयोहैभ्यस्तावदस्मिंल्लोकेजीव
नंभविष्यतितथाअमुष्मिंल्लोकेलोकइतिसयएतमेवंविद्वानुपास्तेपरोवरीय
३के एवहास्यास्मिंल्लोकेजीवनंभवतितथाअमुष्मिंल्लोकेलोकइतिलोकेलोकइति॥९॥
मटचीहतेषुकुरुष्वाटिक्यासहजाययोषस्तिर्हचाक्रायणइभ्यग्रामेप्रद्राणकउ
वाससहेभ्यंकुल्माषान्खादंतंबिभिक्षेतंहहोवाचनेतोन्येविद्यंतेयच्चयेमइ
४ति मउपनिहिताइत्येतेषांमेदेहीहोवाचतानस्मैप्रददौहंतानुपानमित्युच्छिष्टं
वैमेपीतंस्यादितिहोवाचनस्विदेतेप्युच्छिष्टाइतिनवाअजीविष्येमिमान
खादन्नितिहोवाचकामोमउदपानमितिसहखादित्वाऽतिशेषान्जायायाआज
हारसाऽग्रएवसुभिक्षाबभूवतान्प्रतिगृह्यनिदधौसहप्रातःसंजिहानउवाच

॥छांदो॥ ॥ग्योप॰॥

॥८॥

यद्वात्मनस्यलप्स्येमहि लप्स्येमहि धनमात्रां राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यै
र्वृणीतेति तं जायोवाच हंत पत इम एव कुल्माषा इति तान्खादित्वाऽमुं यज्ञं वित
तमेयाय तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच
प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्द्धा ते विपति
ष्यतीत्येवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथमन्वायत्ता तां चेदविद्वानु
द्गास्यसि मूर्द्धा ते विपतिष्यतीत्येवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता
प्रतिहर्तारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति ति
ह समारतास्तूष्णीमासांचक्रिरे ॥१०॥ अथ हैनं यजमान उवाच भगवंतं वा
अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच स होवाच भगवंतं वा

॥ऋग्म॥
॥८॥

136

अहमेभिःसर्वैरार्त्विज्यैःपर्यैषिषंभगवत्तोवाअहमवित्त्याऽन्यानवृषिभगवांस्
त्वेवमेवसर्वैरार्त्विज्यैरितितथेत्यथतर्ह्येतएवसमतिसृष्टाःस्तुवतांयावत्वेभ्यो
धनंदद्यास्तावन्ममदद्याइतितथेतिहयजमानउवाचाथहैनंप्रस्तोतोपससाद
प्रस्तोतर्यादेवताप्रस्तावमन्वायत्तातांचेदविद्वान्प्रस्तोष्यसिमूर्द्धातेविपतिष्य
तीतिमाभगवानवोचत्कतमासादेवतेतिप्राणइतिहोवाचसर्वाणिहवाइमानि
भूतानिप्राणमेवाभिसंविशंतिप्राणमभ्युज्जिहतेसैषादेवताप्रस्तावमन्वायत्ता
तांचेदविद्वान्प्रास्तोष्योमूर्द्धातेव्यपतिष्यत्तथोक्तस्यमयेत्यथहैनमुद्गातोपस
सादोद्गातर्यादेवतोद्गीथमन्वायत्तातांचेदविद्वानुद्गास्यसिमूर्द्धातेव्यपतिष्यती
तिमाभगवानवोचत्कतमासादेवतेत्यादित्यइतिहोवाचसर्वाणिहवाइमानिभूता

॥ छांदो ॥

॥ ५० ॥

॥ ग्योप ॥

न्यादित्यमुच्चैः संतं गायंति सैषा देवतोद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यो मू
र्द्धा ते व्यपतिष्यत्तथोक्तस्य मयेत्यथ हैनं प्रतिहर्तोपससाद प्रतिहर्त्तर्या देवता प्र
तिहार्त्तारमन्वायत्ता तां चेदविद्वान्प्रतिहरिष्यसि मूर्द्धा ते विपतिष्यतीति मा भग
वानवोचत्कतमा सा देवतेत्यन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमे
व प्रतिहरमाणानि जीवंति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्य
हरिष्यो मूर्द्धा ते व्यपतिष्यत्तथोक्तस्य मयेति ॥ ११ ॥ अथातः शौव उद्गीथस्तद्ध ब
को दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायार्थमुद्वव्राज तस्मै श्वा श्वेतः प्रादुर्बभूव तम
न्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति तान्होवाचेहै
व मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचका

॥ कृष्ण ॥

॥ ६० ॥

रतिहयथैवेहवहिष्पवमानेनस्तोष्यमाणाः सꣳरब्धाः सर्पंतीत्येवमाससृपु
स्तेहसमुपविश्यहिंउचक्रुः ओ३ं मदा३मों३ पिबा३मों३ देवो वरुणः प्रजाप
तिः सविताऽन्नमिहाहरदन्नपतेऽन्नमिहाहराहरोऽऽऽमिति॥१२॥ अयंवावलो
कोहाउकारोवायुर्हाइकारश्चंद्रमा अथकारः आत्मेहकारोऽग्निरीकारः आदि
त्यउकारोनिहवएकारोविश्वेदेवा औहोयिकारः प्रजापतिर्हिंकारः प्राणः स्व
रोऽन्नंयावाग्विराट् अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारो दुग्धेऽस्मै वाग्दो
हंयोवाचोदोहोऽन्नवानन्नादो भवति य एतामेवꣳसाम्नामुपनिषदं वेदोपनि
षदं वेद॥१३॥ ॥इति छांदोग्योपनिषदि सामवेदीयायां प्रथमः प्रपाठकः॥
॥१॥ ॥हरिः ॐ॥ ॥समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु साधु तत्सा

॥छांदो॥

१०॥

॥ग्योय॥

मेथ्याचक्षतेयद्साधुतद्सामेतितदुताप्याहुःसाम्नेनमुपागादितिसाधुनै
नमुपागादित्येवतदाहुरसाम्नेनमुपागादित्यसाधुनेनमुपागादित्येवतदा
हुरथोताप्याहुःसामनोबतेतियत्साधुभवतिसाधुबतेत्येवतदाहुरसाम
नोबतेतियद्साधुभवत्यसाधुबतेत्येवतदाहुःसयएतदेवंविद्वान्साधुसा
मेत्युपास्तेऽभ्याशोहयदेनंसाधवोधर्माआचगच्छेयुरुपचनमेयुः॥१॥
लोकेषुपंचविधंसामोपासीतपृथिवीहिंकारोऽग्निःप्रस्तावोऽन्तरिक्षमु
द्गीथआदित्यःप्रतिहारोद्यौर्निधनमित्यूर्ध्वेष्वथावृत्तेषुद्यौर्हिंकारआदित्यः
प्रस्तावोऽन्तरिक्षमुद्गीथोऽग्निःप्रतिहारःपृथिवीनिधनंकल्पन्तेहास्मैलो
काऊर्ध्वाश्चावृत्ताश्चयएतदेवंविद्वाँल्लोकेषुपंचविधंसामोपास्ते॥२॥

॥रुद्र॥

॥१०॥

वृष्टौ पंचविधं सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो व
र्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनं वर्षति
हास्मै वर्षयति ह य एतदेवं विद्वान्वृष्टौ पंचविधं सामोपास्ते ॥३॥ सर्वास्व
प्सु पंचविधं सामोपासीत मेघो यत्संप्लवते स हिंकारो यद्वर्षति स प्रस्ता
वो याः प्राच्यः स्यंदंते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनं न
हाप्सु प्रैत्यप्सुमान्भवति य एतदेवं विद्वान्सर्वास्वप्सु पंचविधं सामोपास्ते ॥
॥४॥ ऋतुषु पंचविधं सामोपासीत वसंतो हिंकारो ग्रीष्मः प्रस्तावो वर्षा
उद्गीथः शरत्प्रतिहारो हेमंतो निधनं कल्पंते हास्मा ऋतव ऋतुमान्भव
ति य एतदेवं विद्वानृतुषु पंचविधं सामोपास्ते ॥५॥ पशुषु पंचविधं

सामोपासीताजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पुरुषो
निधनं भवति हास्य पशवः पशुमान्भवति य एतदेवं विद्वान्पशुषु पंच
विधꣳ सामोपास्ते ॥६॥ प्राणेषु पंचविधं परोवरीयः सामोपासीत प्राणो
हिंकारो वाक्प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाꣳ
सि वा एतानि परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति
य एतदेवं विद्वान्प्राणेषु पंचविधं परोवरीयः सामोपास्त इति तु पंचविध
स्य ॥७॥ अथ सप्तविधस्य वाचि सप्तविधꣳ सामोपासीत यत्किंच वाचो हुं
इति स हिंकारो यत्प्रेति स प्रस्तावो यदेति स आदिर्यदुदेति स उद्गीथो यत्प्र
तीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनं दुग्धेऽस्मै वाग्दो

ईयो वा चो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान्वाचि सप्तविधं सामो
पास्ते ॥८॥ अथ खल्वमुमादित्यं सप्तविधं सामोपासीत सर्वदा समस्तेन
साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम तस्मिन्निमानि सर्वाणि भूता
न्यन्वायत्तानीति विद्यात्तस्य यत्पुरोदयात्स हिंकारस्तदस्य पशवोऽन्वाय
त्तास्तस्मात्ते हिं कुर्वंति हिंकारभाजिनो ह्येतस्य साम्नोऽथ यत्प्रथमोदिते स प्रस्ता
वस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रशंसाकामाः प्रस्ता
वभाजिनो ह्येतस्य साम्नोऽथ यत्संगववेलायां स आदिस्तदस्य वयांस्यन्वा
यत्तानि तस्मात्तान्यंतरिक्षेऽनारंबणान्यादायात्मानं परिपतंत्यादिभाजी
नि ह्येतस्य साम्नोऽथ यत्संप्रति मध्यंदिने स उद्गीथस्तदस्य देवा अन्वायत्ता

॥छांदो॥

॥१२॥

स्तस्मात्ते सत्तमाः प्राजापत्यानामुद्गीथभाजिनो ह्येतस्य साम्नोऽथ यदूर्ध्वं म
ध्यंदिनात्प्रागपराह्णात्स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिह
ता नावपद्यंते प्रतिहारभाजिनो ह्येतस्य साम्नोऽथ यदूर्ध्वमपराह्णात्प्रागस्त
मयात्स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षं श्व
भ्रमित्युपद्रवंत्युपद्रवभाजिनो ह्येतस्य साम्नोऽथ यत्प्रथमास्तमिते तन्नि
धनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य
साम्न एवं खल्वमुमादित्यं सप्तविधं सामोपास्ते ॥८॥ अथ खल्वात्म
संमितमतिमृत्यु सप्तविधं सामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इ
ति त्र्यक्षरं तत्सममादिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं त्रिभिस्त्रिभिः स

मं भवत्युद्गीथ इति त्र्यक्षरमुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवत्य
क्षरमतिशिष्यते त्र्यक्षरं तत्समं निधनमिति त्र्यक्षरं तत्सममेव भवति तानि
ह वा एतानि द्वाविंशतिरक्षराण्येकविंशत्यादित्यमाप्नोत्येकविंशो वा इ
तोऽसावादित्यो द्वाविंशेन परमादित्याज्जयति तन्नाकं तद्विशोकमाप्नोति हा
दित्यस्य जयं परो हास्यादित्यजयाज्जयो भवति य एतदेवं विद्वानात्मसंमित
मतिमृत्यु सप्तविधं सामोपास्ते सामोपास्ते ॥१०॥ मनो हिंकारो वाक्प्रस्तावश्
चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतं स य ए
वमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान्प्र
जया पशुभिर्भवति महान्कीर्त्या महामनाः स्यात्तद्व्रतं ॥११॥ अभिमंथति स हिं

॥छांदो॥ ॥ग्योप॥

॥१३॥

कालेधूमोजायतेसप्रस्तावोउज्वलतिसउद्गीथोऽंगाराभवंतिसप्रतिहारउपशा
म्यतितन्निधनं॥संशाम्यतितन्निधनमेतद्रथंतरमग्नौप्रोतं॥सयएवमेत
द्रथंतरमग्नौप्रोतंवेदब्रह्मवर्चस्यन्नादोभवतिसर्वमायुरेतिज्योग्जीवतिमह
प्रजयापशुभिर्भवतिमहान्कीर्त्यानप्रत्यङ्ङग्निमाचामेन्ननिष्ठीवेत्तद्व्रतं॥१२॥
उपमंत्रयतेसहिंकारोज्ञपयतेसप्रस्तावःस्त्रियासहशेतेसउद्गीथःप्रति
स्त्रीसहशेतेसप्रतिहारःकालंगच्छतितन्निधनंपारंगच्छतितन्निधनमेत
द्वामदेव्यंमिथुनेप्रोतं॥ सयएवमेतद्वा
मदेव्यंमिथुनेप्रोतंवेदमिथुनीभवतिमिथुनान्मिथुनात्प्रजायतेसर्वमायु
रेतिज्योग्जीवतिमहान्प्रजयापशुभिर्भवतिमहान्कीर्त्यानकांचनपरिहरेत्त

॥हस्म॥

॥१३॥

व्रतं ॥१३॥ उद्यन्हिंकार उदितः प्रस्तावो मध्यंदिन उद्गीथोऽपराह्णः प्रतिहारोऽ
स्तंयन्निधनमेतद्बृहदादित्ये प्रोतं ॥ स य एवमेतद्बृहदादित्ये प्रोतं वेद तेजस्व्य
न्नादो भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्की
र्त्या तपंतं न निंदेत्तद्व्रतं ॥१४॥ अभ्राणि संप्लवंते स हिंकारो मेघो जायते स प्रस्ता
वो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेत
द्वैरूपं पर्जन्ये प्रोतं ॥ स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपांश्च सुरू
पांश्च पशूनवरुंधे सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति
महान्कीर्त्या वर्षंतं न निंदेत्तद्व्रतं ॥१५॥ वसंतो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उ
द्गीथः शरत्प्रतिहारो हेमंतो निधनमेतद्वैराजमृतुषु प्रोतं ॥ स य एवमेतद्वै

॥छांदो॥ ॥ग्योप॥

॥१४॥

राजन्तुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्यो
ग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्यर्तून्न निंदेत्तद्व्रतं ॥१६॥ पृथि
वी हिंकारोऽन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः
शाक्वर्यो लोकेषु प्रोताः स य एवमेताः शाक्वर्यो लोकेषु प्रोता वेद लोकी भवति
सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या लोकान्न नि
देत्तद्व्रतं ॥१७॥ अजा हिंकारोऽवयः प्रस्तावो गाव उद्गीथोऽश्वाः प्रतिहारः पु
रुषो निधनमेता रेवत्यः पशुषु प्रोताः स य एवमेता रेवत्यः पशुषु प्रोता वेद पशु
मान्भवति सर्वमायुरेति ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या
पशून्न निंदेत्तद्व्रतं ॥१८॥ लोम हिंकारस्त्वक्प्रस्तावो मांसमुद्गीथोऽस्थि प्रति

॥कृष्ण॥ ॥१४॥

हारो मज्जा निधनमेतद्यज्ञायज्ञीयमंगेषु प्रोतं ॥ स य एवमेतद्यज्ञायज्ञीयमंगे
षु प्रोतं वेदांगी भवति नांगेन विहूर्छति सर्वमायुरेति ज्योग्जीवति महान्प्रजया
पशुभिर्भवति महान्कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयात्तद्व्रतं मज्ज्ञो नाश्नीयादिति
वा ॥१९॥ अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चं
द्रमा निधनमेतद्राजनं देवतासु प्रोतं ॥ स य एवमेतद्राजनं देवतासु प्रोतं वे
दैतासामेव देवतानां सलोकतां सार्ष्टितां सायुज्यं गच्छति सर्वमायुरेति
ज्योग्जीवति महान्प्रजया पशुभिर्भवति महान्कीर्त्या ब्राह्मणान्न निंदेत्तद्व्रतं ॥२०॥
त्रयी विद्या हिंकारस्त्रय इमे लोकाः स प्रस्तावोऽग्निर्वायुरादित्यः स उद्गीथो न
क्षत्राणि वयांसि मरीचयः स प्रतिहारः सर्पा गंधर्वाः पितरस्तन्निधनमेतत्सा

149

म सर्वस्मिन्प्रोतं॥२॥ सयएवमेतत्साम सर्वस्मिन्प्रोतंवेद सर्वं ह भवति॥३॥ तदेषः
श्लोको यानि पंचधा त्रीणि त्रीणि तेभ्यो नज्यायः परमन्यदस्ति यस्तद्वेद सवेद सर्वं स
र्वा दिशो बलिमस्मै हरंति सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतं॥२१॥ विनर्दि सा
म्नो वृणे पशव्यमित्यग्नेरुद्गीथोऽनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्ल
क्ष्णं वायोः श्लक्ष्णं बलवदिंद्रस्य क्रौंचं बृहस्पतेरपध्वांतं वरुणस्य तान्सर्वा
नेवोपसेवेत वारुणं त्वेव वर्जयेदमृतत्वं देवेभ्य आगायानीत्यागायेत्स्वधां पि
तृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गलोकं यजमानायान्नमात्मन आ
गायानीत्येतानि मनसा ध्यायन्नप्रमत्तः स्तुवीत सर्वे स्वरा इंद्रस्यात्मानः सर्व
ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानस्तं यदि स्वरेषूपालभेतेंद्रं

न्द्रं शरणं प्रपन्नोऽभूवं स त्वा प्रतिवक्ष्यतीत्येनं ब्रूयादथ यद्येनमूष्मसूपालभे
त प्रजापतिं शरणं प्रपन्नोऽभूवं स त्वा प्रतिपेक्ष्यतीत्येनं ब्रूयादथ यद्येनं
स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवं स त्वा प्रतिधक्ष्यतीत्येनं ब्रूया
त्सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्व ऊष्माणोऽग्रस्ता
अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशे
नानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥२२॥ त्रयो धर्मस्कंधा य
ज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृती
योऽत्यंतमात्मानमाचार्यकुलेऽवसादयन्सर्व एते पुण्यलोका भवंति ब्रह्मसं
स्थोऽमृतत्वमेति प्रजापतिर्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयी विद्या

संप्रास्रवंतामभ्यतपत्तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवंत भूर्भुवः
स्वरिति तान्यभ्यतपत्तेभ्योऽभितप्तेभ्य ॐकारः संप्रास्रवत्तद्यथा शंकुना स
र्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णोंकार एवेदं सर्वमों
कार एवेदं सर्वं ॥३॥ ब्रह्मवादिनो वदंति यद्वसूनां प्रातःसवनं रुद्राणां
माध्यंदिनं सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनं क्व तर्हि
यजमानस्य लोक इति स यस्तं न विद्यात्कथं कुर्यादथ विद्वान्कुर्यात्पुरा प्रातर
नुवाकस्योपाकरणाज्जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवं सामा
भिगायति ॥२४॥ लोकद्वारमपावार्णू३ पश्येम त्वा वयं रा ३३३३ हुं३ आ ३३
ज्या ३ यो ३ आ ३२१११ इति ॥ अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे

न३

यजमानाय विंदैष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायुषः स्वा
हा३ पजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै वसवः प्रातःसवनं संप्रयच्छंति पु
रा माध्यंदिनस्य सवनस्योपाकरणाज्जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य
स रौद्रं सामाभिगायति लो३कद्वारमपावार्ण्ू २३ पश्येम त्वा वयं वैरा ३३३३३ हुं ३
आ ३३ ज्या ३ यो ३ आ ३२१११ इ अथ जुहोति नमो वायवेंतरिक्षक्षिते लोकक्षिते लो
कं मे यजमानाय विंदैष वै यजमानस्य लोक एतास्म्यत्र यजमानः परस्तादायु
षः स्वाहा३ पजहि परिघमित्युक्त्वोत्तिष्ठति तस्मै रुद्रा माध्यंदिनं सवनं संप्र
यच्छंति पुरा तृतीयसवनस्योपाकरणाज्जघनेनाहवनीयस्योदङ्मुख उपवि
श्य स आदित्यं स वैश्वदेवं सामाभिगायति लोकद्वारमपावार्ण्ू २३ पश्येम त्वा

॥छांदो॰॥

॥१८॥

२२२२२
वयुं२स्व३२३३ हुं३आ३३ज्या३या३आ३१११इत्यादित्यमथ वैश्वदेवं लोक३
द्वारमपावार्णु३३ पश्येम त्वा वयुं२ साम्रा२३२२२ हुं३आ३३ ज्या३यो३
आ३१११इत्यथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो
लोकक्षिद्भ्यो लोकं मे यजमानाय विंदतैष वै यजमानस्य लोक एतास्म्यत्र
यजमानः परस्तादायुषः स्वाहाऽपहत परिघमित्युक्त्वोत्तिष्ठति तस्मा आदि
त्याश्च विश्वे देवाश्च तृतीयसवनं संप्रयच्छंत्येष ह वै यज्ञस्य मात्रां वेद य एवं
वेद य एवं वेद ॥२५॥ ॥इति छांदोग्योपनिषदि द्वितीयः प्रपाठकः॥ ॥२॥
॥हरिः ॐ॥ ॥असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवंशोऽंतरि
क्षमपूपो मरीचयः पुत्रास्तस्य ये प्रांचो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यो

॥छांदो॰॥

॥१८॥

ऋच एव मधुकृत ऋग्वेद एव पुष्पं ता अमृता आपस्ता वा एता ऋच एतमृग्वे
दमभ्यतपंस्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत तद्व्य
क्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य रोहितं रूपं ॥१॥ अथ येऽ
स्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूंष्येव मधुकृतो य
जुर्वेद एव पुष्पं ता अमृता आपस्तानि वा एतानि यजूंष्येतं यजुर्वेदमभ्यतपं
स्तस्याभितप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यं रसोऽजायत तद्व्यक्षरत्तदादि
त्यमभितोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य शुक्लं रूपं ॥२॥ अथ येऽस्य प्रत्यंचो
रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं
ता अमृता आपस्तानि वा एतानि सामान्येतं सामवेदमभ्यतपंस्तस्याभि

॥छांदो॥

॥१८॥

तप्तस्य यशस्तेज इंद्रियं वीर्यमन्नाद्यꣳ रसोऽजायत तद्व्यक्षरत्तदादित्यमभि
तोऽश्रयत्तद्वा एतद्यदेतदादित्यस्य कृष्णꣳ रूपं ॥३॥ अथ येऽस्योदञ्चो रश्मयस्ता
एवास्योदीच्यो मधुनाड्योऽथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अ
मृता आपस्ता वा एतेऽथर्वाङ्गिरस एतदितिहासपुराणमभ्यतपꣳस्तस्याभितप्त
स्य यशस्तेज इंद्रियं वीर्यमन्नाद्यꣳ रसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽ
श्रयत्तद्वा एतद्यदेतदादित्यस्य परः कृष्णꣳ रूपं ॥४॥ अथ येऽस्योर्ध्वा रश्मय
स्ता एवास्योर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता
आपस्ता वा एते गुह्या आदेशा एतद्ब्रह्माभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इं
द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत तद्व्यक्षरत्तदादित्यमभितोऽश्रयत्तद्वा एतद्यदे

॥ग्योप॥

॥हरुरा॥

॥१८॥

तदादित्यस्यमध्येक्षोभतइवतेवाएतेरसानांरसावेदाहिरसास्तेषामेतेरसास्ता
निवाएतान्यमृतानाममृतानिवेदाह्यमृतास्तेषामेतान्यमृतानि॥५॥तद्यत्प्रथ
ममममृतंतद्वसवउपजीवंत्यग्निनामुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतं
दृष्ट्वातृप्यंतितेएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंतिसयएतदेवममृतंवे
दवसूनामेवैकोभूत्वाग्निनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपम
भिसंविशत्येतस्माद्रूपादुदेतिसयावदादित्यःपुरस्तादुदेतापश्चादस्तमेतावसू
नामेवतावदाधिपत्यंस्वाराज्यंपर्येता॥६॥अथयद्द्वितीयममृतंतद्रुद्राउप
जीवंतींद्रेणमुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंतितेएतदे
वरूपमभिसंविशंत्येतस्माद्रूपादुद्यंतिसयएतदेवममृतंवेदरुद्राणामेवैको

॥छांदो॥

॥१९

४ना

न्द्रेणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशत्येतस्मा
द्रूपादुदेति स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उ
देतोत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यं स्वाराज्यं पर्येता ॥७॥ अथ
यत्तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न
पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति त एतदेव रूपमभिसंविशन्त्येतस्माद्रूपादुद्यं
ति स य एतदेवामृतं वेदादित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा
तृप्यति स एतदेव रूपमभिसंविशत्येतस्माद्रूपादुदेति स यावदादित्यो दक्षिणत
उदेतोत्तरतोऽस्तमेता द्विस्तावत्पश्चादुदेता पुरस्तादस्तमेतादित्यानामेव ताव
दाधिपत्यं स्वाराज्यं पर्येता ॥८॥ अथ यच्चतुर्थममृतं तन्मरुत उपजीवन्ति

॥च्योप॥

॥हरेः॥

॥१९॥

सोमेनमुखेननवैदेवाअश्नंतिनपिबंत्येतदेवामृतंदृष्ट्वातृप्यंतितएतदेवरूप
मभिसंविशंत्येतस्माद्रूपादुद्यंतिसयएतदेवामृतंवेदमरुतामेवैकोभूत्वासो
मेनैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिसएतदेवरूपमभिसंविशत्येतस्माद्रूपा
दुदेतिसयावदादित्यःपश्चादुदेतापुरस्तादस्तमेताद्विस्तावदुत्तरतउदेताद
क्षिणतोऽस्तमेतामरुतामेवतावदाधिपत्यंस्वाराज्यंपर्येता॥४॥अथयत्पंच
ममृतंतत्साध्याउपजीवंतिब्रह्मणामुखेननवैदेवाअश्नंतिनपिबंत्येतदेवा
मृतंदृष्ट्वातृप्यंतितएतदेवरूपमभिसंविशंत्येतस्माद्रूपादुद्यंतिसयएतदे
वामृतंवेदसाध्यानामेवैकोभूत्वाब्रह्मणैवमुखेनैतदेवामृतंदृष्ट्वातृप्यतिस
एतदेवरूपमभिसंविशत्येतस्माद्रूपादुदेतिसयावदादित्यउत्तरतउदेताद

क्षिणतोस्तमेता द्विस्तावदूर्ध्व उदेता अर्वाङस्तमेता साध्यानामेव तावदाधिपत्यं
स्वाराज्यं पर्येता ॥१०॥ अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्था
ता तदेष श्लोको न वै तत्र निम्लोच नोदियाय कदाचन देवास्तेनाहं सत्येन
मा विराधिषि ब्रह्मणेति न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै
भवति य एतामेवं ब्रह्मोपनिषदं वेद तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापति
र्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकायारुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रो
वाचेदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्प्रणाय्याय वान्तेवासिने ना
न्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यादेतदेव ततो भू
य इत्येतदेव ततो भूय इति ॥११॥ गायत्री वा इदं सर्वं भूतं यदिदं किंच वाग्वै गा

यत्रीवाग्वाइदꣳ सर्वंभूतंगायतिचत्रायतेचयावैसागायत्रीयंवावसायेयंपृ
थिव्यस्याꣳहीदꣳसर्वंभूतंप्रतिष्ठितमेतामेवनातिशीयतेयावैसापृथिवीयंवा
वसायदिदमस्मिन्पुरुषेशरीरमस्मिन्हीमेप्राणाःप्रतिष्ठिताएतदेवनातिशी
यंतेयद्वैतत्पुरुषेशरीरमिदंवावतद्यदिदमस्मिन्नंतःपुरुषेहृदयमस्मिन्ही
मेप्राणाःप्रतिष्ठिताएतदेवनातिशीयंतेसैषाचतुष्पदाषड्विधागायत्रीतदेत
दृचाभ्यनूक्तंतावानस्यमहिमाततोज्यायाꣳश्चपूरुषःपादोस्यसर्वाभूतानित्रि
पादस्यामृतंदिवीतियद्वैतद्ब्रह्मेतीदंवावतद्योयंबहिर्धापुरुषादाकाशोयोवै
सबहिर्धापुरुषादाकाशोयंवावसयोयमंतःपुरुषेशरीरआकाशोयोवैसोंतःपु
रुषआकाशोयंवावसयोयमंतर्हृदयआकाशस्तदेतत्पूर्णमप्रवर्त्तिपूर्णमप्र

वर्त्तिनीं श्रियं लभते य एवं वेद॥९॥ तस्य ह वा एतस्य हृदयस्य पंच देवसुष
यः स यो ऽस्य प्राङ् सुषिः स प्राणस्तच्चक्षुः स आदित्यस्तदेतत्तेजो ऽन्नाद्यमित्यु
पासीत तेजस्व्यन्नादो भवति य एवं वेदाथ यो ऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रो
त्रं स चंद्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान्यशस्वी भवति य एवं
वेदाथ यो ऽस्य प्रत्यङ् सुषिः सो ऽपानः सा वाक्सो ऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्य
मित्युपासीत ब्रह्मवर्चस्यन्नादो भवति य एवं वेदाथ यो ऽस्योदङ् सुषिः स समा
नस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान्व्युष्टिमान्भ
वति य एवं वेदाथ यो ऽस्योर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोज
श्च महश्चेत्युपासीतौजस्वी महस्वान्भवति य एवं वेद ते वा एते पंच ब्रह्मपुरु

॥रुद्रम॥ ॥२१॥

पाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पंच ब्रह्मपुरुषान्स्वर्गस्य लोकस्य द्वा
रपान्वेदास्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एवमेतानेवं पंच ब्रह्म
पुरुषान्स्वर्गस्य लोकस्य द्वारपान्वेद ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः
पृष्ठेषु सर्वतः पृष्ठेषु अनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः
पुरुषे ज्योतिस्तस्यैषा दृष्टिर्यत्रैतदस्मिञ्छरीरे संस्पर्शेनोष्णिमानं विजाना
ति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत
उपशृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य
एवं वेद ॥ १३ ॥ सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीताथ खलु क्रतुम
यः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वी

तमनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः
सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोवाक्यनादर एषम आत्मांतर्हृदयेऽणीया
न्व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतंडुलाद्वैषम आत्मांतर्हृदये
ज्यायान्पृथिव्याज्यायानंतरिक्षाज्ज्यायान्दिवोज्यायानेभ्यो लोकेभ्यः सर्वकर्मा
सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्तोवाक्यनादर एषम आत्मांत
र्हृदय एतद्ब्रह्मैतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सास्ती
ति ह स्माह शांडिल्यः शांडिल्यः॥१४॥ अंतरिक्षोदरः कोशो भूमिबुध्नो न जीर्य
ति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलं स एष कोशो वसुधानस्तस्मिन्वि
श्वमिदं श्रितं तस्य प्राची दिग्जुहूर्नाम सहमाना नाम दक्षिणा राज्ञी नाम प्र

॥कस्स॥

॥२२॥

तीचीसु मृतानामोदीचीतासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्र
रोदं रोदिति सोहमेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदं रुदमरिष्टं कोशं
प्रपद्येऽमुनामुनाऽमुना प्राणं प्रपद्येमुनामुनामुना भूः प्रपद्येमुनामुनामुना
भुवः प्रपद्येमुनामुनामुना स्वः प्रपद्येमुनामुनामुना स यदवोचं प्राणं प्रप
द्य इति प्राणो वा इदं सर्वं भूतं यदिदं किंच तमेव तत्प्रापत्स्यथ यदवोचं भूः
प्रपद्य इति पृथिवीं प्रपद्येंतरिक्षं प्रपद्ये दिवं प्रपद्य इत्येव तदवोचमथ यद
वोचं भुवः प्रपद्य इत्यग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम
थ यदवोचं स्वः प्रपद्य इत्यृग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्य इ
त्येव तदवोचं तदवोचं ॥१५॥ पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षा

॥छांदो॥

॥२३॥

६२

णि तत्प्रातःसवनं चतुर्विंशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोन्वा
यत्ताः प्राणा वाव वसव एते हीदं सर्वं वासयंति तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स
ब्रूयात्प्राणा वसव इदं मे प्रातःसवनं माध्यंदिनं सवनमनुसंतनुतेति माहं प्रा
णानां वसूनां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवत्यथ यानि चतु
श्चत्वारिंशद्वर्षाणि तन्माध्यंदिनं सवनं चतुश्चत्वारिंशदक्षरा त्रिष्टुप्त्रै
ष्टुभं माध्यंदिनं सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदं स
र्वं रोदयंति तं चेदेतस्मिन्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा रुद्रा इदं मे मा
ध्यंदिनं सवनं तृतीयसवनमनुसंतनुतेति माहं प्राणानां रुद्राणां म
ध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो ह भवत्यथ यान्यष्टाचत्वारिंशद्वा

न्योप॥

॥रुद्र॥

॥२३॥

द्वर्षाणि तृतीयसवनमष्टाचत्वारिंशदक्षरा जगती जागतं तृतीयसवनं त
दस्यादित्या अन्वायत्ताः प्राणा वा आदित्या एते हीदं सर्वमाददते तं चेदेतस्मि
न्वयसि किंचिदुपतपेत्स ब्रूयात्प्राणा आदित्या इदं मे तृतीयसवनमायुरनुसं
तनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीयेत्युद्धैव तत एत्यगदो
हैव भवत्येतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि यो
हमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत्प्र ह षोडशं वर्षशतं जीव
ति य एवं वेद ॥१६॥ स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षा
अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेत्यथ यद्धसति यज्जक्षति य
न्मैथुनं चरति स्तुतशस्त्रैरेव तदेत्यथ यत्तपो दानमार्जवमहिंसा सत्य

॥छांदो॥

॥२४॥

वचनमितिताअस्यदक्षिणातस्मादाहुःसोष्यत्यसोष्टेतिपुनरुत्पादनमेवा
स्यतन्मरणमेवावभृथस्तद्धैतद्घोरआंगिरसःकृष्णायदेवकीपुत्रायोक्त्वा
चापिपासएवसबभूवसोऽन्तवेलायामेतत्त्रयंप्रतिपद्येताक्षितमस्यच्यु
तमसिप्राणसंशितमसीतितत्रैतेद्वेऋचौभवतआदित्प्रत्नस्यरेतसो
ज्योतिष्पश्यंतिवासरंपरोयदिध्यतेदिवाउद्वयंतमसस्परिज्योतिष्पश्यं
तउत्तरंस्वःपश्यंतउत्तरंदेवंदेवत्रासूर्यमगन्मज्योतिरुत्तममितिज्योति
रुत्तममिति॥१७॥मनोब्रह्मेत्युपासीतेत्यध्यात्ममथाधिदैवतमाकाशोब्रह्मे
त्युभयमादिष्टंभवत्यध्यात्मंचाधिदैवतंचतदेतच्चतुष्पाद्ब्रह्मवाक्पादःप्रा
णःपादश्चक्षुःपादःश्रोत्रंपादइत्यध्यात्ममथाधिदैवतमग्निःपादोवायुः

॥न्योप॥

॥कृष्ण॥

॥२४॥

पादः आदित्यः पादो दिशः पादः इत्युभयमेवादिष्टं भवत्यध्यात्मं चैवाधिदैवतं
च वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च
तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद प्राण एव ब्रह्मणश्चतुर्थः पादः
स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्च
सेन य एवं वेद चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च त
पति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद श्रोत्रमेव ब्रह्म
णश्चतुर्थः पादः स दिग्भिर्ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या
यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥१८॥ आदित्यो ब्रह्मेत्यादेशस्त
स्योपव्याख्यानमसदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्त्त

॥छांदो॥ ॥१२५॥ ॥ग्योप०॥

तं तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते अंडकपाले रजतं च सुवर्णं चाभवतां तद्यद्रजतं सेयं पृथिवी यत्सुवर्णं सा द्यौर्यज्जरायु ते पर्वता यदुल्बं स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्रः ॥ अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्सर्वाणि च भूतानि सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठंति सर्वाणि च भूतानि सर्वे चैव कामाः स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्तेऽभ्याशो ह यदेनं साधवो घोषा आ च गच्छेयुरुप च निम्रेडेरन्निम्रेडेरन् ॥१९॥ ॥इति छांदोग्योपनिषदि तृतीयः प्रपाठकः॥ ॥३॥

॥हरिः ॐ॥ ॥जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस

॥हरन्म॥ ॥२५॥

सहसर्वतआवसथान्समापयांचक्रे सर्वत एवमेस्यंतो यथ हहऽसानिशायामति
पेतुस्तद्धैक हहऽसोहऽसमभ्युवाद हाहोयीभल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणे
स्य समं दिवाज्योतिरा ततं तन्मा प्रसांक्षीस्तत्वा मा प्रधाक्षीरिति तमु ह परः प्रत्युवा
च कम्वर एनमेतत्संतऽसयुग्वानमिव रयिकमात्थेति यो नु कथऽसयुग्वा रयि
क इति यथा कृताय विजितायाधरेयाः संयंत्येवमेनऽसर्वं तदभिसमेति यत्किं
च प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेद स मयैतदुक्त इति तदु ह जानश्रुतिः पौत्राय
ण उपशुश्राव स ह संजिहान एव क्षत्तारमुवाचांगारे ह स सयुग्वानमिव रयि
कमात्थेति यो नु कथऽसयुग्वा रयिक इति यथा कृताय विजितायाधरेयाः संयं
त्येवमेनऽसर्वं तदभिसमेति यत्किं च प्रजाः साधु कुर्वंति यस्तद्वेद यत्स वेद स मयै

॥छांदो.॥ ॥ग्योप.॥

॥२६॥

तदुक्त इति स ह क्षत्ताऽन्विष्य नाविदमिति प्रत्येयाय तं होवाच यत्रारे ब्राह्मण
स्यान्वेषणा तदेनमर्छेति सोऽधस्ताच्छकटस्य पामानं कषमाणमुपोपविवेश
तं हाभ्युवाद त्वं नु भगवः सयुग्वा रयिक्व इत्यहं ह्यरा३ इति ह प्रतिजज्ञे स ह क्ष
त्ताऽविदमिति प्रत्येयाय ॥१॥ तदु ह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्क
मश्वतरीरथं तदादाय प्रतिचक्रमे तं हाभ्युवाद रयिक्वेमानि षट् शतानि गवा
मयं निष्कोऽयमश्वतरीरथोऽनु म एतां भगवो देवतां शाधि यां देवतामुपास्स इति
तमु ह परः प्रत्युवाचाह हारे त्वा शूद्र तवैव सह गोभिरस्त्विति तदु ह पुनरेव जान
श्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे
तं हाभ्युवाद रयिक्वेदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जायाऽयं ग्रामो

॥हरः॥ ॥२६॥

यस्मिन्नास्से न्वेव मा भगवः शाधीति तस्या ह मुखमुपोद्गृह्णन्नुवाचाजहारेमाः शू
द्रानेनैव मुखेनालापयिष्यथा इति ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा
उवास तस्मै होवाच ॥२॥ वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्ये
ति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति यदाप उच्छु
ष्यन्ति वायुमेवापियन्ति वायुर्ह्येवैतान्सर्वान्संवृङ्क्त इत्यधिदैवतमथाध्यात्मं प्राणो
वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं
मनः प्राणो ह्येवैतान्सर्वान्संवृङ्क्त इति तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः
प्राणेषु अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्म
चारी बिभिक्षे तस्मा उ ह न ददतुः स होवाच महात्मनश्चतुरो देव एकः कः स जगा

॥छांदो॥

॥न्योप॥

॥२७॥

रसुवनस्यगोपास्तंकापेयनाभिपश्यंतिमर्त्याअभिप्रतारिन्बहुधावसंतंयस्मै
वाएतदन्नंतस्माएतन्नदत्तमितितदुहशौनकःकापेयःप्रतिमन्वानःप्रत्येयायात्
मादेवानांजनिताप्रजानांहिरण्यदंष्ट्रोबभसोऽनसूरिर्महांतमस्यमहिमान
माहुरनद्यमानोयदनन्नमत्तीतिवैवयंब्रह्मचारिन्नेदमुपास्महेदत्तास्मैभि
क्षामितितस्माउहददुस्तेवाएतेपंचान्येपंचान्येदशसंतस्तत्कृतंतस्मात्सर्वासु
दिक्ष्वन्नमेवदशकृतंसैषाविराडन्नादीतयेदंसर्वंदृष्टंसर्वमस्येदंदृष्टंभव
त्यन्नादोभवतियएवंवेदयएवंवेद॥३॥सत्यकामोहजाबालोजबालांमातरमा
मंत्रयांचक्रेब्रह्मचर्यंभवतिविवत्स्यामिकिंगोत्रोन्वहमस्मीतिसाहैनमुवाच
नाहमेतद्वेदतातयद्गोत्रस्त्वमसिबह्वहंचरंतीपरिचारिणीयौवनेत्वामलभेसा

॥छस्र॥

॥२७॥

हमेतन्नवेदयद्गोत्रस्त्वमसिजबालातुनामाहमस्मिसत्यकामोनामत्वमसीतिससत्य
कामएवजाबालोब्रुवीथाइतिसहहारिद्रुमतंगौतममेत्योवाचब्रह्मचर्यंभग
वतिवत्स्याम्युपेयांभगवंतमितितंहोवाचकिंगोत्रोनुसोम्यासीतिसहोवाचनाह
मेतद्वेदभोयद्गोत्रोहमस्म्यपृच्छंमातरंसामाप्रत्यब्रवीद्बह्वहंचरंतीपरिचारि
णीयौवनेत्वामलभेसाहमेतन्नवेदयद्गोत्रस्त्वमसिजबालातुनामाहमस्मिस
त्यकामोनामत्वमसीतिसोहंसत्यकामोजाबालोस्मिभोइतितंहोवाचनैतद
ब्राह्मणोविवक्तुमर्हतिसमिधंसोम्याहरोपत्वानेष्येनसत्यादगाइतितमुप
नीयकृशानामबलानांचतुःशतागानिराकृत्योवाचेमाःसोम्यानुसंव्रजेतिता
अभिप्रस्थापयन्नुवाचनासहस्रेणावर्तेयेतिसहवर्षगणंप्रोवासतायदासह

॥छांदो॥

॥२८॥

स्रं संपेदुः ॥४॥ अथ हैनमृषभोऽभ्युवाद सत्यकामा३ इति भगव इति ह प्रतिशु
श्राव प्राप्ताः सोम्य सहस्रं स्मः प्रापय न आचार्यकुलं ब्रह्मणश्च ते पादं ब्रवाणी
ति ब्रवीतु मे भगवानिति तस्मै होवाच प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दि
क्कलोदीची दिक्कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम स य ए
तमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लो
के भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्र
काशवानित्युपास्ते ॥५॥ अग्निष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थाप
यांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिध
माधाय पश्चादग्नेः प्राङुपोपविवेश तमग्निरभ्युवाद सत्यकामा३ इति भगव

॥श्योप॥

॥रुद्रम॥

॥२८॥

३ न्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोऽनंतवानित्युपास्तेऽनंतवा

इति ह प्रतिशुश्राव ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवा
च पृथिवी कलांतरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽ
नंतवान्नस्मिंल्लोके भवत्यनंतवतो ह लोकान्जयति य एतमेवं विद्वांश्चतुष्कलं पादं
ब्रह्मणोऽनंतवानित्युपास्ते ॥६॥ हंसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्था
पयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमा
धाय पश्चादग्नेः प्राङुपोपविवेश तं हंस उपनिपत्याभ्युवाद सत्यकामा ३ इति
भगव इति ह प्रतिशुश्राव ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति त
स्मै होवाचाग्निः कला सूर्यः कला चंद्रः कला विद्युत्कलैष वै सोम्य चतुष्कलः पादो ब्र
ह्मणो ज्योतिष्मान्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपा

॥ छांदो ॥ ज्योतिष्मानस्मिंल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं [पादं] ब्र ज्योप॥
ह्मणो ज्योतिष्मानित्युपास्ते॥२
॥२९॥ स्तौ॥७॥ मद्गुष्टे पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभिसा
यं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङु
पोपविवेश ॥ तं मद्गुरुपनिपत्याभ्युवाद सत्यकामा३ इति भगव इति ह प्रतिशुश्रा
व ॥ ब्रह्मणः सोम्य ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला
चक्षुः कला श्रोत्रं कला मनः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मण आयतनवा ॥ कृष्ण ॥
न्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्त आयतन ॥२९॥
वानस्मिंल्लोके भवत्यायतनवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं
ब्रह्मण आयतनवानित्युपास्ते॥८॥ प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यका
मा३ इति भगव इति ह प्रतिशुश्राव ब्रह्मविदिव वै सोम्य भासि को नु त्वानुशास

सोन्येभ्योमनुष्येभ्यइतिहप्रतिजज्ञेभगवांस्त्वेवमेकामेब्रूयाच्छ्रुतंह्येवमेभ
गवद्दृशेभ्यआचार्याद्धैवविद्याविदितासाधिष्ठंप्रापदितितस्मैहैतदेवोवाचात्र
हनकिंचनवीयायेतिवीयायेति॥९॥उपकोसलोहवैकामलायनःसत्यकामेजा
बालेब्रह्मचर्यमुवासतस्यहद्वादशवर्षाण्यग्नीन्परिचचारसहस्मान्यानन्तेवा
सिनःसमावर्तयंस्तंहस्मैवनसमावर्तयतितंजायोवाचतप्तोब्रह्मचारीकु
शलमग्नीन्परिचचारीन्मात्वाग्नयःपरिप्रवोचन्प्रब्रूह्यस्माइतितस्मैहाप्रोच्यै
वप्रवासांचक्रेसहव्याधिनानशितुंदध्रेतमाचार्यजायोवाचब्रह्मचारिन्नशा
नकिंनुनाश्नासीतिसहोवाचबहवइमेस्मिन्पुरुषेकामानानात्ययाव्याधिभिःप्रति
पूर्णोस्मिनाशिष्यामीतिअथहाग्नयःसमूदिरेतप्तोब्रह्मचारीकुशलंनःपर्यचारीत्

॥छां दो॥

॥३॥

॥ग्योपु॥

हंतास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजाना
म्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव
खं तदेव कमिति प्राणं च हास्मै तदाकाशं चोचुः॥१०॥ अथ हैनं गार्हपत्योनुश
शास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोहमस्मि स ए
वाहमस्मीति स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्व
मायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयंत उप वयं तं भुंजामोऽस्मिं
श्च लोकेऽमुष्मिंश्च य एतमेवं विद्वानुपास्ते॥११॥ अथ हैनमन्वाहार्यपचनोऽ
नुशशासापो दिशो नक्षत्राणि चंद्रमा इति य एष चंद्रमसि पुरुषो दृश्यते सो
हमस्मि स एवाहमस्मीति स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी

॥रुरु॥

॥३०॥

भवति सर्वमायुरेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयंत उप वयं तं भुंजामोऽस्मिं
श्च लोके मुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥१२॥ अथ हैनमाहवनीयो नुश
शास प्राण आकाशो द्यौर्विद्युदिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स ए
वाहमस्मीति स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायु
रेति ज्योग्जीवति नास्यावरपुरुषाः क्षीयंत उप वयं तं भुंजामोऽस्मिं स्मिंश्च लोके
मुष्मिंश्च य एतमेवं विद्वानुपास्ते ॥१३॥ ते होचुरुपकोसलैषा सोम्य तेऽस्मद्विद्या
त्मविद्या चाचार्यस्तु ते गतिं वक्तेत्याजगाम हास्याचार्यस्तमाचार्योऽभ्युवादोपकोसला३
इति भगव इति ह प्रतिशुश्राव ब्रह्मविद इव सोम्य ते मुखं भाति को नु त्वानुशशा
सेति को नु माऽनुशिष्याद्भो३ इतीहापेव निह्नुत इमे नूनमीदृशा अन्यादृशा इती

हाग्नीनम्यदे किंनु सोम्य किल तेऽवोचन्नितीदमितिह प्रतिजज्ञे लोकान्वाव किल सो
म्य तेऽवोचन्नहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यंत एवमेवंविदि
पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै होवाच ॥१४॥ य एषोऽक्षिणि पु
रुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिंत्सर्पि
र्वोदकं वा सिंचति वर्त्मनी एव गच्छत्येतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वा
मान्यभिसंयंति सर्वाण्येनं वामान्यभिसंयंति य एवं वेदैष उ एव वामनीरेष हि स
र्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेदैष उ एव भामनीरेष हि स
र्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेदाथ यदु चैवास्मिंछव्यं कुर्वंति
यदि च नार्चिषमेवाभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षा

स ५
॥रुद्रस॥

धान्मदुदडुतिमासाꣳस्तान्मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चंद्रमसं
चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवपथो ब्रह्मपथ एते
न प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंते नावर्त्तंते ॥१५॥ एष ह वै यज्ञो योऽयं प
वते एष ह यन्निदꣳ सर्वं पुनाति यदेष यन्निदꣳ सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य
मनश्च वाक्च वर्त्तनी तयोरन्यतरां मनसा संꣳस्करोति ब्रह्मा वाचा होताऽध्वर्यु
रुद्गाताऽन्यतराꣳ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यवदत्य
न्यतरामेव वर्त्तनीꣳ संꣳस्करोति हीयतेऽन्यतरा स यथैकपाद्व्रजन्रथो वैकेन च
क्रेण वर्त्तमानो रिष्यत्येवमस्य यज्ञो रिष्यति यज्ञꣳ रिष्यंतं यजमानोऽनुरिष्यति स
इष्ट्वा पापीयान्भवत्यथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्य

।।छांदो।।

।।३२।।

ववदत्युभे एव वर्त्तनी संस्कुर्वंति न हीयतेन्यतरा स यथोभयपाद्व्रजन्रथो वोभा
भ्यां चक्राभ्यां वर्त्तमानः प्रतितिष्ठत्येवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठंतं यज
मानोनुप्रतितिष्ठति स इष्ट्वा श्रेयान्भवति ।।१६।। प्रजापतिर्लोकानभ्यतपत्तेषां
तप्यमानानां रसान्प्रावृहदग्निं पृथिव्या वायुमंतरिक्षादादित्यं दिवः स एतास्ति
स्रो देवता अभ्यतपत्तासां तप्यमानानां रसान्प्रावृहदग्नेरृचो वायोर्यजूंषि
सामान्यादित्यात्स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृह
द्भूरित्यृग्भ्यो भुवरिति यजुर्भ्यः स्वरिति सामभ्यः स यद्यृक्तो रिष्येद्भूः स्वाहेति गार्हप
त्ये जुहुयादृचामेव तद्रसेनर्चां वीर्येणर्चां यज्ञस्य विरिष्टं संदधाति अथ यदि य
जुष्टो रिष्येद्भुवः स्वाहेति दक्षिणाग्नौ जुहुयाद्यजुषामेव तद्रसेन यजुषां वीर्येण

।।ग्योप।।

।।रुदम।।

।।३२।।

184

यजुषांयस्यविरिष्टंसंदधात्यथयदिसामतोरिष्येत्स्वाहेत्याहवनीयेजु
हुयात्साम्नामेवतद्रसेनसाम्नांवीर्येणसाम्नांयज्ञस्यविरिष्टंसंदधातित
द्यथालवणेनसुवर्णंसंदध्यात्सुवर्णेनरजतंरजतेनत्रपुत्रपुणासीसं
सीसेनलोहंलोहेनदारुदारुचर्मणैवमेषांलोकानामासांदेवतानामस्यास्त्र
य्याविद्यायावीर्येणयज्ञस्यविरिष्टंसंदधातिभेषजकृतोहवाएषयज्ञोयत्रै
वंविद्ब्रह्माभवत्येषहवाउदक्प्रवणोयज्ञोयत्रैवंविद्ब्रह्माभवत्येवंविदंहं
हवाएषाब्रह्माणमनुगाथायतोयतआवर्त्ततेतत्तद्गच्छतिमानवोब्रह्मैवैक
र्त्विक्कुरूनश्वाभिरक्षत्येवंविद्धवैब्रह्मायज्ञंयजमानंसर्वांश्चर्त्विजोभिर
क्षतितस्मादेवंविदमेवब्रह्माणंकुर्वीतनानेवंविदंनानेवंविदं॥१०॥ ॥इतिछां

॥छांदो॥

॥३३॥

दोग्योपनिषदि चतुर्थः प्रपाठकः ॥ ॥४॥ ॥ हरिः ॐ ॥ ॥ यो ह वै ज्येष्ठं च श्रे
ष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च यो ह वै वसि
ष्ठं वेद वसिष्ठो ह स्वानां भवति वाग्वाव वसिष्ठो यो ह वै प्रतिष्ठां वेद प्रतिँ तिष्ठत्य
स्मिन्नमुष्मिंश्चक्षुर्वाव प्रतिष्ठा यो ह वै संपदं वेद सꣳ हास्मै कामाः पद्यंते दैवा
श्च मानुषाश्च श्रोत्रं वाव संपद्यो ह वा आयतनं वेदायतनꣳ ह स्वानां भवति
मनो ह वा आयतनमथ ह प्राणा हꣳ श्रेयसि व्यूदिरे हꣳ श्रेयानस्म्यहꣳ श्रेया
नस्मीति ते ह प्राणाः प्रजापतिं पितरमेत्योचुर्भगवन्को नः श्रेष्ठ इति तान्होवा
च यस्मिन्व उत्क्रांते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति सा ह वागु
च्चक्राम सा संवत्सरं प्रोष्य पर्येत्योवाच कथमशकत मदृते जीवितुमिति य

॥ग्योप॰॥

हर

॥रुद्र॥

॥३३॥

श्वस्कृणां

थाबालाअवदंतः प्राणंतः प्राणेन पश्यंतश्चक्षुषा शृण्वंतः श्रोत्रेण ध्यायंतो
मनसैवमितिप्रविवेशहवाक् चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यपर्येत्योवाच
कथमशकततेमज्जीवितुमितियथांऽधा अपश्यंतः प्राणंतः प्राणेन वदंतो
वाचाशृण्वंतः श्रोत्रेण ध्यायंतोमनसैवमितिप्रविवेशह चक्षुः श्रोत्रंहोच्चक्रा
मतत्संवत्सरंप्रोष्यपर्येत्योवाचकथमशकततेमज्जीवितुमितियथाबधिराअ
शृण्वंतः प्राणंतः प्राणेन वदंतोवाचापश्यंतश्चक्षुषा ध्यायंतोमनसैवमितिप्र
विवेशह श्रोत्रंमनोहोच्चक्राम तत्संवत्सरं प्रोष्यपर्येत्योवाचकथमशकततेम
ज्जीवितुमितियथाबालाअमनसः प्राणंतः प्राणेन वदंतोवाचापश्यंतश्चक्षु
षाशृण्वंतः श्रोत्रेणैवमितिप्रविवेशहमनोऽथहप्राणउच्चिक्रमिषन्सयथा

॥छांदो॥

॥३४॥

सुहयः पड्वीशशंकून् संखिदेदेवमितरान्प्राणान्समखिदत्तं हाभिसमेत्योचु
र्भगवन्नेधि त्वं नः श्रेष्ठोसि मोत्क्रमीरित्यथ हैनं वागुवाच यदहं वसिष्ठोस्मि त्वं
तद्वसिष्ठोसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीत्यथ हैनं
श्रोत्रमुवाच यदहं संपदस्मि त्वं तत्संपदसीत्यथ हैनं मन उवाच यदहमा
यतनमस्मि त्वं तदायतनमसीति न वै वाचो न चक्षूंषि न श्रोत्राणि म
नांसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवति॥१॥स हो
वाच किं मेऽन्नं भविष्यतीति यत्किंचिदिदमाश्वभ्य आ शकुनिभ्य इति होचु
स्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भव
तीति स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यं

॥ग्योप॥

॥कृष्ण॥

॥३४॥

तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लंभुको ह वासो भवत्यनग्नो ह भवति तद्धै
तत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येतच्छुष्काय स्था
णवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीत्यथ यदि महज्जिगमि
षेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मंथं दधिमधुनोरुपम
थ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेद्वसिष्ठाय
स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य
हुत्वा मंथे संपातमवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवन
येदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मंथे संपातमवनयेदथ प्रतिसृप्यां
जलौ मंथमादाय जपत्यमो नामास्यमा हि ते सर्वमिदं स हि ज्येष्ठः श्रेष्ठो राजा

धर्ा

॥ग्योप॥

॥छांदो॥

॥३५॥

धिपतिः समाज्ये श्रैष्ठ्यं राज्यमाधिपत्यं गमयत्वहमेवेदं सर्वसमानीत्य
थ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भो
जनमित्याचामति श्रेष्ठं सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं
पिबति निर्णिज्य कंसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा
वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्समृद्धं कर्मेति विद्यात्तदेष श्लोको यदा
कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्श
ने तस्मिन्स्वप्ननिदर्शने ॥२॥ श्वेतकेतुर्हारुणेयः पंचालानां समितिमेयाय
तं ह प्रवाहणो जैवलिरुवाच कुमारानु त्वाशिषत्पितेत्यनु हि भगव इति वे
त्थ यदितोऽधि प्रजाः प्रयंतीति न भगव इति वेत्थ यथा पुनरावर्तंता३ इति न

॥कृष्ण॥

॥३५॥

भगवइतिवेत्थपथोर्देवयानस्यपितृयानस्यचव्यावर्त्तना३इतिनभगवइति
वेत्थयथासौलोकोनसंपूर्यता३इतिनभगवइतिवेत्थयथापंचम्यामाहुतावा
पःपुरुषवचसोभवंतीतिनैवभगवइत्यथानुकिमनुशिष्टोऽवोचथायोही
मानिनविद्यात्कथंसोनुशिष्टोब्रुवीतेतिसहायस्तःपितुरर्धमेयायतंहो
वाचाननुशिष्यवावकिलमाभगवानब्रवीदनुत्वाशिषमितिपंचमाराजन्य
बंधुःप्रश्नानप्राक्षीत्तेषांनैकंचनाशकंविवक्तुमितिसहोवाचयथामात्वंत
देतानवोचोयथाहमेषांनैकंचनवेदयद्यहमिमानवेदिष्यंकथंतेनावक्ष्यमि
तिसहगौतमोराज्ञोर्धमेयायतस्मैहप्राप्तायार्हांचकारसहप्रातःसभागउदे
यायतंहोवाचमानुषस्यभगवन्गौतमवित्तस्यवरंवृणीथाइतिसहोवाच

।।छांदो।।

।।३६।।

यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान्गच्छति तस्मादु
सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ।।३।। असौ वाव लो
को गौतमाग्निस्तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिश्चंद्रमा अंगारा नक्षत्रा
णि विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सो
मो राजा संभवति ।।४।। पर्जन्यो वाव गौतमाग्निस्तस्य वायुरेव समिदभ्रं धूमो
विद्युदर्चिरशनिरंगारा ह्रादनयो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं
राजानं जुह्वति तस्या आहुतेर्वर्षं संभवति ।।५।। पृथिवी वाव गौतमाग्निस्त
स्याः संवत्सर एव समिदाकाशो धूमो रात्रिरर्चिर्दिशोंऽगारा अवांतरदिशो विस्फु
लिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नं संभवति ।।६।।

।।ग्योप।।

।।रुद्र।।

।।३६।।

192

पुरुषोवावगोतमाग्निस्तस्यवागेवसमित्प्राणोधूमोजिह्वार्चिश्चक्षुरंगाराःश्रो
त्रंविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौदेवाअन्नंजुह्वतितस्याआहुतेरेतःसंभव
ति॥७॥योषावावगोतमाग्निस्तस्याउपस्थएवसमिद्यदुपमंत्रयतेसधूमो
योनिरर्चिर्यदंतःकरोतितेअंगाराअभिनंदाविस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ
देवारेतोजुह्वतितस्याआहुतेर्गर्भःसंभवति॥८॥इतितुपंचम्यामाहुतावापः
पुरुषवचसोभवंतीतिसउल्बावृतोगर्भोदशवामासानंतःशयित्वायावद्वाथजा
यतेसजातोयावदायुषंजीवतितंप्रेतंदिष्टमितोऽग्नयएवहरंतियतएवेतोयतः
संभवति॥९॥तद्यइत्थंविदुर्येचेमेऽरण्येश्रद्धातपइत्युपासतेतेऽर्चिषमभिसं
भवंत्यर्चिषोऽहरह्नआपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङेतिमासां

स्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पु
रुषोमानवः स एतान्ब्रह्म गमयत्येष देवयानः पंथा इत्यथ य इमे ग्राम इष्टापूर्ते
दत्तमित्युपासते ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षा
द्यान्षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलो
कं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं देवा
भक्षयंति तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तंते यथेतमा
काशमाकाशाद्वायुं वायुर्भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्ति
लमाषा इति जायंतेऽतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिंचति त
द्भूय एव भवति तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमाप

वै २

द्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणा अ
भ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चांडालयोनिं वा
थैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवं
ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते तस्माज्जुगु
प्सेत तदेष श्लोकः स्तेनो हिरण्यस्य सुरां पिबंश्च गुरोस्तल्पमावसन्ब्रह्महा
चैते पतंति चत्वारः पंचमश्चाचरंस्तैरिति अथ ह य एतानेवं पंचाग्नीन्वेद न सह
तैरप्याचरन्पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वे
द ॥१०॥ प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिंद्रद्युम्नो भाल्लवेयो
जनः शार्कराक्ष्यो बुडिल आश्वतराश्विस्ते हैते महाशाला महाश्रोत्रियाः समेत्य

195

मीमांसांचक्रुः कोन आत्मा किंब्रह्मेतितेह संपादयांचक्रुरुद्दालको वै भग
वंतोयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येतितंहंताभ्या गच्छामेति
तंहाभ्याजग्मुः सह संपादयांचकार प्रक्ष्यंतिमामिमे महाशाला महाश्रोत्रि
यास्तेभ्यो न सर्वं प्रतिपत्स्ये हंताहमन्यमभ्यनुशासानीतितान्होवाचाश्वपतिर्वै
भगवंतोयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येतितंहंताभ्यागच्छामे
तितंहाभ्याजग्मुस्तेह प्राप्तेभ्यः पृथगर्हाणि कारयांचकार स ह प्रातः संजिहा
नउवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान्नस्वैरी
स्वैरिणी कुतो यक्ष्यमाणो वै भगवंतोहमस्मि यावदेकैकस्मा ऋत्विजे धनंदा
स्यामि तावद्भगवद्भ्यो धनं दास्यामि वसंतु भगवंत इति ते होचुर्येन हैवार्थेन

॥हरु॥ ॥३८॥

पुरुषश्चरेत्तं हैव वदेदात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति ता
न्होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानु
पनीयैवैतदुवाच ॥ ११ ॥ औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो
राजन्निति होवाचैष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त
व सुतं प्रसुतमासुतं कुले दृश्यते ऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं

घ३

भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्द्धा त्वेष आत्म
न इति होवाच मूर्द्धा ते व्यपतिष्यद्यन्मां नागमिष्य इति ॥ १२ ॥ अथ होवाच सत्यय
ज्ञं पौलुषिं प्राचीनयोग्य कं त्वमात्मानमुपास्स इत्यादित्यमेव भगवो राजन्निति
होवाचैष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु

॥छांदो॥ ॥ग्योप॰॥

॥२९॥

विश्वरूपं कुले दृश्यते प्रवृत्तोऽश्वतरीरथो दासी निष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्य
न्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते
चक्षुष्ट्वेतदात्मन इति होवाचांधोऽभविष्यद्यन्मां नागमिष्य इति ॥२॥ अथ होवा
चेंद्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इति वायुमेव भगवो रा
जन्निति होवाचैष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृ
थग्बलय आयंति पृथग्रथश्रेणयोऽनुयंत्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं
पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्रा
णस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यद्यन्मां नागमिष्य इति ॥१४॥
अथ होवाच जनं शार्कराक्ष्य शार्कराक्ष्य कं त्वमात्मानमुपास्स इत्याकाश

॥रुद्र॥

॥२९॥

मेव भगवो राजन्निति होवाचैष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपा
स्से तस्मात्त्वं बहुलोसि प्रजया च धनेन चात्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्य
ति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेह
स्त्वेष आत्मन इति होवाच संदेहस्ते व्यशीर्यद्यन्मां नागमिष्य इति ॥५॥ अथ
होवाच बुडिलमाश्वतराश्विं वैयाघ्रपद्य कं त्वमात्मानमुपास्स इत्यप एव भग
वो राजन्निति होवाचैष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं
रयिमान्पुष्टिमानस्यत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्म
वर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच
बस्तिस्ते व्यभेत्स्यद्यन्मां नागमिष्य इति ॥६॥ अथ होवाचोद्दालकमारुणिं

गौतम कं त्वमात्मानमुपास्स इति पृथिवीमेव भगवो राजन्निति होवाचैष वै प्र
तिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोसि प्रजया च पशु
भिश्चात्स्यन्नं पश्यसि प्रियमत्स्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य
एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्ला
स्येतां यन्मां नागमिष्य इति ॥१७॥ तान्होवाचैते वै खलु यूयं पृथगिवेममा
त्मानं वैश्वानरं विद्वांसोन्नमत्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मा
नं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य
ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्व
र्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि ब

॥[illegible]॥
॥४०॥

र्हि हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः॥१॥ स यद्भक्तं प्रथ
ममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात्प्राणाय स्वाहे
ति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये
तृप्यति द्यौस्तृप्यति दिवि तृप्यंत्यां यत्किंच द्यौश्चादित्यश्चाधितिष्ठतस्तत्तृप्यति
तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥१॥ अ
थ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति व्याने तृप्यति श्रो
त्रं तृप्यति श्रोत्रे तृप्यति चंद्रमास्तृप्यति चंद्रमसि तृप्यति दिशस्तृप्यंति दिक्षु तृ
प्यंतीषु यत्किंच दिशश्च चंद्रमाश्चाधितिष्ठंति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्र
जया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति॥२॥ अथ यां तृतीयां जुहुयात्तां जु

॥छांदो॥ ॥४१॥

हुयादपानायस्वाहेत्यपानस्तृप्यत्यपानेतृप्यतिवाक्तृप्यतिवाचितृप्यंत्यामग्नि
स्तृप्यत्यग्नौतृप्यतिपृथिवीतृप्यतिपृथिव्यांतृप्यंत्यांयत्किंचपृथिवीचाग्निश्चा
धितिष्ठतस्तत्तृप्यतितस्यानुतृप्तिंतृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्र
ह्मवर्चसेनेति॥२०॥अथयांचतुर्थींजुहुयात्तांजुहुयात्समानायस्वाहेतिस
मानस्तृप्यतिसमानेतृप्यतिपर्जन्यस्तृप्यतिपर्जन्येतृप्यतिविद्युत्तृप्यतिवि
द्युतितृप्यंत्यांयत्किंचविद्युच्चपर्जन्यश्चाधितिष्ठतस्तत्तृप्यतितस्यानुतृप्तिं
तृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसेनेति॥२१॥अथयांपंचमीं
जुहुयात्तांजुहुयादुदानायस्वाहेत्युदानस्तृप्यत्युदानेतृप्यतिवायुस्तृप्यति
वायौतृप्यत्याकाशस्तृप्यत्याकाशेतृप्यतियत्किंचवायुश्चाकाशश्चाधितिष्ठ

न्योप॰ ॥हरि॥ ॥४१॥

तस्तत्प्यतितस्यानुतृप्तिंतृप्यतिप्रजयापशुभिरन्नाद्येनतेजसाब्रह्मवर्चसे
नेति॥२३॥सयइदमविद्वानग्निहोत्रंजुहोतियथांगारानपोह्यभस्मनिजुहु
यात्तादृक्तत्स्यादथयएतदेवंविद्वानग्निहोत्रंजुहोतितस्यसर्वेषुलोकेषुसर्वे
षुभूतेषुसर्वेष्वात्मसुहुतमभवतितद्यथेषीकातूलमग्नौप्रोतंप्रदूयेतैवंहा
स्यसर्वेपाप्मानःप्रदूयंतेयएतदेवंविद्वानग्निहोत्रंजुहोतितस्मादुहैवंविद्यद्य
पिचंडालायोच्छिष्टंप्रयच्छेदात्मनिहैवास्यतद्वैश्वानरेहुतंस्यादितितदेषः
श्लोकःयथेहक्षुधिताबालामातरंपर्युपासतएवंसर्वाणिभूतान्यग्नि
होत्रमुपासतइत्यग्निहोत्रमुपासतइति॥२४॥ ॥इतिछांदोग्योपनिषदि
पंचमःप्रपाठकः॥५॥ ॥हरिःॐ॥ ॥श्वेतकेतुर्हारुणेयआसतंह

॥ छांदो ॥

॥ ४२ ॥

॥ उप ॥

पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबंधुरि
व भवतीति स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महाम
ना अनूचानमानी स्तब्ध एयाय तं ह पितोवाच श्वेतकेतो यन्नु सोम्येदं महामना
अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मत
मविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवतीति यथा सोम्यैकेन
मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव
सत्यं यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारंभणं वि
कारो नामधेयं लोहमित्येव सत्यं यथा सोम्यैकेन नखनिकृंतनेन सर्वं कार्ष्णा
यसं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं कृष्णायसमित्येव सत्यमेवं

॥ रुद्र ॥

॥ ४२ ॥

सोम्य स आदेशो भवतीति न वै नूनं भगवंतस्त एतदवेदिषुर्यद्ध्येतदवेदिष्यन्क
थं मे नावक्ष्यन्निति भगवांस्त्वेव मे तद्ब्रवीत्विति तथा सोम्येति होवाच ॥१॥ सदे
व सोम्येदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहुरसदेवेदमग्र आसीदेकमे
वाद्वितीयं तस्मादसतः सज्जायत कुतस्तु खलु सोम्यैवं स्यादिति होवाच क
थमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ॥२॥ तदैक्ष
त बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तद
पोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदध्यापो जायं
ते ता आप ऐक्षंत बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजंत तस्माद्यत्र क्व च
वर्षति तदेव भूयिष्ठमन्नं भवत्यद्भ्य एव तदध्यन्नाद्यं जायते ॥२॥ तेषां खल्वे

205

॥छांदो॥ ॥न्योप॥

॥४३॥

षां भूतानां त्रीण्येव बीजानि भवंत्यांडजं जीवजमुद्भिज्जमिति सेयं देवतैक्षत हं
ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी
ति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अने
नैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत्तासां त्रिवृतं त्रिवृतमेकैकामक
रोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे वि
जानीहीति ॥३॥ यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं त
दन्नस्यापागादग्नेरग्नित्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव
सत्यं यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्न
स्यापागादादित्यादादित्यत्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव

॥कृष्ण॥

॥४३॥

सत्यं यच्चंद्रमसो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य
पागाच्चंद्राच्चंद्रत्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं यद्वि
द्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्यु
तो विद्युत्त्वं वाचारंभणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमेतद्ध स्म
वै तद्विद्वांस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोद्य कश्चनाश्रुतमम
तमविज्ञातमुदाहरिष्यतीति ह्येभ्यो विदांचक्रुर्यदु रोहितमिवाभूदिति तेजस
स्तद्रूपमिति तद्विदांचक्रुर्यदु शुक्लमिवाभूदित्यपां रूपमिति तद्विदांचक्रुर्य
दु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदांचक्रुर्यद्वविज्ञातमिवाभूदित्येता
सामेव देवतानां समास इति तद्विदांचक्रुर्यथा तु खलु सोम्येमास्तिस्रो देवताः

207

||छांदो||

||४६||

पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ||४|| अन्नमशितं त्रेधा वि
धीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं यो ऽणिष्ठ
स्तन्मनः आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो
मध्यमस्तल्लोहितं यो ऽणिष्ठः स प्राणः तेजो ऽशितं त्रेधा विधीयते तस्य यः स्थवि
ष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा यो ऽणिष्ठः सा वाक् अन्नमयं हि सो
म्य मनः आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्वि
ति तथा सोम्येति होवाच ||५|| दध्नः सोम्य मथ्यमानस्य यो ऽणिमा स ऊर्ध्वः समु
दीषति तत्सर्पिर्भवत्येवमेव खलु सोम्यान्नस्याश्यमानस्य यो ऽणिमा स ऊर्ध्वः
समुदीषति तन्मनो भवत्यपां सोम्य पीयमानानां यो ऽणिमा स ऊर्ध्वः समुदी

||श्योप||

||हरिः||

||४४||

षति स प्राणो भवति तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वा
ग्भवत्यन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भग
वान्विज्ञापयत्विति तथा सोम्येति होवाच ॥६॥ षोडशकलः सोम्य पुरुषः पंचदशा
हानि माऽशीः काममपः पिबापोमयः प्राणो न पिबतो विच्छेत्स्यत इति स ह पंचदशा
हानि नाशाथ हैनमुपससाद किं ब्रवीमि भो इत्यृचः सोम्य यजूंषि सामानीति न
वै मा प्रतिभान्ति भो इति तं होवाच यथा सोम्य महतोऽभ्याहितस्यैकोऽङ्गारः खद्यो
तमात्रः परिशिष्टः स्यात्तेन ततोऽपि न बहु दहेदेवं सोम्य ते षोडशानां कलाना
मेका कलाऽतिशिष्टा स्यात्तयैतर्हि वेदान्नानुभवस्यशानाथ मे विज्ञास्यसीति स ह
शाथ हैनमुपससाद तं ह यत्किंच पप्रच्छ सर्वं ह प्रतिपेदे तं होवाच यथा सो

॥छांदो॰॥

॥४५॥

म्यमहतोऽभ्याहितस्यैकमंगारंखद्योतमात्रंपरिशिष्टंतंतृणैरुपसमाधायप्राज्व
लयेत्तेनततोऽपिबहुदहेदेवंसोम्यतेषोडशानांकलानामेकाकलाऽतिशिष्टाऽ
भूत्साऽन्नेनोपसमाहिताप्राज्वालीत्तयैतर्हिवेदाननुभवस्यन्नमयंहिसोम्य
मनआपोमयःप्राणस्तेजोमयीवागितितद्धास्यविजज्ञावितिविजज्ञाविति॥७॥
॥अ॰६॥प्रपाठकः॥ ॥उद्दालकोहारुणिःश्वेतकेतुंपुत्रमुवाचस्वप्नांतंमेसोम्यवि
जानीहीतियत्रैतत्पुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवतिस्वमपीतोभ
वतितस्मादेनंस्वपितीत्याचक्षतेस्वंह्यपीतोभवतिसयथाशकुनिःसूत्रेणप्र
बद्धोदिशंदिशंपतित्वाऽन्यत्रायतनमलब्ध्वाबंधनमेवोपश्रयतएवमेवखलु
सोम्यतन्मनोदिशंदिशंपतित्वाऽन्यत्रायतनमलब्ध्वाप्राणमेवोपश्रयतेप्राण

॥४५॥

बंधनं हि सोम्य मन इत्यशनापिपासे मे सोम्य विजानीहीति यत्रैतत्पुरुषोऽशि
शिषति नामाप एव तदशितं नयंते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्ये
वं तदप आचक्षतेऽशनायेति तत्रैतच्छुंगमुत्पतितं सोम्य विजानीहि नेदम
मूलं भविष्यतीति तस्य क्व मूलं स्यादन्यत्रान्नादेवमेव खलु सोम्यान्नेन शुंगे
नापो मूलमन्विच्छाद्भिः सोम्य शुंगेन तेजो मूलमन्विच्छ तेजसा सोम्य शुंगेन स
न्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा अथ यत्रै
तत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुष
नाय इत्येवं तत्तेज आचष्ट उदन्येति तत्रैतदेव शुंगमुत्पतितं सोम्य विजानीहि
नेदममूलं भविष्यतीति तस्य क्व मूलं स्यादन्यत्राद्भ्योऽद्भिः सोम्य शुंगेन तेजो

॥छांदो॥

॥४६॥

मूलमन्विच्छ तेजसा सोम्य शुंगेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः
सदायतनाः सत्प्रतिष्ठा यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रि
वृदेकैका भवति तदुक्तं पुरस्तादेव भवत्यस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सं
पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां स य एषोऽणिमैतदात्म्य
मिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञा
पयत्विति तथा सोम्येति होवाच ॥८॥ यथा सोम्य मधु मधुकृतो निस्तिष्ठंति नानात्य
यानां वृक्षाणां रसान्समवहारमेकतां रसं गमयंति ते यथा तत्र न विवेकं लभं
तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्येमाः
सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति त इह व्याघ्रो वा सिंहो वा

॥ग्योप॥

॥रुद्र॥

॥४६॥

ह्रो वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंति स य ए
षोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय ए
व मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥ इमाः सोम्य नद्यः पुरस्ता
त्प्राच्यः स्यंदंते पश्चात्प्रतीच्यस्ताः समुद्रात्समुद्रमेवापियंति स समुद्र एव भवति
ता यथा तत्र न विदुरियमहमस्मीयमहमस्मीति एवमेव खलु सोम्येमाः सर्वाः प्रजाः
सत आगम्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिंहो वा वृको वा वरा
हो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवंति तदाभवंति स य एषोऽणि
मैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भग
वान्विज्ञापयत्विति तथा सोम्येति होवाच ॥१॥ अस्य महतो वृक्षस्य यो मूलेऽभ्या
सोम्य

हन्याज्जीवंस्रवेद्यो मध्येऽभ्याहन्याज्जीवंस्रवेद्योऽग्रेऽभ्याहन्याज्जीवंस्रवेत्स एष
जीवेनात्मनाऽनुप्रभूतः पेपीयमानो मोदमानस्तिष्ठत्यस्य यदेकां शाखां जीवो ज
हात्यथ सा शुष्यति द्वितीयां जहात्यथ सा शुष्यति तृतीयां जहात्यथ सा शुष्यति स
र्वं जहाति सर्वः शुष्यत्येवमेव खलु सोम्य विद्धीति होवाच जीवापेतं वाव किलेदं म्रि
यते न जीवो म्रियत इति स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा
तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥३॥
न्यग्रोधफलमत आहरेतीदं भगव इति भिन्धीति भिन्नं भगव इति किमत्र पश्यसी
त्यण्व्य इवेमा धाना भगव इत्यासामङ्गैकां भिन्धीति भिन्ना भगव इति किमत्र पश्यसी
ति न किंचन भगव इति तं होवाच यं वै सोम्यैतमणिमानं न निभालयस एतस्य

वै सोम्यैषोऽणिम्न एवं महान्न्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति स य एषोऽणिमैतदात्म्यमि
दꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्वि
ति तथा सोम्येति होवाच ॥ १२ ॥ लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति
स ह तथा चकार तꣳ होवाच यद्दोषा लवणमुदकेऽवाधा अंग तदाहरेति तद्धावमृश्य
न विवेद यथा विलीनमेवांगास्यान्तादाचामेति कथमिति लवणमिति मध्यादाचा
मेति कथमिति लवणमित्यन्तादाचामेति कथमिति लवणमित्यभिप्रास्यैतदथ मोपसी
दथा इति तद्ध तथा चकार तच्छश्वत्संवर्त्तते तꣳ होवाचात्र वाव किल सत्सोम्य न निभा
लयसेऽत्रैव किलेति स य एषोऽणिमैतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि
श्वेतकेतो इति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥ १३ ॥ यथा

॥छांदो॥ ॥ग्योप०॥

॥४८॥ सोम्यपुरुषंगंधारेभ्योऽभिनद्धाक्षमानीयतंततोऽतिजनेविसृजेत्सयथातत्रप्राङ्वो
दङ्वाधराङ्वाप्रध्मायीताभिनद्धाक्षआनीतोऽभिनद्धाक्षोविसृष्टःस्तस्ययथाऽभिनह
नंप्रमुच्यप्रब्रूयादेतांदिशंगंधाराएतांदिशंव्रजेतिसग्रामाद्ग्रामंपृच्छन्पंडितोमेधा
वीगंधारानेवोपसंपद्येतैवमेवेहाचार्यवान्पुरुषोवेदतस्यतावदेवचिरंयावन्नवि
मोक्ष्येऽथसंपत्स्यइतिसयएषोऽणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्व
मसिश्वेतकेतोइतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच॥१४॥ ॥हृदम॥
पुरुषंसोम्योपतापिनंज्ञातयःपर्युपासतेजानासिमांजानासिमामितितस्ययावन्न ॥४८॥
वाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायांतावज्जानात्यथ
यदाऽस्यवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायामथ

नजानातिसयएषोणिमैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मातत्त्वमसिश्वेतकेतो
इतिभूयएवमाभगवान्विज्ञापयत्वितितथासोम्येतिहोवाच॥१५॥पुरुषꣳसोम्यो
तहस्तगृहीतमानयंत्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मैतपतेतिसयदितस्य
कर्ताभवतिततएवानृतमात्मानंकुरुतेसोऽनृताभिसंधोऽनृतेनात्मानमंतर्धा
यपरशुंतप्तंप्रतिगृह्णातिसदह्यतेऽथहन्यतेऽथयदितस्याकर्ताभवतिततस एव५
त्यमात्मानंकुरुतेसत्याभिसंधःसत्येनात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णातिस
नदह्यतेऽथमुच्यतेसयथातत्रनदाह्येतैतदात्म्यमिदꣳसर्वंतत्सत्यꣳसआत्मा
तत्त्वमसिश्वेतकेतोइतितद्धास्यविजज्ञाविति विजज्ञाविति॥१६॥ ॥इतिछांदो
ग्योपनिषदिषष्ठःप्रपाठकः॥ ॥६॥ ॥हरिः ॐ॥ ॥अधीहिभगवइतिहोपस

साद सनत्कुमारं नारदस्तꣳ होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति
स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहास
पुराणं पंचमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्र
ह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यामेतद्भगवोऽध्येमि
सोऽहं भगवो मंत्रविदेवास्मि नात्मविच्छ्रुतꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोक
मात्मविदिति सोऽहं भगवः शोचामि तं मा भगवाञ्छोकस्य पारं तारयत्विति तꣳ हो
वाच यद्वै किंचैतदध्यगीष्ठा नामैवैतन्नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथ
र्वणश्चतुर्थ इतिहासपुराणः पंचमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाको
वाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेव

॥ रुद्रम ॥
॥४९॥

यथा२

जनविद्यां नाम मे वै तन्नाम्नोपास्स्वेति स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥१॥ वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पंचमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवांश्च मनुष्यांश्च पशूंश्च वयांसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाङ्नाभविष्यन्न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं

॥छांदो॥

॥५०॥

नसाधुनासाधुनहृदयज्ञोनाहृदयज्ञोवागेवैतत्सर्वंविज्ञापयतिवाचमुपास्स्वे
तिसयोवाचंब्रह्मेत्युपास्तेयावद्वाचोगतंतत्रास्ययथाकामचारोभवतियोवाचं
ब्रह्मेत्युपास्तेऽस्तिभगवोवाचोभूयइतिवाचोवावभूयोऽस्तीतितन्मेभगवान्ब्र
वीत्विति॥२॥मनोवाववाचोभूयोयथावैद्वेवामलकेद्वेवाकोलेद्वौवाक्षौमुष्टि
रनुभवत्येवंवाचंचनामचमनोऽनुभवतिसयदामनसामनस्यतिमंत्रान
धीयीयेत्यथाधीतेकर्माणिकुर्वीयेत्यथकुरुतेपुत्रांश्चपशूंश्चेच्छेयेत्य
थेच्छतइमंचलोकममुंचेच्छेयेत्यथेच्छतेमनोह्यात्मामनोहिलोकोमनोहि
ब्रह्ममनउपास्स्वेतिसयोमनोब्रह्मेत्युपास्तेयावन्मनसोगतंतत्रास्ययथाका
मचारोभवतियोमनोब्रह्मेत्युपास्तेऽस्तिभगवोमनसोभूयइतिमनसोवा

॥ग्योप॥

॥कृष्ण

॥५०॥

वभूयोस्तीतितन्मेभगवान्ब्रवीत्विति॥३॥संकल्पोवावमनसोभूयान्यदावैसंक
ल्पयतेऽथमनस्यत्यथवाचमीरयतितामुनाम्नीरयतिनाम्निमंत्राएकंभवं
तिमंत्रेषुकर्माणि॥१॥तानिहवाएतानिसंकल्पैकायनानिसंकल्पात्मानिसंकल्पेप्र
तिष्ठितानिसमकॢपतांद्यावापृथिवीसमकल्पेतांवायुश्चाकाशंचसमक
ल्पंतामापश्चतेजश्चतेषांसंकॢप्त्यैवर्षंसंकल्पतेवर्षस्यसंकॢप्त्याअन्नंसं
कल्पतेऽन्नस्यसंकॢप्त्यैप्राणाःसंकल्पंतेतेषांसंकॢप्त्यैमंत्राःसंकल्पंतेमंत्राणां
संकॢप्त्यैकर्माणिसंकल्पंतेकर्मणांसंकॢप्त्यैलोकःसंकल्पतेलोकस्यसंकॢप्त्यै
सर्वंसंकल्पतेसएषसंकल्पःसंकल्पमुपास्स्वेति॥२॥सयःसंकल्पंब्रह्मेत्युपास्तेकॢ
प्तान्वैसलोकान्ध्रुवान्ध्रुवःप्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसि

॥छांदो॥

॥५१॥

॥ग्योप॥

यथा

ध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मेत्युपास्तेऽस्ति
भगवः संकल्पाद्भूय इति संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥४॥
चित्तं वाव संकल्पाद्भूयो यदा वै चेतयतेऽथ संकल्पयतेऽथ मनस्यत्यथ वाचमी
रयति तामु नाम्नीरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि ॥ तानि ह वा एतानि
चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्माद्यद्यपि बहुविदचित्तो भ
वति नायमस्तीत्येवैनमाहुर्यदयं वेद यद्वा अयं विद्वान्नेत्थमचित्तः स्यादित्यथ य
द्यल्पविच्चित्तवान्भवति तस्मा एवोत शुश्रूषन्ते चित्तं ह्येवैषामेकायनं चित्त
मात्मा चित्तं प्रतिष्ठा चित्तमुपास्वेति स यश्चित्तं ब्रह्मेत्युपास्ते चितान्वै स लोकान्ध्रु
वान्ध्रुवः प्रतिष्ठितान्प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावच्चित्तस्य

॥रूपम॥

॥५१॥

गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्तेऽस्ति भगवश्चित्ताद्भू
य इति चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान्ब्र[illegible]वीत्विति ॥५॥ ध्यानं वाव चित्ता
द्भूयो ध्यायतीव पृथिवी ध्यायतीवांतरिक्षं ध्यायतीव द्यौर्ध्यायंतीवापो ध्यायंती
व पर्वता ध्यायंतीव देवमनुष्यास्तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवंति ध्याना
पादांशा इवैव ते भवंत्यथ येऽल्पाः कलहिनः पिशुना उपवादिनस्तेऽथ ये प्रभवो ध्या
नापादांशा इवैव ते भवंति ध्यानमुपास्स्वेति स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्या
नस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्तेऽस्ति भगवो ध्या
नाद्भूय इति ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥६॥ विज्ञानं वाव ध्या
नाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदं सामवेदमाथर्वणं चतुर्थमि

॥छांदो॥ ॥न्योप॥

॥५२॥

तिहासपुराणं पंचमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं दे
वविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च
पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳ
ꣳसि च तृणवनस्पतीञ्छ्वापदान्याकीटपतंगपिपीलिकं धर्मं चाधर्मं च सत्यं
चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं चेमं च लोकममुं च
विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो
वै स लोकाञ्ज्ञानवतोऽभिसिध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो
भवति यो विज्ञानं ब्रह्मेत्युपास्तेऽस्ति भगवो विज्ञानाद्भूय इति विज्ञानाद्वाव भू
योऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥२॥ बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञा

॥कृष्ण॥
॥५२॥

नवतामेकोबलवानाकंपयतेसयदाबलीभवत्यथोत्थाताभवत्युत्तिष्ठन्परि
चरिताभवतिपरिचरन्नुपसत्ताभवत्युपसीदन्द्रष्टाभवतिश्रोताभवतिमंता
भवतिबोद्धाभवतिकर्त्ताभवतिविज्ञाताभवतिबलेनवैपृथिवीतिष्ठतिबलेनां
तरिक्षंबलेनद्यौर्बलेनपर्वताबलेनदेवमनुष्याबलेनपशवश्चवयांसिच
तृणवनस्पतयःश्वापदान्याकीटपतंगपिपीलिकंबलेनलोकस्तिष्ठतिब
लमुपास्वेतिसयोबलंब्रह्मेत्युपास्तेयावद्बलस्यगतंतत्रास्ययथाकामचारो
भवतियोबलंब्रह्मेत्युपास्तेऽस्तिभगवोबलाद्भूयइतिबलाद्वावभूयोस्तीतितन्
मेभगवान्ब्रवीत्विति॥८॥अन्नंवावबलाद्भूयस्तस्माद्यद्यपिदशरात्रीर्नाश्नी
याद्यद्युहजीवेदथवाऽद्रष्टाऽश्रोताऽमंताऽबोद्धाऽकर्त्ताऽविज्ञाताभवत्यथान्न

॥छांदो॥

॥५३॥

स्यायेद्रष्टा भवति श्रोता भवति मंता भवति बोद्धा भवति कर्त्ता भवति विज्ञाता भवत्य
न्नमुपास्वेति स यो ऽन्नं ब्रह्मेत्युपास्ते ऽन्नवतो वै स लोकान्पानवतो ऽभिसिध्यति या
वदन्नस्य गतं तत्रास्य यथाकामचारो भवति यो ऽन्नं ब्रह्मेत्युपास्ते ऽस्ति भगवो ऽन्ना
द्भूय इत्यन्नाद्वाव भूयो ऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥९॥ आपो वा अन्नाद्भूय
स्यस्तस्माद्यदा सुवृष्टिर्न भवति व्याधीयंते प्राणा अन्नं कनीयो भविष्यतीत्यथ
यदा सुवृष्टिर्भवत्यानंदिनः प्राणा भवंत्यन्नं बहु भविष्यतीत्याप एवेमा मूर्त्ता ये
यं पृथिवी यदंतरिक्षं यद्द्यौर्यत्पर्वता यद्देवमनुष्या यत्पशवश्च वयांसि च तृ
णवनस्पतयः श्वापदान्याकीटपतंगपिपीलिकमाप एवेमा मूर्त्ता अप उपास्वे
ति स यो ऽपो ब्रह्मेत्युपास्ते आप्नोति सर्वान्कामांस्तृप्तिमान्भवति यावदपां गतं

॥ग्योपु॥

॥हरिः॥

॥५३॥

तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्तेऽस्ति भगवोऽद्भ्यो भूय इत्यद्भ्यो
वाव भूयोऽस्तीति तन्मे भगवान्ब्रवीत्विति ॥१०॥ तेजो वावाद्भ्यो भूयस्तद्वा एतद्वायु
माग्रह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव
तत्पूर्वं दर्शयित्वाऽथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादा
श्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाऽ
थापः सृजते तेज उपास्वेति स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान्भा
स्वतोऽपहततमस्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति
यस्तेजो ब्रह्मेत्युपास्तेऽस्ति भगवस्तेजसो भूय इति तेजसो वाव भूयोऽस्तीति तन्मे भ
गवान्ब्रवीत्विति ॥११॥ आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ वि

॥छांदो॥ ॥५४॥

॥ग्योप॥

ष्णुर्नक्षत्राण्यग्निराकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे
रमत आकाशेन रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति स
य आकाशं ब्रह्मेत्युपास्त आकाशवतो वै स लोकान्प्रकाशवतोऽसंबाधानुरुगाय
वतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य आकाशं
ब्रह्मेत्युपास्तेऽस्ति भगव आकाशाद्भूय इत्याकाशाद्वाव भूयोऽस्तीति तन्मे भगवान्ब्र
वीत्विति ॥१२॥ स्मरो वावाकाशाद्भूयस्तस्माद्यद्यपि बहव आसीरन्न स्मरन्तो नैव ते
कंचन शृणुयुर्न मन्वीरन्न विजानीरन्यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्न
थ विजानीरन्स्मरेण वै पुत्रान्विजानाति स्मरेण पशून्स्मरमुपास्स्वेति स यः स्मरं
ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्तेऽ

॥रुद्रस॥ ॥५४॥

स्ति भगवः स्मराद्भूय इति स्मराद्वाव भूयोस्तीति तन्मे भगवान्ब्रवीत्विति॥१३॥
आशा वाव स्मराद्भूयस्याशेद्धो वै स्मरो मंत्रानधीते कर्माणि कुरुते पुत्रांश्च
पशूंश्चेच्छत इमं च लोकममुं चेच्छत आशामुपास्वेति स य आशां ब्रह्मेत्यु
पास्त आशयास्य सर्वे कामाः समृध्यंत्यमोघा हास्याशिषो भवंति यावदाशा
या गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्ते ऽस्ति भगव आ
शाया भूय इत्याशाया वाव भूयोस्तीति तन्मे भगवान्ब्रवीत्विति॥१४॥ प्राणो
वा आशाया भूयान्यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पि
तं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो मा
ता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः स यदि पितरं वा मा

॥छांदो॥ ॥त्योपन॥

॥५५॥ तरं वा भ्रातरं वा स्वसारं वाऽचार्यं वा ब्राह्मणं वा किंचिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्ये
वैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमस्या
चार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीत्यथ यद्यप्येनानुत्क्रांतप्राणान्छूलेन समा
सं व्यतिषंदहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृ
हासीति ना चार्यहासीति न ब्राह्मणहासीति प्राणो ह्येवैतानि सर्वाणि भवति स
वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद्ब्रूयुरतिवाद्यसी ॥कृष्ण॥
त्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीत ॥१५॥ एष तु वा अतिवदति यः सत्येनातिवद ॥५५॥
ति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो
विजिज्ञास इति ॥१६॥ यदा वै विजानात्यथ सत्यं वदति नाविजानन्सत्यं वदति वि

जानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञा
स इति ॥१७॥ यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति म
तिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति ॥१८॥ यदा वै श्रद्दधात्य
थ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां
भगवो विजिज्ञास इति ॥१९॥ यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठञ्छ्रद्दधा
ति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास
इति ॥२०॥ यदा वै करोत्यथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृ
तिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति ॥२१॥ यदा वै सुखं लभ
तेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञा

सितव्यमिति सुखं भगवो विजिज्ञास इति ॥२२॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्ति
भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति ॥२३॥ य
त्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्य
च्छृणोत्यन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यꣳ स भग
वः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति ॥ गोअश्वमिह महिमे
त्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमी
ति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित इति ॥२४॥ स एवाधस्तात्स उपरिष्टात्स पश्चा
त्स पुरस्तात्स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वमित्यथातोऽहंकारादेश एवाहमे
वाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदꣳ

सर्वमित्यथात आत्मादेश एवात्मैवाधस्तादात्मोपरिष्टादात्मा पश्चादात्मा पुरस्तादा
त्मा दक्षिणत आत्मोत्तरत आत्मैवेदं सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान ए
वं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानंदः स स्वराड्भवति तस्य सर्वेषु
लोकेषु कामचारो भवत्यथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवंति तेषां
सर्वेषु लोकेष्वकामचारो भवति ॥२५॥ तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं
विजानत आत्मतः प्राण आत्मत आशात्मतः स्मर आत्मत आकाश आत्मतस्तेज आ
त्मत आप आत्मत आविर्भावतिरोभावावात्मतोऽन्नमात्मतो बलमात्मतो विज्ञानमा
त्मतो ध्यानमात्मतश्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वागात्मतो नामात्म
तो मंत्रा आत्मतः कर्माण्यात्मत एवेदं सर्वमिति तदेष श्लोको न पश्यो मृत्युं पश्य

॥छांसो॥ ॥१९७॥

॥ग्योपं॥

तिन रोगं नोत दुःखतां सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशइति स एकधा भवति त्रिधा भवति पंचधा सप्तधा नवधा चैव पुनश्चैकादशः स्मृतः शतं च दश चैकश्च सहस्राणि च विंशतिराहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारस्तं स्कंद इत्याचक्षते तं स्कंद इत्याचक्षते ॥२६॥ ॥इति छांदोग्योपनिषदि सप्तमः प्रपाठकः ॥ ॥७॥ ॥हरिः ॐ॥ ॥अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति स ब्रूयाद्यावा

॥कृष्ण॥ ॥१९७॥

४ मा यदेनं ज्जरा वाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति स ब्रूयान्नास्य जरयैतज्जीर्यति
न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्का ४

न्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अंतरेव स
माहिते उभावग्निश्च वायुश्च सूर्याचंद्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति य
च्च नास्ति सर्वं तदस्मिंत्समाहितमिति तं चेद्ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं स
माहितं सर्वाणि च भूतानि सर्वे च कामाः समाहिता एष आत्माऽपहतपाप्मा विज
रो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पो यथा ह्येवेह प्रजा
अन्वाविशंति यथानुशासनं यं यमंतमभिकामा भवंति यं जनपदं यं क्षेत्रभा
गं तं तमेवोपजीवंति तद्यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लो
कः क्षीयते तद्य इहात्मानमननुविद्य प्रव्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु
लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्ते

॥छां॰दो॰॥ ॥ग्योप॰॥

॥५८॥

प्राऽऽ सर्वेषु लोकेषु कामचारो भवति ॥१॥ स यदि पितृलोककामो भवति संकल्पादे
वास्य पितरः समुत्तिष्ठंति तेन पितृलोकेन संपन्नो महीयते ऽथ यदि मातृलोककामो
भवति संकल्पादेवास्य मातरः समुत्तिष्ठंति तेन मातृलोकेन संपन्नो महीयते ऽथ य
दि भ्रातृलोककामो भवति संकल्पादेवास्य भ्रातरः समुत्तिष्ठंति तेन भ्रातृलोकेन
संपन्नो महीयते ऽथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्ति
ष्ठंति तेन स्वसृलोकेन संपन्नो महीयते ऽथ यदि सखिलोककामो भवति संकल्पा
देवास्य सखायः समुत्तिष्ठंति तेन सखिलोकेन संपन्नो महीयते ऽथ यदि गंधमा
ल्यलोककामो भवति संकल्पादेवास्य गंधमाल्ये समुत्तिष्ठतस्तेन गंधमाल्यलो
केन संपन्नो महीयते ऽथ यद्यन्नपानलोककामो भवति संकल्पादेवास्यान्नपाने

॥रुद्रम॥

॥५८॥

समुत्तिष्ठतस्तेनान्नपानलोकेन संपन्नो महीयते ऽथ यदि गीतवादित्रलोककामो
भवति संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो
महीयते ऽथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठंति तेन स्त्री
लोकेन संपन्नो महीयते यं यमंतमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादे
व समुत्तिष्ठति तेन संपन्नो महीयते ॥ २ ॥ त इमे सत्याः कामा अनृतापिधानास्तेषां
सत्यानां सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते ऽथ
ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विंदते ऽत्र ह्यस्यैते
सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदे
युरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंत्यनृतेन हि प्रत्यूढाः

॥छांदो॥

॥५९॥

सवाएषआत्माहृदितस्यैतदेवनिरुक्तंꣳहृद्ययमितितस्माद्धृदयमहरहर्वाए
वंवित्स्वर्गंलोकमेत्यथयएषसंप्रसादोऽस्माच्छरीरात्समुत्थायपरंज्योतिरुपसं
पद्यस्वेनरूपेणाभिनिष्पद्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्रह्मेतितस्
स्यहवाएतस्यब्रह्मणोनामसत्यमितितानिहवाएतानित्रीण्यक्षराणिसतिय
मितितद्यत्सत्तदमृतमथयत्तितन्मर्त्यमथयद्यंतेनोभेयच्छतियदनेनोभेय
च्छतितस्माद्यमहरहर्वाएवंवित्स्वर्गंलोकमेति॥३॥अथयआत्मासससेतुर्विधृ
तिरेषांलोकानामसंभेदायनैतंꣳसेतुमहोरात्रेतरतोनजरानमृत्युर्नशोको
नसुकृतंनदुष्कृतंꣳसर्वेपाप्मानोऽतोनिवर्त्तन्तेऽपहतपाप्माह्येषब्रह्मलोकस्त
स्माद्वाएतंꣳसेतुंतीर्त्वाऽन्धःसन्ननंधोभवतिविद्धःसन्नविद्धोभवत्युपतापीस

॥न्योप॰॥

॥ हरम॥

॥५९॥

ऽनहतपाप्मा भवति तस्माद्वा एतं सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्वि
भातो ह्येवैष ब्रह्मलोकस्तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविंदंति तेषामेवैष ब्र
ह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति ॥४॥ अथ यद्यज्ञ इत्याचक्षते ब्रह्म
चर्यमेव तद्ब्रह्मचर्येण ह्येव यो ज्ञाता तं विंदतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमे
व तद्ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविंदतेऽथ यत्सत्त्रायणमित्याचक्षते ब्रह्मचर्यमे
व तद्ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विंदतेऽथ यन्मौनमित्याचक्षते ब्रह्मचर्यमे
व तद्ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुतेऽथ यदनाशकायनमित्याचक्षते ब्रह्म
चर्यमेव तदेष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविंदतेऽथ यदरण्यायनमित्या
चक्षते ब्रह्मचर्यमेव तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदै

ह

॥छांदो॥ ॥छ्योप॥

॥६०॥

रं मदीयं सरस्तदश्वत्थः सोमसवनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितं हि
रण्मयं तद्य एवैतावरं च ण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविंदंति तेषामेवैष
ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवति॥ ५॥ अथ या एता हृदयस्य ना
ड्यस्ताः पिंगलस्याणिम्नस्तिष्ठंति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आ
दित्यः पिंगल एष शुक्ल एष नील एष पीत एष लोहितस्तद्यथा महापथ आतत
उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छंतीमं चा
मुं चामुष्मादादित्यात्प्रतायंते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायंते तेऽ
मुष्मिन्नादित्ये सृप्ताः स्तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु त
दा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवत्य

॥छ्रुरु॥

॥६०॥

भि२

अथयत्रैतदबलिमानंनीतोभवतितमभितआसीनाआहुर्जानासिमांजानासि
मांतिसयावदस्माच्छरीरादनुत्क्रांतोभवतितावज्जानात्यथयत्रैतदस्माच्छ
रीरादुत्क्रामत्यथैतैरेवरश्मिभिरूर्ध्वआक्रमतेसओमितिवाहोद्वामीयते
सयावत्क्षिप्येन्मनस्तावदादित्यंगच्छत्येतद्वैखलुलोकद्वारंविदुषांप्रपदनं
निरोधोऽविदुषांतदेषःश्लोकःशतंचैकाचहृदयस्यनाड्यस्तासांमूर्धानम
भिनिःसृतैकातयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्याउत्क्रमणेभवंत्युत्क्रम
णेभवंति॥६॥ ॥अ६॥ ॥यआत्माऽपहतपाप्माविजरोविमृत्युर्विशोकोऽवि
जिघित्सोऽपिपासःसत्यकामःसत्यसंकल्पःसोऽन्वेष्टव्यःसविजिज्ञासितव्यः
ससर्वांश्चलोकानाप्नोतिसर्वांश्चकामान्यस्तमात्मानमनुविद्यविजानाती

॥छांदो॥

॥६१॥

तिहप्रजापतिरुवाचतद्धोभयेदेवासुराअनुबुबुधिरेतेहोचुर्हंततमात्मानमन्
विच्छामोयमात्मानमन्विष्यसर्वाꣳश्चलोकानाप्नोतिसर्वाꣳश्चकामानितींद्रोहै
वदेवानामभिप्रवव्राजविरोचनोऽसुराणांतौहासंविदानावेवसमित्पाणीप्रजा
पतिसकाशमाजग्मतुस्तौहद्वात्रिꣳशतंवर्षाणिब्रह्मचर्यमूषतुस्तौहप्रजाप
तिरुवाचकिमिच्छंतावबास्तमितितौहोचतुर्यआत्माऽपहतपाप्माविजरोवि
मृत्युर्विशोकोविजिघत्सोऽपिपासःसत्यकामःसत्यसंकल्पःसोऽन्वेष्टव्यःसवि
जिज्ञासितव्यःससर्वाꣳश्चलोकानाप्नोतिसर्वाꣳश्चकामान्यस्तमात्मानमनुवि
द्यविजानातीतिहभगवतोवचोवेदयंतेतमिच्छंतावबास्तमितितौहप्रजापति
रुवाचयएषोऽक्षिणिपुरुषोदृश्यतएषआत्मेतिहोवाचैतदमृतमभयमेतद्ब्र

॥न्योप॥

॥कृष्ण॥

॥६१॥

ते ॥ अथ यो यं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष उ एवैषु सर्वे
ष्वंतेषु परिख्यायत इति होवाच ॥७॥ उदशराव आत्मानमवेक्ष्य यदात्मनो न वि
जानीथस्तन्मे प्रब्रूतमिति तौ होदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं
पश्यथ इति तौ होचतुः सर्वमेवेदमावां भगव आत्मानं पश्याव आ लोमभ्य आ
नखेभ्यः प्रतिरूपमिति तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ
भूत्वोदशरावेऽवेक्षेथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावे
ऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथ इति तौ होचतुर्यथैवेदमावां भगवः
साध्वलंकृतौ सुवसनौ परिष्कृतौ स्व एवमेवेमौ भगवः साध्वलंकृतौ सुवसनौ प
रिष्कृताविति एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तौ ह शांतहृदयौ प्र

243

॥ग्योप॥

॥छांदो॥

॥६२॥

व्रजतुस्तौहान्वीक्ष्यप्रजापतिरुवाचानुपलभ्यात्मानमननुविद्यव्रजतोय
तरएतदुपनिषदोभविष्यंतिदेवावाऽसुरावातेपराभविष्यंतीतिसहशांत
हृदयएवविरोचनोऽसुरान्जगामतेभ्योहैतामुपनिषदंप्रोवाचैवात्मैवेहम
ह्यआत्मापरिचर्यआत्मानमेवेहमहयन्नात्मानंपरिचरन्नुभौलोकाववा
प्नोतीमंचामुंचेतितस्मादप्यद्येहाददानमश्रद्दधानमयजमानमाहुरा
सुरोबतेत्यसुराणांह्येषोपनिषत्प्रेतस्यशरीरंभिक्षयावसनेनालंकारेणे
तिसंस्कुर्वंत्येतेनह्यमुंलोकंजेष्यंतोमन्यंते॥८॥अथहेंद्रोऽप्राप्यैवदेवाने
तद्भयंददर्शयथैवखल्वयमस्मिञ्छरीरेसाध्वलंकृतेसाध्वलंकृतोभवति
सुवसनेसुवसनःपरिष्कृतेपरिष्कृतएवमेवायमस्मिन्नंधेऽंधोभवतिस्रा

॥कृष्ण॥

॥६२॥

मे स्रामः परिवृक्णे परिवृक्णोऽस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भो
ग्यं पश्यामीति स ह समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छांत
हृदयः प्राव्राजीः सार्द्धं विरोचनेन किमिच्छन्पुनरागम इति स होवाच यथैव खल्व
यं भगवोऽस्मिंछरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परि
ष्कृते परिष्कृत एवमेवायमस्मिन्नंधेंधो भवति स्रामे स्रामः परिवृक्णे परिवृक्णोऽ
स्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्नि
ति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिंशतं वर्षाणीति स
हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥ ९ ॥ य एषः स्वप्ने महीयमानश्च
रत्येष आत्मेति होवाचैतदमृतमेतद्ब्रह्मेति स ह शांतहृदयः प्रवव्राज स हाप्रा

मभय

॥छांदो॥

॥६३॥

॥न्यो पु॥

प्यैव देवानेतद्भयं ददर्शेति तद्यद्यपीदं शरीरमन्धं भवत्यनन्धः स भवति यदि
स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति न वधेनास्य हन्यते नास्य स्राम्येण स्रामो
घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्या
मीति स समित्पाणिः पुनरेयाय तं ह प्रजापतिरुवाच मघवन्यच्छान्तहृदयः प्र
व्राजीः किमिच्छन्पुनरागम इति स होवाच तद्यद्यपीदं भगवः शरीरमन्धं भवत्यन
न्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति न वधेनास्य हन्यते नास्य
स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवत्यपि रोदितीव नाहम
त्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसा
पराणि द्वात्रिंशतं वर्षाणीति स हापराणि द्वात्रिंशतं वर्षाण्युवास तस्मै होवाच ॥१०॥

॥रुक्ष्म॥

॥६३॥

तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाचैतदमृत
मभयमेतद्ब्रह्मेति स ह शांतहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाहं
खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमे
वापीतो भवति नाहमत्र भोग्यं पश्यामीति स समित्पाणिः पुनरेयाय तं ह प्रजापति
रुवाच मघवन्यच्छांतहृदयः प्राव्राजीः किमिच्छन्पुनरागम इति स होवाच ना
हं खल्वयं भगव एवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि वि
नाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीत्येवमेवैष मघवन्निति होवाचैतं
त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्माद्वसापराणि पंच वर्षाणीति स हा
पराणि पंचवर्षाण्युवास तान्येकशतं संपेदुरेतत्तद्यदाहुरेकशतं ह वै वर्षाणि

॥छांदो॥ ॥६४॥

॥ग्योप॥

मघा वान्प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥११॥ मघवन्मर्त्यं वा इदं शरी
रमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रिया
प्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव संतं न प्रि
याप्रिये स्पृशतोऽशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैता
न्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यंते ए
मेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत्क्रीडन्रममाणः स्त्रीभिर्वा यानैर्वा ज्ञा
तिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य आचरणे युक्त एवमेवा
यमस्मिञ्छरीरे प्राणो युक्तोऽथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः

॥हरम॥ ॥६४॥

पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गंधाय घ्राणमथ यो वेदे
दमभिव्याहराणीति स आत्माऽभिव्याहाराय वागथ यो वेदेदं शृणवानीति स आ
त्मा श्रवणाय श्रोत्रमथ यो वेदेदं मन्वानीति स आत्मा मनोऽस्य दैवं चक्षुः स वा ए
ष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते य एते ब्रह्मलोके तं वा एतं
देवा आत्मानमुपासते तस्मात्तेषां सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वांश्च
लोकानाप्नोति सर्वांश्च कामान्यस्तमात्मानमनुविद्य विजानातीति ह प्रजापति
रुवाच प्रजापतिरुवाच ॥१२॥ श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्येऽश्व
इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा
ब्रह्मलोकमभिसंभवामी अभिसंभवामीति ॥१३॥ आकाशो वै नाम नामरूपयोर्नि

॥ग्योप॥

॥छांदो॥

॥८५॥

वेदिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्येतमदत्कमदत्कं श्येतं लिंदु माभिगां लिंदु माभिगां ॥१४॥ तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्य आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेंद्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥१५॥ ॥इति श्रीमत्सामवेदांतर्गतायां छांदोग्योपनिषदि अष्टमः प्रपाठकः समाप्तः॥ ॥८॥ ॥समाप्ता चेयं छांदोग्योपनिषत्॥ ॥छ॥ ॥हरः॥

॥हरः॥

॥८५॥

कौथुमीशाखा॥

९२८

॥अथबृहदारण्यकारंभपत्रमिदं॥

Acc. No. ~~4866~~. M-1928

बृहदारण्यकोपनिषत्

folio 79.

(B) उपनिषत्संग्रह

(Acc. No. ~~4856~~ to ~~4868~~)

॥बृह०॥ ॥१॥

॥रण्यं॥

॥श्रीगणेशाय नमः॥ ॥ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वं
शऋषिभ्यो नमो गुरुभ्यः॥ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते॥ पूर्णस्य
पूर्णमादाय पूर्णमेवावशिष्यते॥१॥ ॥हरिः ॐ॥ ॥उषा वा अश्वस्य मेध्यस्य
शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माऽश्वस्य
मेध्यस्य द्यौः पृष्ठमंतरिक्षमुदरं पृथिवी पाजस्यं दिशः पार्श्वे अवांतरदिशः
पर्शव ऋतवोंऽगानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्रा
ण्यस्थीनि नभो मांसान्यूवध्यं सिकताः सिंधवो गुदा यकृच्च क्लोमानश्च
पर्वता ओषधयश्च वनस्पतयश्च लोमान्युद्यन्पूर्वार्धो निम्लोचञ्जघनार्धो
यद्विजृंभते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवा

॥[illegible]॥ ॥१॥

स्य शाकृ॥१॥ अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी
रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ वा अश्वं महि
मानावभितः संबभूवतुर्हयो भूत्वा देवानवहद्वाजी गंधर्वानर्वाऽसुरान
श्वो मनुष्यान्समुद्र एवास्य बंधुः समुद्रो योनिः॥२॥ ॥ब्राह्मणं॥ ॥१॥ ॥
नैवेह किंचनाग्र आसीन्मृत्युनैवेदमावृतमासीदशनाययाऽशनाया हि
मृत्युस्तन्मनोऽकुरुतात्मन्वी स्यामिति सोऽर्चन्नचरत्तस्यार्चत आपोजा
यंतार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कं ह वा अस्मै भवति य ए
वमेतदर्कस्यार्कत्वं वेद॥१॥ आपो वा अर्कस्तद्यदपां शर आसीत्तत्स
महन्यत सा पृथिव्यभवत्तस्यामश्राम्यत्तस्य श्रांतस्य तप्तस्य तेजो रसो

॥ बृह० ॥

॥ १.२ ॥

॥ रण्यं ॥

निरवर्त्तताग्निः ॥ २ ॥ स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयमग्निं
तृतीयं स एष प्राणस्त्रेधा विहितस्तस्य प्राची दिक् शिरोऽसौ चासौ चेर्मावथा
स्य प्रतीची दिक् पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा चोदीची च पार्श्वे द्यौः पृष्ठ
मन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्व चैति तदेव प्रतितिष्ठ
त्येवं विद्वान् ॥ ३ ॥ सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मि
थुनं समभवदशनाया मृत्युस्तद्यद्रेत आसीत्स संवत्सरोऽभवन्न ह पुरा त
तः संवत्सर आस तमेतावन्तं कालमबिभः यावान्संवत्सरस्तमेतावतः काल
स्य परस्तादसृजत तं जातमभिव्याददात्स भाणकरोत्सैव वागभवत् ॥ ४ ॥
स ऐक्षत यदि वा इममभिमंस्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेना

॥ रुद्र ॥

॥ २ ॥

त्मनेदꣳ सर्वमसृजत यदिदं किं चर्चो यजूꣳषि सामानि छन्दाꣳसि यज्ञान्प्रजाः
पशून्स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदिति
त्वꣳ सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं
वेद ॥५॥ सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत्स तपोऽतप्यत
तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत्प्राणा वै यशो वीर्यं तत्प्राणेषूत्क्रां
तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीर एव मन आसीत् ॥६॥ सोऽकाम
यत मेध्यं म इदꣳ स्यादात्मन्व्यनेन स्यामिति ततोऽश्वः समभवद्यदश्वत्तन्मे
ध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वमेष ह वा अश्वमेधं वेद य एनमेवं
वेद तमनवरुध्यैवामन्यत तꣳ संवत्सरस्य परस्तादात्मन आलभत पशून्दे

॥बृह०॥ ॥३१॥

वताभ्यः प्रत्यौहत्तस्मात्सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभंत एष ह वा अश्वमे
धो य एष तपति तस्य संवत्सर आत्माऽयमग्निरर्कस्तस्येमे लोका आत्मान
स्तावेतावर्काश्वमेधौ सो पुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जय
ति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवत्येतासां देवतानामेको भवति॥७॥ ॥
ब्राह्मणं॥ ॥२॥ ॥द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा
ज्यायसा असुरास्त एषु लोकेष्वस्पर्धंत ते ह देवा ऊचुर्हंतासुरान्यज्ञ उद्गीथेना
त्ययामेति॥१॥ ते ह वाचमूचुस्त्वं न उद्गायेति तथेति तेभ्यो वागुदगायद्यो वाचि
भोगस्तं देवेभ्य आगायद्यत्कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्राऽ
त्येष्यंतीति तमभिद्रुत्य पाप्मनाऽविध्यंस यः स पाप्मा यदेवेदमप्रतिरूपं वदति

॥रण्यं॥ ॥कृष्ण॥ ॥३॥

स एव स पाप्मा ॥२॥ अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगाय
द्यः प्राणे भोगस्तं देवेभ्य आगायद्यत्कल्याणं जिघ्रति तदात्मने ते विदुरनेन वै
न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाऽविध्यन् स यः स पाप्मा यदेवेदमप्रति
रूपं जिघ्रति स एव स पाप्मा ॥३॥ अथ ह चक्षुरूचुस्त्वं न उद्गायेति तथेति तेभ्य
श्चक्षुरुदगायद्यश्चक्षुषि भोगस्तं देवेभ्य आगायद्यत्कल्याणं पश्यति तदा
त्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स
पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा ॥४॥ अथ ह श्रोत्रमूचुस्त्वं न
उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायद्यः श्रोत्रे भोगस्तं देवेभ्य आगायद्यत्क
ल्याणं शृणोति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्येष्यन्तीति तमभिद्रुत्य पा

॥बृह०॥

॥४॥

॥रण्यं॥

प्मनाविध्यंस्तयः स पाप्मा यदेवेदमप्रतिरूपं शृणोति स एव स पाप्मा ॥५॥ अ
थ ह मन ऊचुस्त्वं न उद्गायेति तथेति तेभ्यो मन उदगायद्यो मनसि भोगस्तं देवे
भ्य आगायद्यत्कल्याणं संकल्पयति तदात्मने ते विदुरनेन वै न उद्गात्राऽत्ये
ष्यंतीति तमभिद्रुत्य पाप्मनाविध्यंस्तयः स पाप्मा यदेवेदमप्रतिरूपं संक
ल्पयति स एव स पाप्मैवमु खल्वेता देवताः पाप्मभिरुपासृजन्नेवमेनाः पा
प्मनाऽविध्यन् ॥६॥ अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य
एष प्राण उदगायत्ते विदुरनेन वै न उद्गात्राऽत्येष्यंतीति तमभिद्रुत्य पाप्मनाऽ
विध्वंसन्स यथाऽश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना वि
ष्वंचो विनेशुस्ततो देवा अभवन्पराऽसुरा भवत्यात्मना पराऽस्य द्विषन्भ्रात

॥रुद्र॥

॥४॥

व्योम भवति य एवं वेद ॥७॥ ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्त
रिति सोऽयास्य आंगिरसोऽङ्गानां हि रसः ॥८॥ सा वा एषा देवता दूर्नाम दूरं
ह्यस्या मृत्युर्दूरं ह वा अस्मान्मृत्युर्भवति य एवं वेद ॥९॥ सा वा एषा देवतैता
सां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयांचकार तदासां
पाप्मनो विन्यदधात्तस्मान्न जनमियान्नान्तमियान्नेत्पाप्मानं मृत्युमन्ववाया
नीति ॥१०॥ सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्यु
मत्यवहत् ॥११॥ स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत
सोऽग्निरभवत्सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥१२॥ अथ प्राणमत्य
वहत्स यदा मृत्युमत्यमुच्यत स वायुरभवत्सोऽयं वायुः परेण मृत्युमतिक्रां

259

॥ श्र. ॥ ॥ रण्यं ॥

॥ ५ ॥

तृ पवते ॥ १३ ॥ अथ चक्षुरत्यवहत्तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत्सो
ऽसावादित्यः परेण मृत्युमतिक्रांतस्तपति ॥ १४ ॥ अथ श्रोत्रमत्यवहत्तद्यदा मृ
त्युमत्यमुच्यत ता दिशोऽभवंस्ता इमा दिशः परेण मृत्युमतिक्रांताः ॥ १५ ॥
अथ मनोऽत्यवहत्तद्यदा मृत्युमत्यमुच्यत स चंद्रमा अभवत्सोऽसौ चंद्रः पर
एण मृत्युमतिक्रांतो भात्येवं ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥
॥ १६ ॥ अथात्मनेऽन्नाद्यमागायद्यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्र
तितिष्ठति ॥ १७ ॥ ते देवा अब्रुवन्नेतावद्वा इदं सर्वं यदन्नं तदात्मन आगासी
रनु नोऽस्मिन्नन्न आभजस्वेति ते वै माऽभिसंविशतेति तथेति तं समन्तं परि
न्यविशन्त तस्माद्यदनेनान्नमत्ति तेनैतास्तृप्यन्त्येवं ह वा एनं स्वा अभिसंवि

॥ रुद्रः ॥

॥ ५ ॥

शंति भर्त्ता स्वानां श्रेष्ठः पुर एता भवत्यन्नादोऽधिपतिर्य एवं वेद य उ हैवंविदं स्वे
ष्वु प्रति प्रतिर्बुभूषति न हैवालं भार्येभ्यो भवत्यथ य एवैतमनु भवति यो वै
तमनु भार्यान्बुभूर्षति स हैवालं भार्येभ्यो भवति ॥१८॥ सोऽयास्य आंगिरसोऽ
ङ्गानां हि रसः प्राणो वा अंगानां रसः प्राणो हि वा अंगानां रसस्तस्माद्यस्मा
त्कस्माच्चांगात्प्राण उत्क्रामति तदेव तच्छुष्यत्येष हि वा अंगानां रसः ॥१९॥ ए
ष उ एव बृहस्पतिर्वाग्वै बृहती तस्या एष पतिस्तस्मादु बृहस्पतिः ॥२०॥ एष उ
एव ब्रह्मणस्पतिर्वाग्वै ब्रह्म तस्या एष पतिस्तस्मादु ब्रह्मणस्पतिः ॥२१॥ एष उ
एव साम वाग्वै सामैष सा चामश्चेति तत्साम्नः सामत्वं यद्वेव समः प्लुषिणा समो
मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव साम

श्नुते साम्नः सायुज्यं सलोकतां य एवमेतत्साम वेद ॥२२॥ एष उ वा उद्गीथः प्रा
णो वा उत्प्राणेन हीदं सर्वमुत्तब्धं वागेव गीथोच्च गीथा चेति स उद्गीथः ॥२३॥
तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाचायं त्यस्य राजा मूर्द्धानं वि
पातयताद्यदितोऽयास्य आंगिरसोऽन्येनोदगायदिति वाचा च ह्येव स प्राणेन
चोदगायदिति ॥२४॥ तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्व
र एव स्वं तस्मादार्त्विज्यं करिष्यन्वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नयार्
त्विज्यं कुर्यात्तस्माद्यज्ञे स्वरवंतं दिदृक्षंत एवाथो यस्य स्वं भवति भवति हास्य
स्वं य एवमेतत्साम्नः स्वं वेद ॥२५॥ तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति
हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुव

र्णं वेद ॥२६॥ तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्र
तिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥२७॥
अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तु
यात्तदेतानि जपेदसतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गम
येति स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमया
मृतं मा कुर्वित्येवैतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं
मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह मृत्योर्मामृतं गमयेति नात्र तिरो
हितमिवास्त्यथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत्तस्मादु तेषु
वरं वृणीत यं कामं कामयेत तꣳ स एष एवंविदुद्गातात्मने वा यजमानाय वा

॥बृह॰॥ ॥रण्य॥

॥७॥

यं कामं कामयते तमागायति तद्ध तल्लोकजिदेव न हैवालोक्यतयाआशाऽस्ति य
एवमेतत्साम वेद ॥२८॥ ॥ब्राह्मणं॥ ॥३॥ ॥आत्मैवेदमग्रआसीत्पुरुषविधः सो
ऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्सोहमस्मीत्यग्रे व्याहरत्ततोऽहंनामाऽभवत्तस्माद
प्येतर्ह्यामंत्रितोऽहमयमित्येवाग्रउक्त्वाऽथान्यन्नाम प्रब्रूते यदस्य भवति स य
त्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष ओषति ह वै स तं योऽस्मा
त्पूर्वो बुभूषति य एवं वेद ॥१॥ सोऽबिभेत्तस्मादेकाकी बिभेति स हायमीक्षां च
क्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभेष्य
द्द्वितीयाद्वै भयं भवति ॥२॥ स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छ
त्स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधाऽपातय

॥कस्म॥

॥७॥

ततःपतिश्चपत्नीचाभवतांतस्मादिदमर्धबृगलमिवस्वइतिहस्माहयाज्ञव
ल्क्यस्तस्मादयमाकाशःस्त्रियापूर्यतएवतांसमभवत्ततोमनुष्याअजायं
त॥३॥सोहेयमीक्षांचक्रेकथंनुमात्मनएवजनयित्वासंभवतिहंततिरोऽसानी
तिसागौरभवदृषभइतरस्तांसमेवाभवत्ततोगावोऽजायंतवडवेतराभव
दश्ववृषइतरोगर्दभीतरागर्दभइतरस्तांसमेवाभवत्ततएकशफमजा
यताजेतराभवद्बस्तइतरोऽविरितरामेषइतरस्तांसमेवाभवत्ततोऽजावयो
ऽजायंतैवमेवयदिदंकिंचमिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत॥४॥सोऽ
वेदहंसृष्टिरस्म्यहंहीदंसर्वमसृक्षीतिततःसृष्टिरभवत्सृष्ट्यांहास्यैतस्यां
भवतियएवंवेद॥५॥अथेत्यभ्यमंथत्समुखाच्चयोनेर्हस्ताभ्यांचाग्निमसृज

[margin: ५ दृष]

[margin: वाव २]

॥बृह०॥

॥८॥

तस्मादेतदुभयमलोमकमंतरतोऽलोमका हि योनिरंतरतस्तद्यदिदमाहुर
मुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किंचे
दमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदं सर्वमन्नं चैवान्नादश्च सोम एवा
न्नमग्निरन्नादः सैषा ब्रह्मणोऽतिसृष्टिर्यच्छ्रेयसो देवानसृजताथ यन्मर्त्यः स
न्नमृतानसृजत तस्मादतिसृष्टिरतिसृष्ट्यां हास्यैतस्यां भवति य एवं वेद ॥४॥
तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप
इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौ नामायमिदंरूप इति स
एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वंभरो वा वि
श्वंभरकुलाये तं न पश्यंत्यकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन्वाक्

॥रण्य॥

उ०

॥कृष्ण॥

॥८॥

स्यंश्चक्षुःशृण्वंछ्रोत्रंमन्वानोमनस्तान्यस्यैतानिकर्मनामान्येवसयोऽतएकै
कमुपास्तेनसवेदाकृत्स्नोह्येषोऽतएकैकेनभवत्यात्मेत्येवोपासीतात्रह्येतेसर्व
एकंभवंतितदेतत्पदनीयमस्यसर्वस्ययदयमात्माऽनेनह्येतत्सर्वंवेदयथा
हवैपदेनानुविंदेदेवंकीर्तिंश्लोकंविंदतेयएवंवेद॥७॥तदेतत्प्रेयःपुत्रा
त्प्रेयोवित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरंयदयमात्मासयोऽन्यमात्मनःप्रि
यंब्रुवाणंब्रूयात्प्रियंरोत्स्यतीतीश्वरोहतथैवस्यादात्मानमेवप्रियमुपासीतस
यआत्मानमेवप्रियमुपास्तेनहास्यप्रियंप्रमायुकंभवति॥८॥तदाहुर्यद्ब्रह्मवि
द्ययासर्वंभविष्यंतोमनुष्यामन्यंतेकिमुतद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति॥९॥
ब्रह्मवाइदमग्रआसीत्तदात्मानमेवावेदहंब्रह्मास्मीतितस्मात्तत्सर्वमभवत्तद्यो

तो

॥ बृह ॥ ॥ रण्ये ॥

॥ एं ॥

देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वा
मदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मी
ति स इदं सर्वं भवति तस्य ह न देवाश्चनाभूत्या ईशत आत्मा ह्येषां स भवत्य
थ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवा
नां यथा ह वै बहवः पशवो मनुष्यं भुंज्युरेवमेकैकः पुरुषो देवान्भुनक्त्येकस्मि
न्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनु
ष्या॥१०॥ ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्तच्छ्रेयोरूपमत्य
सृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणीन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरी
शान इति तस्मात्क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये

॥ काण्व ॥

॥ ९ ॥

३ विद्युः

न्त्र एवतद्ब्रह्मादधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छ
ति ब्रह्मैवांतत उपनिश्रयति स्वां योनिं य उ एनं हिनस्ति स्वां स योनिमृच्छति स पापी
यान्भवति यथा श्रेयांसं हिंसित्वा ॥११॥ स नैव व्यभवत्स विशमसृजत यान्ये
तानि देवजातानि गणश आख्यायंते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति ॥१२॥
स नैव व्यभवत्स शौद्रं वर्णमसृजत पूषणमियं वै पूषेयं हीदं सर्वं पुष्यति य
दिदं किंच ॥१३॥ स नैव व्यभवत्तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं
यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयांसमाशंसते धर्मेण यथा
राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात्सत्यं वदंतमाहुर्धर्मं वदतीति धर्मं वा वदंतं
सत्यं वदतीत्येतद्ध्येवैतदुभयं भवति ॥१४॥ तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्नि

॥बृह०॥ ॥रण्वं॥

॥१०॥

नैवदेवेषुब्रह्मासीत्॥अथयोहवाअस्माल्लोकात्स्वंलोकमदृष्ट्वाप्रैतिसएनमविदितो
नभुनक्तियथावेदो+ ब्राह्मणोमनुष्येषुक्षत्रियेणक्षत्रियोवैश्येनवैश्यःशूद्रे
णशूद्रस्तस्मादग्नावेवदेवेषुलोकमिच्छंतिब्राह्मणेमनुष्येष्वेताभ्यांहिरूपाभ्यां
ब्रह्माभवत्+ वाऽननूक्तोऽन्यद्वाकर्माकृतंयदिहवाअप्यनेवंवित्महत्पुण्यंक
र्मकरोतितद्धास्यांततःक्षीयतएवात्मानमेवलोकमुपासीतसयआत्मानमेवलो
कमुपासीतसयआत्मानमेवलोकमुपास्तेनहास्यकर्मक्षीयतेऽस्माद्ध्येवात्म
नोयद्यत्कामयतेतत्तत्सृजते॥१५॥अथोअयंवाआत्मासर्वेषांभूतानांलोकः
सयज्जुहोतियद्यजतेतेनदेवानांलोकोऽथयदनुब्रूतेतेनऋषीणामथयत्पि
तृभ्योनिपृणातियत्प्रजामिच्छतेतेनपितॄणामथयन्मनुष्यान्वासयतेयदेभ्योऽ

॥रुद्र॥ ॥१०॥

शनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विंदति तेन पशूनां यदस्य
गृहेषु श्वापदा वयांस्यापिपीलिकाभ्य उपजीवंति तेन तेषां लोको यथा ह वै स्वाय
लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छंति तद्वा एतद्विदि
तं मीमांसितं ॥१६॥ आत्मैवेदमग्र आसीदेक एव सोऽकामयत जाया मे स्यादथ
प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेत्येतावान्वै कामो नेच्छंश्चनातो भूयो
विंदेत्तस्मादप्येतर्ह्येकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ
कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोत्यकृत्स्न एव तावन्मन्यते तस्यो कृ
त्स्नता मन एवास्यात्मा वाग्जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विंदते
श्रोत्रं दैवं श्रोत्रेण हि तच्छृणोत्यात्मैवास्य कर्मात्मना हि कर्म करोति स एष पांक्तो

॥बृह॰॥ ॥९९॥

यतः पांक्तः पशुः पांक्तः पुरुषः पांक्तमिदं सर्वं यदिदं किंच तदिदं सर्वमाप्नोति
य एवं वेद॥१७॥ ॥ब्राह्मणं॥ ॥४॥ ॥यत्सप्तान्नानि मेधया तपसाजनयत्पि
ता॥ एकमस्य साधारणं द्वे देवानभाजयत्॥ त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्राय
च्छत्॥ तस्मिंत्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न॥ कस्मात्तानि न क्षीयंतेऽद्यमाना
नि सर्वदा॥ यो वै तामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन॥ स देवानपिगच्छति स ऊर्ज
मुपजीवतीति श्लोकाः॥१॥ यत्सप्तान्नानि मेधया तपसाजनयत्पितेति मेधया हि
तपसाजनयत्पितैकमस्य साधारणमितीदमेवास्य तत्साधारणमन्नं यदिदमद्य
ते स य एतदुपास्ते न स पाप्मनो व्यावर्त्तते मिश्रं ह्येतद्द्वे देवानभाजयदिति हुतं च
प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वत्यथो आहुर्दर्शपूर्णमासाविति तस्मा

॥रण्यं॥ ॥कृष्ण॥ ॥९९॥

न्नेष्टियां गुरुः स्यात्स शुश्रूषुरेकं प्रायच्छदिति तस्य यः पयो ह्येवाग्रे मनुष्याश्च पशव
श्चोपजीवंति तस्मात्कुमारं जातं घृतं वाग्रे प्रतिलेहयंति स्तनं वाऽनुधापयंत्यथ व
त्सं जातमाहुरतृणाद इति तस्मिंस्सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि
हीदं सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न तद्यदिदमाहुः संवत्सरं पयसा जुह्वद
प पुनर्मृत्युं जयतीति न तथा विद्याद्यदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्ये
वं विद्वान्सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति कस्मात्तानि न क्षीयंतेऽद्यमानानि सर्वदे
ति पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वैतामक्षितिं वेदेति पुरुषो
वा अक्षितिः स हीदमन्नं धिया धिया जनयते कर्मभिर्यद्धैतन्न कुर्यात्क्षीयेत ह सोऽ
न्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत्स देवानपिगच्छति स ऊर्जमुपजीवती

॥ बृह॰ ॥

॥ १२ ॥

क्षिप्रवाः सा ॥ २ ॥ त्रीण्यात्मने कुरुतेति मनो वाचं प्राणं तान्यात्मने कुरुतान्यत्रम

ना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा

शृणोति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्स

र्वं मन एव तदस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सै

षा ह्यंतमायत्तैषा हि न प्राणोऽपानो व्यान उदानः समानोऽन इत्येतत्सर्वं प्राण ए

वैतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥ त्रयो लोका एत एव वागे

वायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ४ ॥ त्रयो वेदा एत एव वागेवर्ग्वेदो

मनो यजुर्वेदः प्राणः सामवेदः ॥ ५ ॥ देवाः पितरो मनुष्या एत एव वागेव देवा म

नः पितरः प्राणो मनुष्याः ॥ ६ ॥ पिता माता प्रजैत एव ॥ मन एव पिता वाङ्माता प्राणः

॥ रण्य ॥

॥ कल्प ॥

॥ १२ ॥

॥१३॥

हेतानंतवत उपास्तेंऽतवंतं स लोकं जयत्यथ यो हेताननंतानुपास्तेऽनंतं
स लोकं जयति ॥१३॥ स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव
पंचदश कला ध्रुवैवास्य षोडशी कला स रात्रिभिरेवा च पूर्यतेऽप च क्षीयते
सोऽमावास्यां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य त
तः प्रातर्जायते तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिंद्यादपि कृकलास
स्यैतस्या एव देवताया अपचित्यै ॥१४॥ यो वै स संवत्सरः प्रजापतिः षोडशक
लोऽयमेव स योऽयमेवंवित्पुरुषस्तस्य वित्तमेव पंचदश कला आत्मैवास्य षो
डशी कला स वित्तेनैवा च पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वि
त्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनाऽगादित्येवाहुः॥

॥कृस्मा ॥१३॥

॥१५॥ अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोयं मनु
ष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको
देवलोको वै लोकानां श्रेष्ठस्तस्माद्विद्यां प्रशंसंति॥१६॥ अथातः संप्रत्ति
र्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं
ब्रह्माहं यज्ञोहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता ये वै के च य
ज्ञास्तेषां सर्वेषां यज्ञ इत्येकता ये वै के च लोकास्तेषां सर्वेषां लोक इत्येकतै
तावद्वा इदं सर्वमेतन्मा सर्वं सन्नयमितोऽभुनजदिति तस्मात्पुत्रमनुशि
ष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंविदस्माल्लोकात्प्रैत्यथैभिरेव
प्राणैः सह पुत्रमाविशति स यद्यनेन किंचिदक्ष्णयाकृतं भवति तस्मादेनं सर्व

॥बृह॰॥ ॥१४॥

॥२५५॥

स्मात्पुत्रो मुंचति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिंल्लोके प्रतितिष्ठत्यथैनमेते
दैवाः प्राणा अमृता आविशंति ॥१७॥ पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा
वै दैवी वाग्यया यद्यदेव वदति तत्तद्भवति ॥१८॥ दिवश्चैनमादित्याच्च दैवं म
न आविशति तद्वै दैवं मनो येनानंद्येव भवत्यथो न शोचति ॥१९॥ अद्भ्यश्चैनं
चंद्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरंश्चासंचरंश्च
न व्यथतेऽथो न रिष्यति स एवंवित्सर्वेषां भूतानामात्मा भवति यथैषा देवतै
वं स यथैतां देवतां सर्वाणि भूतान्यवंत्येवं हैवंविदं सर्वाणि भूतान्यवंति
यदु किंचेमाः प्रजाः शोचंत्यमैवासां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान्पा
पं गच्छति ॥२०॥ अथातो व्रतमीमांसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टा

॥बृह॰॥ ॥१४॥

४ म

न्यन्योन्येनास्पर्द्धंत वदिष्याम्येवाहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्य
हमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो भूत्वोपयेमे तान्या
प्नोत्तान्याप्त्वा मृत्युरवारुंधत तस्माच्छ्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रो
त्रमथेममेव नाप्नोद्योयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे यं वै नः श्रेष्ठो यः संचरं
श्चासंचरंश्च न व्यथतेऽथो न रिष्यति हंतास्यैव सर्वे रूपमसामेति त एतस्यैव
सर्वे रूपमभवंस्तस्मादेत एतेनाख्यायंते प्राणा इति तेन ह वाव तत्कुलमाच
क्षते यस्मिन्कुले भवति य एवं वेद य उ हैवंविदा स्पर्द्धतेऽनुशुष्य हैवांततो म्रिय
त इत्यध्यात्मं ॥२१॥ अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्य
हमित्यादित्यो भास्याम्यहमि॑ चंद्रमा एवमन्या देवता यथादैवतं स यथैषां प्राणा
ति

॥रण्यं॥

॥बृह॰॥

॥१५॥

नामध्यमः प्राण एवमेतासां देवतानां वायुर्म्लोचंति ह्यन्या देवता न वा

युः सैषाऽनस्तमिता देवता यद्वायुः ॥२२॥ अथैष श्लोको भवति यतश्चोदेति

सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रि

रे धर्मं स एवाद्य स उ श्व इति यद्वा एतेऽमुर्ह्यध्रियंत तदेवाप्यद्य कुर्वंति तस्मा

देकमेव व्रतं चरेत्प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरे

त्समापिपयिषेत्तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयति य एवं वेद ॥

॥२३॥ ॥ब्राह्मणं॥ ॥५॥ ॥त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागित्येतदे

षामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठंत्येतदेषां साममेतद्धि सर्वैर्नामभिः सम

मेतदेषां ब्रह्मैतद्धि सर्वाणि नामानि बिभर्त्ति ॥१॥ अथ रूपाणां चक्षुरित्येत

॥कण्व॥

॥१५॥

देषामुक्थमतो हि सर्वाणि रूपाण्युत्तिष्ठंत्येतदेषां सामैतद्धि सर्वै रूपैः सममे
तदेषां ब्रह्मैतद्धि सर्वाणि रूपाणि बिभर्त्ति ॥२॥ अथ कर्मणामात्मेत्येतदेषामु
क्थमतो हि सर्वाणि कर्माण्युत्तिष्ठंत्येतदेषां सामैतद्धि सर्वैः कर्मभिः सममे
तदेषां ब्रह्मैतद्धि सर्वाणि कर्माणि बिभर्त्ति तदेतत्त्रयं सदेकमयमात्मात्मा
मो एकः सन्नेतत्त्रयं तदेतदमृतं सत्येन छन्नं प्राणो वा अमृतं नामरूपे स
त्यं ताभ्यामयं प्राणश्छन्नः ॥३॥ ॥ब्राह्मण॥ ॥६॥ ॥इति बृहदारण्यके प्रथ
मोध्यायः ॥ ॥१॥ ॥दृप्तबालाकिर्हानूचानो गार्ग्य आस ॥ स होवाचाजातशत्रुं
काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको ज
नक इति वै जना धावंतीति ॥१॥ स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवा

॥ बृह० ॥

॥ १६ ॥

॥ रण्यं ॥

य२

हं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मू
र्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा रा
जा भवति ॥ २ ॥ स होवाच गार्ग्यो य एवासौ चंद्रे पुरुष एतमेवाहं ब्रह्मोपास इति स हो
वाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठा बृहन्पांडरवासाः सोमो राजेति वा अहमेत
मुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥
॥ ३ ॥ स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजा
तशत्रुर्मा मैतस्मिन्संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते
तेजस्वी ह भवति तेजस्वि हास्य प्रजा भवति ॥ ४ ॥ स होवाच गार्ग्यो य एवायमाकाशे
पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन्संवदिष्ठाः पू

नीर

॥ कृष्ण ॥

॥ १६ ॥

र्णमप्रवर्त्तइतिवा अहमेतमुपासइतिसयएतमेवमुपास्तेपूर्यतेप्रजयापशुभि
र्नास्यास्माल्लोकात्प्रजोद्वर्त्तते॥५॥सहोवाचगार्ग्योयएवायंवायोपुरुषएतमेवा
हंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाइन्द्रोवैकुंठोपराजि
तासेनेतिवा अहमेतमुपासइतिसयएतमेवमुपास्तेजिष्णुर्हापराजिष्णुर्भ
वत्यन्यतस्त्यजायी॥६॥सहोवाचगार्ग्योयएवायमग्नौपुरुषएतमेवाहंब्रह्मो
पासइतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाविषासहिरितिवा अहमे
तमुपासइतिसयएतमेवमुपास्तेविषासहिर्हभवतिविषासहिर्हास्यप्रजाभवति॥७॥
सहोवाचगार्ग्योयएवायमप्सुपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातश
त्रुर्मामैतस्मिन्संवदिष्ठाःप्रतिरूपइतिवा अहमेतमुपासइतिसयएतमेवमु

३पा

मेत२

पास्तेप्रतिरूपꣳहैवैनमुपगच्छतिनाप्रतिरूपमथोऽप्रतिरूपोऽस्माज्जायते॥८॥
सहोवाचगार्ग्योयएवायमादर्शेपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातश
त्रुर्मामैतस्मिन्संवदिष्ठारोचिष्णुरितिवाअहमुपासइतिसयएतमेवमुपास्तेरो
चिष्णुर्हभवतिरोचिष्णुर्हास्यप्रजाभवत्यथोयैःसन्निगच्छतिसर्वाꣳस्तानतिरो
चते॥९॥सहोवाचगार्ग्योयएवायंयंतंपश्चाच्छब्दोनुदेत्येतमेवाहंब्रह्मोपास
इतिसहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाअसुरितिवाअहमेतमुपासइ
तिसयएतमेवमुपास्तेसर्वꣳहैवास्मिंल्लोकआयुरेतिनैनंपुराकालात्प्राणो
जहाति॥१०॥सहोवाचगार्ग्योयएवायंदिक्षुपुरुषएतमेवाहंब्रह्मोपासइतिस
होवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाद्वितीयोऽनपगइतिवाअहमेतमुपास

इतिसयएतमेवमुपास्ते द्वितीयवान्हभवतिनास्माद्गणश्छिद्यते॥११॥सहोवाच
गार्ग्योयएवायंछायामयःपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातश
त्रुर्मामैतस्मिन्संवदिष्ठामृत्युरितिवाअहमेतमुपासइतिसयएवमुपास्तेसर्वं
हैवास्मिंल्लोकआयुरेतिनैनंपुराकालान्मृत्युरागच्छति॥१२॥सहोवाचगार्ग्योय
एवायमात्मनिपुरुषएतमेवाहंब्रह्मोपासइतिसहोवाचाजातशत्रुर्मामैतस्मि
न्संवदिष्ठाआत्मन्वीतिवाअहमेतमुपासइतिसयएतमेवमुपास्तआत्मन्वीह
भवत्यात्मन्विनीहास्यप्रजाभवतिसहतूष्णीमासगार्ग्यः॥१३॥सहोवाचाजातशत्रु
रेतावन्नू३इत्येतावद्धीतिनैतावताविदितंभवतीतिसहोवाचगार्ग्यउपत्वायानी
ति॥१४॥सहोवाचाजातशत्रुःप्रतिलोमंचैतद्यद्ब्राह्मणःक्षत्रियमुपेयाद्ब्रह्ममेव

न्वि३

ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादायोत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्म
तुस्तमेतैर्नामभिरामंत्रयांचक्रे बृहन्पांडरवासः सोमराजन्निति स नोत्तस्थौ
तं पाणिना पेषं बोधयांचकार स होत्तस्थौ ॥१५॥ स होवाचाजातशत्रुर्यत्रैष एत
त्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत्कुत एतदागादिति तदु ह न मे
ने गार्ग्यः ॥१६॥ स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पु
रुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोंऽतर्हृदय आकाशस्तस्मिंछे
ते तानि यदा गृह्णात्यथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृही
ता वाग्गृहीतं चक्षुर्गृहीतꣳ श्रोत्रं गृहीतं मनः ॥१७॥ स यत्रैतत्स्वप्न्यया चरति
ते हास्य लोकास्तदुतेव महाराजो भवत्युतेव महाब्राह्मण उतेवोच्चावचं निग

छतिसयथामहाराजोजानपदान्गृहीत्वास्वेजनपदेयथाकामंपरिवर्तेतैवमेवै
षएतत्प्राणान्गृहीत्वास्वेशरीरेयथाकामंपरिवर्त्तते॥१८॥अथयदासुषुप्तो
भवतियदानकस्यचनवेदहितानामनाड्योद्वासप्ततिसहस्राणिहृदयात्पुरीतत
मभिप्रतिष्ठंतेताभिःप्रत्यवसृप्यपुरीततिशेतेसयथाकुमारोवामहाराजोवामहा
ब्राह्मणोवातिघ्नीमानंदस्यगत्वाशयीतैवमेवैषएतच्छेते॥१९॥सयथोर्णनाभि
स्तंतुनोच्चरेद्यथाऽग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्रा
णाःसर्वेलोकाःसर्वेदेवाःसर्वाणिभूतानिसर्वएतआत्मानोव्युच्चरंतितस्योपनि
षत्सत्यस्यसत्यमितिप्राणावैसत्यंतेषामेषसत्यं॥२०॥ ॥ब्राह्मणं॥ ॥१॥ ॥योह
वैशिशुंसाधानंसप्रत्याधानंसस्थूणंसदामंवेदसप्तहद्विषतोभ्रातृव्यान्

बरुणः ध्ययं वाव शिशुर्योयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः
स्थूणा ऽन्नं दाम ॥१॥ तमेताः सप्ताक्षितय उपतिष्ठंते तद्या इमा अक्षन्लोहिन्यो रा
जयस्ताभिरेनं रुद्रो ऽन्वायत्तो ऽथ या अक्षन्नापस्ताभिः पर्जन्यो या कनीनका तया
दित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेंद्रो धरयैनं वर्त्तन्या पृथिव्यन्वायत्ता द्यौरु
त्तरया नास्यान्नं क्षीयते य एवं वेद ॥२॥ तदेषः श्लोको भवत्यर्वाग्बिलश्चमस
ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपं तस्यासत ऋषयः सप्त तीरे वागष्टमी
ब्रह्मणा संविदानेत्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इतीदं तच्छिर एष ह्यर्वाग्बिल
श्चमस ऊर्ध्वबुध्नस्तस्मिन्यशो निहितं विश्वरूपमिति प्राणा वै यशो विश्वरूपं
प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदा

हवागष्टमीब्रह्मणासंविदानेतिवाग्घ्यष्टमीब्रह्मणासंवित्ते॥३॥इमावेवगोतम
भरद्वाजावयमेवगोतमोयंभरद्वाजइमावेवविश्वामित्रजमदग्नीअयमेवविश्वामित्रोयंजमदग्निरिमावेववसिष्ठकश्यपावयमेववसिष्ठोयंकश्यपोवागे
वात्रिर्वाचाह्यन्नमद्यतेऽत्तिर्हवैनामैतद्यदत्रिरितिसर्वस्यात्ताभवतिसर्वमस्या
न्नंभवतियएवंवेद॥४॥ ॥ब्राह्मणं॥ ॥२॥ ॥द्वेवावब्रह्मणोरूपेमूर्तंचैवामूर्तंच
मर्त्यंचामृतंचस्थितंचयच्चसच्चत्यंच॥१॥तदेतन्मूर्तंयदन्यद्वायोश्चांतरि
क्षाच्चैतन्मर्त्यमेतत्स्थितमेतत्सत्तस्यैतस्यमूर्तस्यैतस्यमर्त्यस्यैतस्यस्थितस्यै
तस्यसतएषरसोयएषतपतिसतोह्येषरसः॥२॥अथामूर्तंवायुश्चांतरिक्षंचैत
दमृतमेतद्यदेतत्त्यंतस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्ययतएतस्यत्यस्यैषर

चै ५

॥बृह०॥ ॥२०॥

सोय एष एतस्मिन्मंडले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतं॥३॥अथाध्यात्ममिद
मेव मूर्तं यदन्यत्प्राणाच्च यश्चायमंतरात्मन्नाकाश एतन्मर्त्यमेतत्स्थितमेत
त्सत्तस्यैतस्य मूर्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो यच्चक्षुः
सतो ह्येष रसः॥४॥अथामूर्तं प्राणश्च यश्चायमंतरात्मन्नाकाश एतदमृतमेत
द्यदेतत्त्यं तस्यैतस्यामूर्तस्यैतस्यामृतस्यैतस्य एतस्यात्तस्यैष रसो योयं
दक्षिणेऽक्षन्पुरुषस्त्यस्य ह्येष रसः॥५॥तस्य हैतस्य पुरुषस्य रूपं॥यथा माहार
जनं वासो यथा पांड्वाविकं यथेंद्रगोपो यथाग्न्यर्चिर्यथा पुंडरीकं यथा सकृद्वि
द्युत्तं सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेदाथात आदेशो नेति नेति न
ह्येतस्मादिति नेत्यन्यत्परमस्त्यथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं

॥रण्यं॥ ॥रूप॥ ॥२०॥

षामेव स सं॥६॥ ॥ब्राह्मणं॥ ॥३॥ ॥मैत्रेयीति होवाच याज्ञवल्क्य उद्यास्यन्वा
अरेऽहमस्मात्स्थानादस्मि हंत तेऽनया कात्यायन्याऽन्तं करवाणीति॥१॥ सा होवा
च मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्कथं तेनामृता स्यामि
ति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्या
दमृतत्वस्य तु नाशाऽस्ति वित्तेनेति॥२॥ सा होवाच मैत्रेयी॥ येनाहं नामृता स्यां
किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति॥३॥ स होवाच याज्ञवल्क्यः॥
प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे नि
दिध्यासस्वेति॥४॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु
कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मन

॥ बृह० ॥

॥ २१ ॥

॥ रण्य ॥

स्तुकामायजायाप्रियाभवतिनवाअरेपुत्राणांकामायपुत्राःप्रियाभवंत्यात्म
नस्तुकामायपुत्राःप्रियाभवंतिनवाअरेवित्तस्यकामायवित्तंप्रियंभवत्यात्म
नस्तुकामायवित्तंप्रियंभवतिनवाअरेब्रह्मणःकामायब्रह्मप्रियंभवत्यात्मने
स्तुकामायब्रह्मप्रियंभवतिनवाअरेक्षत्रस्यकामायक्षत्रंप्रियंभवत्यात्मनस्तु
कामायक्षत्रंप्रियंभवतिनवाअरेलोकानांकामायलोकाःप्रियाभवंत्यात्मनस्तु
कामायलोकाःप्रियाभवंतिनवाअरेदेवानांकामायदेवाःप्रियाभवंत्यात्मनस्तु
कामायदेवाःप्रियाभवंतिनवाअरेभूतानांकामायभूतानिप्रियाणिभवंत्यात्म
नस्तुकामायभूतानिप्रियाणिभवंतिनवाअरेसर्वस्यकामायसर्वंप्रियंभवत्या
त्मनस्तुकामायसर्वंप्रियंभवत्यात्मावाअरेद्रष्टव्यःश्रोतव्योमंतव्योनिदिध्या

॥ कृष्ण ॥

॥ २१ ॥

सितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं ॥५॥
ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनः क्षत्रं वेद लो
कास्तं परादुर्योन्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद भू
तानि तं परादुर्योन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्योन्यत्रात्मनः सर्वं वेदेदं
ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमानि भूतानीदं सर्वं यदयमात्मा ॥६॥ स यथा
दुंदुभेर्हन्यमानस्य न बाह्यांछब्दांछक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदु
भ्याघातस्य वा शब्दो गृहीतः ॥७॥ स यथा शंखस्य ध्मायमानस्य न बाह्यांछब्दां
छक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंखध्मस्य वा शब्दो गृहीतः ॥८॥ स यथा
वीणायै वाद्यमानायै न बाह्यांछब्दांछक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणा

॥ रण्य ॥

॥ बृह० ॥

॥ २२ ॥

वादस्य वा शब्दो गृहीतः ॥९॥ स यथार्द्रैधाग्नेरभ्याहितात्पृथग्धूमा विनिश्चरं
त्येवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽ
थर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि
व्याख्यानान्यस्यैवैतानि निःश्वसितानि ॥१०॥ स यथा सर्वासामपां समुद्र एका
यनमेवं सर्वेषां स्पर्शानां त्वगेकायनमेवं सर्वेषां रसानां जिह्वैकायनमे
वं सर्वेषां गंधानां नासिके एकायनमेवं सर्वेषां रूपाणां चक्षुरेकायनमे
वं सर्वेषां शब्दानां श्रोत्रमेकायनमेवं सर्वेषां संकल्पानां मन एकायन
मेवं सर्वासां विद्यानां हृदयमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायन
मेवं सर्वेषामानंदानामुपस्थ एकायनमेवं सर्वेषां विसर्गाणां पायुरेकायन

॥ कृष्ण ॥

॥ २२ ॥

मेवं सर्वेषामध्वनां पादावेकायनमेवं सर्वेषां वेदानां वागेकायनं ॥११॥ सय
था सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्योद्ग्रहणायेव स्याद्य
तो यतस्त्वाददीत लवणमेवैवं वा अर इदं महद्भूतमनंतमपारं विज्ञानघन ए
वैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमी
ति होवाच याज्ञवल्क्यः ॥१२॥ सा होवाच मैत्रेय्यत्रैव मा भगवान मूमुहन्न प्रेत्य सं
ज्ञास्तीति स होवाच न वा अरेहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय ॥१३॥ यत्र
हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरं
शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति
यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्केन कं शृणुयात्त

तेन

॥बृह०॥ ॥रण्यं॥

॥२३॥

केन कमभिवदेत्तत्केन कं मन्वीत तत्केन कं विजानीयाद्येनेदं सर्वं विजानाति तं केन विजानीयाद्विज्ञातारमरे केन विजानीयादिति॥१४॥ ॥ब्राह्मणं॥ ॥४॥ ॥ इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं॥१॥ इमा आपः सर्वेषां भूतानां मध्वासामपां सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं॥२॥ अयमग्निः सर्वेषां मध्वस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वा

२ भूतानां

॥हरिः॥

॥२३॥

95

न्नायस्तेजोमयोऽमृतमयः पुरुषोयमेव स योयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं॥
॥३॥अयं वायुः सर्वेषां भूतानां मध्वस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मि
न्वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः
पुरुषोयमेव स योयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं॥४॥अयमादित्यः सर्वेषां
भूतानां मध्वस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽ
मृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोयमेव स यो
यमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं॥५॥इमा दिशः सर्वेषां भूतानां मध्वासां दिशाꣳ
सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायम
ध्यात्मꣳ श्रौत्रः प्रातिश्रुत्कस्तेजोमयोऽमृतमयः पुरुषोयमेव स योयमात्मेदम

॥बृह०॥

॥२४॥

॥रण्य॥

मृतमिदं ब्रह्मेद ँ सर्वं ॥६॥ अयं चंद्रः सर्वेषां भूतानां मध्वस्य चंद्रस्य सर्वाणि भूता
नि मधु यश्चायमस्मिंश्चंद्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानस
स्तेजोमयोऽमृतमयः पुरुषोयमेव सयोयमात्मेदममृतमिदं ब्रह्मेद ँ सर्वं ॥७॥ इ
यं विद्युत्सर्वेषां भूतानां मध्वस्या विद्युतः सर्वाणि भूतानि मधु यश्चायमस्यां विद्यु
ति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजसस्तेजोमयोऽमृतमयः पु
रुषोयमेव सयोयमात्मेदममृतमिदं ब्रह्मेद ँ सर्वं ॥८॥ अयं स्तनयित्नुः सर्वेषां भू
तानां मध्वस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिं स्तनयित्नौ तेजोम
योऽमृतमयः पुरुषो यश्चायमध्यात्म ँ शाब्दः सौवरस्तेजोमयोऽमृतमयः पुरुषो
यमेव सयोयमात्मेदममृतमिदं ब्रह्मेद ँ सर्वं ॥९॥ अयमाकाशः सर्वेषां भूतानां म

॥बृहत्॥

॥२४॥

297

ध्वस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः ४
पुरुषो यश्चायमध्यात्मं हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमा
त्मेदममृतमिदं ब्रह्मेदं सर्वं ॥१०॥ अयं धर्मः सर्वेषां भूतानां मध्वस्य धर्मस्य सर्वा
णि भूतानि मधु यश्चायमस्मिन्धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्या
त्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं स
र्वं ॥११॥ इदं सत्यं सर्वेषां भूतानां मध्वस्य सत्यस्य सर्वाणि भूतानि मधु यश्चा
यमस्मिन्सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं सात्यस्तेजोमयोऽ
मृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्वं ॥१२॥ इदं मानुषं
सर्वेषां भूतानां मध्वस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्मानुषे ते

।।२५।।

जोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानुषस्तेजोमयोऽमृतमयः पुरुषोऽयमे
व स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं।।१३।।अयमात्मा सर्वेषां भूतानां मध्वस्या
त्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चा
यमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदꣳ सर्वं।।
१४।।स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानाꣳ राजा तद्यथा रथ ।।हरि।।
नाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः ।।२५।।
सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः।।१५।।इदं वै तन्मधु दध्यङ्ङाथ
र्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्।।तद्वां नरा सनये दꣳस उग्रमावि
ष्कृणोमि तन्यतुर्न वृष्टिं दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाचेति।।१६।।

इदंवैतन्मधुदध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः पश्यन्नवोचत्॥ आथर्व
णायाश्विनादधीचेऽश्व्यंशिरः प्रत्यैरयतं स वांमधुप्रवोचदृतायन्त्वाष्ट्रंयद्दस्रा
वपिकक्ष्यंवामिति॥१७॥ इदंवैतन्मधुदध्यङ्ङाथर्वणोऽश्विभ्यामुवाच तदेतदृषिः
पश्यन्नवोचत्॥ पुरश्चक्रेद्विपदः पुरश्चक्रेचतुष्पदः पुरः सपक्षीभूत्वा पुरः पुरुष
आविशदितिसवाअयंपुरुषः सर्वासुपूर्षुपुरिशयोनैनेनकिंचनानावृतंनैनेनकिं
चनासंवृतं॥१८॥ इदंवैतन्मधुदध्यङ्ङाथर्वणोऽश्विभ्यामुवाचतदेतदृषिः पश्यन्न
वोचत्॥ रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिचक्षणाय॥ इंद्रोमायाभिः पुरुरू
पईयतेयुक्ताह्यस्यहरयः शतादशेत्ययंवैहरयोऽयंवैदशचसहस्राणिबहूनिचानं
तानिचतदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्माब्रह्मसर्वानुभूरित्यनु

॥बृह०॥ ॥रण्यं॥

॥२६॥

शासनं॥१२॥ ॥ब्राह्मणं॥ ॥५॥ ॥अथ वंशः॥ पौतिमाष्यो गौपवनाद्गौपवनः
पौतिमाष्यात्पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात्कौशिकः कौण्डिन्यात्कौण्डि
न्यः शाण्डिल्याच्छाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः॥१॥ आग्निवेश्यादा
ग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चानभिम्लात आनभिम्लातादानभिम्ला
त आनभिम्लातादानभिम्लातो गौतमाद्गौतमः सैतवप्राचीनयोग्याभ्यां सै
तवप्राचीनयोग्यौ पाराशर्यात्पाराशर्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्च गौत
माच्च गौतमो भारद्वाजाद्भारद्वाजः पाराशर्यात्पाराशर्यो वैजवापायनाद्वैजवापा
यनः कौशिकायनेः कौशिकायनिः॥२॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणा
त्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च

॥सूत्र॥

॥२६॥

यास्काद्यासुरायणस्त्रैवणेस्त्रैवणिरौपजंघनेरौपजंघनिरासुरेरासुरिर्भा
रद्वाजाद्भारद्वाज आत्रेयादात्रेयो मांटेर्मांटिर्गौतमाद्गौतमो गौतमाद्गौतमो वा
त्स्याद्वात्स्यः शांडिल्याच्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारी
तात्कुमारहारीतो गालवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्स
नपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पंथाः सौभरोऽयास्यादांगिरसा
दयास्य आंगिरस आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूप
स्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवाद
थर्वा दैवो मृत्योः प्राध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन ए
कर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनात

॥ बृह० ॥

॥ २७ ॥

३९

नात्मना ततः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्र
ह्मणे नमः ॥ ३ ॥ ॥ ब्राह्मणं ॥ ॥ ६ ॥ ॥ इति बृहदारण्यके द्वितीयोध्यायः ॥ ॥ २ ॥ ॥
जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे तत्र ह कुरुपंचालानां ब्राह्मणा अ
भिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव ॥ कः स्विदे
षां ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश
पादा एकैकस्याः शृंगयोराबद्धा बभूवुः ॥ १ ॥ तान्होवाच ॥ ब्राह्मणा भगवं
तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुरथ ह याज्ञव
ल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सामश्रवा३ इति ता होदाच
कार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेत्यथ ह जनकस्य वैदेह

॥ रण्यु ॥

॥ कश्म ॥

॥ २७ ॥

303

स्य होताऽश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोसी३
इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्म इति तं ह त
त एव प्रष्टुं दध्रे होताश्वलः ॥२॥ याज्ञवल्क्येति होवाच ॥ यदिदं सर्वं मृ
त्युनाप्तं सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति हो
त्रर्त्विजाग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक् सोयमग्निः स होता स मु
क्तिः सातिमुक्तिः ॥३॥ याज्ञवल्क्येति होवाच ॥ यदिदं सर्वमहोरात्राभ्यामा
प्तं सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत
इत्यध्वर्युणर्त्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्यदिदं चक्षुः
सोसावादित्यः सोऽध्वर्युः स मुक्तिः सातिमुक्तिः ॥४॥ याज्ञवल्क्येति होवाच ॥

॥ बृह०॥

॥२८॥

॥ रण्यं॥

यदिदꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिप
न्नं केन यजमानः पूर्वपक्षापरपक्षयोराप्तिमतिमुच्यत इत्युद्गात्रर्त्विजा वा
युना प्राणेन प्राणो वै यज्ञस्योद्गाता तद्योयं प्राणः स वायुः स उद्गाता स मुक्तिः
सातिमुक्तिः॥५॥ याज्ञवल्क्येति होवाच॥ यदिदमंतरिक्षमनारंबणमिव के
नाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ब्रह्मणर्त्विजा मनसा चंद्रेण मनो ॥ कण्वं॥
वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोसौ चंद्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यति ॥२८॥
मोक्षा अथ संपदः॥६॥ याज्ञवल्क्येति होवाच॥ कतिभिरयमद्यर्ग्भिर्होतास्
मिन्यज्ञे करिष्यतीति तिसृभिरिति कतमास्तास्तिस्र इति पुरोनुवाक्या च या
ज्या च शस्यैव तृतीया किं ताभिर्जयतीति यत्किंचेदं प्राणभृदिति॥ याज्ञ

वल्क्येति होवाच॥ कत्ययमद्याध्वर्युरस्मिन्यज्ञ आहुतीर्होष्यतीति तिस्र इति
कतमास्तास्तिस्र इति या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशे
रते किं ताभिर्जयतीति या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव
हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको
या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयत्यध इव हि मनुष्यलोकः॥८॥ याज्ञ
वल्क्येति होवाच॥ कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपाय
तीत्येकयेति कतमा सैकेति मन एवेत्यनन्तं वै मनोऽनन्ता विश्वे देवा अनन्तमे
व स तेन लोकं जयति॥९॥ याज्ञवल्क्येति होवाच॥ कत्ययमद्योद्गातास्मिन्यज्ञे
स्तोत्रियाः स्तोष्यतीति तिस्र इति कतमास्तास्तिस्र इति पुरोनुवाक्या च याज्या च

शस्यैव तृतीया कतमास्ता या अध्यात्ममिति प्राण एव पुरोनुवाक्याऽपानो याज्या
व्यानः शस्या किं ताभिर्जयतीति पृथिवीलोकमेव पुरोनुवाक्यया जयत्यंतरि
क्षलोकं याज्यया द्युलोकं शस्यया ततो ह होताऽश्वल उपरराम ॥१०॥ ॥ब्रा
ह्मणं॥ ॥१॥ अथ हैनं जारत्कारव आर्तभागः पप्रच्छ॥ याज्ञवल्क्येति होवाच॥
कति ग्रहाः कत्यतिग्रहा इत्यष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टाव
तिग्रहाः कतमे त इति॥१॥ प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन
हि गंधाञ्जिघ्रति॥२॥ वाग्वै ग्रहः स नाम्नाऽतिग्राहेण गृहीतो वाचा हि नामान्य
भिवदति॥३॥ जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्वि
जानाति॥४॥ चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि प

त्यति॥५॥श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दाञ्छृणोति॥६॥
मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान्कामयते॥७॥हस्तौ वै
ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म करोति॥८॥त्वग्वै ग्रहः स
स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावति
ग्रहाः॥९॥याज्ञवल्क्येति होवाच॥यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या
मृत्युरन्नमित्यग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति॥१०॥याज्ञव
ल्क्येति होवाच॥यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो३ नेति नेति
होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शे
ते॥११॥याज्ञवल्क्येति होवाच॥यत्रायं पुरुषो म्रियते किमेनं न जहातीति ना

॥ बृह० ॥

॥ ३० ॥

नैत्यनंतं वै नामानंता विश्वे देवा अनंतमेव स तेन लोकं जयति ॥१२॥ याज्ञवल्क्ये
ति होवाच ॥ यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मन
श्चंद्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन्केशा अ
प्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीत्याहर सोम्य हस्तमार्तभा
गावामेवैतस्य वेदिष्यावो न नावेतत्सजन इति तौ होत्क्रम्य मंत्रयांचक्राते तौ ह यदू
चतुः कर्म हैव तदूचतुरथ यत्प्रशशंसतुः कर्म हैव तत्प्रशशंसतुः पुण्यो वै
पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥१३॥
॥ ॥ ब्राह्मणं ॥ ॥२॥ ॥ अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ ॥ याज्ञवल्क्येति होवाच ॥
मद्रेषु चरकाः पर्यव्रजाम ते पतंचलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गं

॥ रण्यं ॥

॥ ३० ॥

धर्वगृहीतातमपृछामकोसीतिसोऽब्रवीत्सुधन्वांगिरसइतितंयदालोकाना
मंतानपृछामाथैनमब्रूमक्वपारिक्षिताअभवन्नितिक्वपारिक्षिताअभवन्स्त
त्वापृछामियाज्ञवल्क्यक्वपारिक्षिताअभवन्निति॥१॥सहोवाचोवाचवैसोग
छन्वैतेतत्रयत्राश्वमेधयाजिनोगच्छंतीतिक्वन्वश्वमेधयाजिनोगच्छंतीतिद्वात्रिंशं
तंवैदेवरथाह्न्यान्ययंलोकस्तंसमंतंपृथिवीद्विस्तावत्पर्येतितांसमंतंपृ
थिवीद्विस्तावत्समुद्रःपर्येतितद्यावतीक्षुरस्यधारायावद्वामक्षिकायाःपत्रंतावा
नंतरेणाकाशस्तानिंद्रःसुपर्णोभूत्वावायवेप्रायछत्तान्वायुरात्मनिधित्वातत्रा
गमयद्यत्राश्वमेधयाजिनोभवन्नित्येवमिववैसवायुमेवप्रशशंसतस्मा
द्वायुरेवव्यष्टिर्वायुःसमष्टिरपपुनर्मृत्युंजयतियएवंवेदततोहभुज्युर्लाह्याय

निरुपरराम ॥२॥ ॥ ब्राह्मणं ॥ ॥३॥ ॥ अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ ॥ या
ज्ञवल्क्येति होवाच ॥ यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेत्येष
त आत्मा सर्वांतरः कतमो याज्ञवल्क्य सर्वांतरो यः प्राणेन प्राणिति स त आत्मा स
र्वांतरो योऽपानेनापानिति स त आत्मा सर्वांतरो यो व्यानेन व्यानिति स त आत्मा
सर्वांतरो य उदानेनोदानिति स त आत्मा सर्वांतर एष त आत्मा सर्वांतरः ॥१॥ स
होवाचोषस्तश्चाक्रायणो यथा विब्रूयादसौ गौरसावश्व इत्येवमेवैतद्व्यपदिष्टं
भवति ॥ यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेत्येष त आत्मा
सर्वांतरः कतमो याज्ञवल्क्य सर्वांतरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारं शृणु
या न मतेर्मंतारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वांतरोऽ

तोऽन्यदार्त्तं ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥ ॥ ब्राह्मणं ॥ ॥ ४ ॥ ॥ अथ है
नं कहोलः कौषीतकेयः पप्रच्छ ॥ याज्ञवल्क्येति होवाच ॥ यदेव साक्षादपरोक्षाद्ब्र
ह्म य आत्मा सर्वांतरस्तं मे व्याचक्ष्वेत्येष त आत्मा सर्वांतरः कतमो याज्ञवल्क्य स
र्वांतरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येत्येतं वै तमात्मानं विदित्वा
ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाच
र्यं चरंति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एष
णे एव भवतस्तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पांडित्यं च
निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः केन स्याद्येन स्या
त्तेनेदृश एवातोऽन्यदार्त्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥ ॥ ब्राह्मणं ॥ ॥ ५ ॥ ॥

312

॥बृह॥ ॥रण्य॥

॥३२॥

अथ हैनं गार्गी वाचक्नवी पप्रच्छ ॥ याज्ञवल्क्येति होवाच ॥ यदिदं सर्वमप्स्वो
तं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु ख
लु वायुरोतश्च प्रोतश्चेत्यंतरिक्षलोकेषु गार्गीति कस्मिन्नु खल्वंतरिक्षलोका
ओताश्च प्रोताश्चेति गंधर्वलोकेषु गार्गीति कस्मिन्नु खलु गंधर्वलोका ओ
ताश्च प्रोताश्चेत्यादित्यलोकेषु गार्गीति कस्मिन्नु खल्वादित्यलोका ओता
श्च प्रोताश्चेति चंद्रलोकेषु गार्गीति कस्मिन्नु खलु चंद्रलोका ओताश्च प्रोताश्चे
ति नक्षत्रलोकेषु गार्गीति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्चेति देव
लोकेषु गार्गीति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्चेतींद्रलोकेषु गार्गी
ति कस्मिन्नु खल्विंद्रलोका ओताश्च प्रोताश्चेति प्रजापतिलोकेषु गार्गीति क

॥कस्य॥

॥३२॥

स्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्चेति ब्रह्मलोकेषु गार्गीति कस्मिन्नु
खलु ब्रह्मलोका ओताश्च प्रोताश्चेति स होवाच गार्गि माऽतिप्राक्षीर्मा ते मूर्धा व्य
पप्तदनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि माऽतिप्राक्षीरिति ततो ह गार्गी वा
चक्नव्युपरराम ॥१॥ ॥ब्राह्मणं॥ ॥६॥ ॥अथ हैनमुद्दालक आरुणिः पप्रच्छ
याज्ञवल्क्येति होवाच मद्रेष्ववसाम पतंचलस्य काप्यस्य गृहेषु यज्ञमधीया
नास्तस्यासीद्भार्या गंधर्वगृहीता तमपृच्छाम कोऽसीति सोऽब्रवीत्कबंध आथ
र्वण इति सोऽब्रवीत्पतंचलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तत्सूत्रं येनायं लो
कः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति सोऽब्रवीत्पतंचलः काप्यो
नाहं तद्भगवन्वेदेति सोऽब्रवीत्पतंचलं काप्यं याज्ञिकांश्च वेत्थ नु त्वं काप्य तम्

चं ३

314

॥ बृह॰ ॥

॥ २२ ॥

॥ ॰रण्य ॥

तर्यामिणं य इमं च लोकं परं च लोकं सर्वाणि च भूतानि यो ऽन्तरो यमयतीति सोऽब्र
वी॰ स तंचलः काप्यो नाहं तं भगवन्वेदेति सोऽब्रवीत्स तंचलं काप्यं याज्ञिकांश्च यो
वै तत्काप्य सूत्रं विद्यात्तं चांतर्यामिणमिति स ब्रह्मवित्स लोकवित्स देववित्स वेदवि
त्स भूतवित्स आत्मवित्स सर्वविदिति तेभ्योऽब्रवीत्तदहं वेद तच्चेत्त्वं याज्ञवल्क्यसू
त्रमविद्वांस्तं चांतर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा
अहं गौतम तत्सूत्रं तं चांतर्यामिणमिति यो वा इदं कश्चिद्ब्रूयाद्वेद वेदेति यथा वेत्थ
तथा ब्रूहीति॥१॥ स होवाच वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लो
कः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंति तस्माद्वै गौतम पुरुषं प्रेतमा
हुर्व्यस्रंसिषतास्यांगानीति वायुना हि गौतम सूत्रेण संदृब्धानि भवंतीत्येवमेवै

॥ रुद्र ॥

॥ ३३ ॥

315

तद्याज्ञवल्क्यांतर्यामिणं ब्रूहीति ॥२॥ यः पृथिव्यां तिष्ठन्पृथिव्या अंतरो यं पृथिवी
न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांऽतर्याम्यमृतः ॥३॥
यो ऽप्सु तिष्ठन्नद्भ्यो ऽंतरो यमापो न विदुर्यस्यापः शरीरं यो ऽपो ऽंतरो यमयत्येष त
आत्मांऽतर्याम्यमृतः ॥४॥ यो ऽग्नौ तिष्ठन्नग्नेरंतरो यमग्निर्न वेद यस्याग्निः श-
रीरं यो ऽग्निमंतरो यमयत्येष त आत्मांऽतर्याम्यमृतः ॥५॥ यो ऽंतरिक्षे तिष्ठन्नं-
तरिक्षादंतरो यमंतरिक्षं न वेद यस्यांतरिक्षं शरीरं यो ऽंतरिक्षमंतरो यमय-
त्येष त आत्मांऽतर्याम्यमृतः ॥६॥ यो वायौ तिष्ठन्वायोरंतरो यं वायुर्न वेद यस्य वायुः
शरीरं यो वायुमंतरो यमयत्येष त आत्मांऽतर्याम्यमृतः ॥७॥ यो दिवि तिष्ठन्दिवो ऽं-
तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमंतरो यमयत्येष त आत्मांऽतर्याम्यमृतः ॥८॥

य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमं
तरो यमयत्येष त आत्मांतर्याम्यमृतः ॥९॥ यो दिक्षु तिष्ठन्दिग्भ्योंतरो यं दिशो
न विदुर्यस्य दिशः शरीरं यो दिशोंतरो यमयत्येष त आत्मांतर्याम्यमृतः ॥१०॥
यश्चंद्रतारके तिष्ठंश्चंद्रतारकादंतरो यं चंद्रतारकं न वेद यस्य चंद्रतारकं
शरीरं यश्चंद्रतारकमंतरो यमयत्येष त आत्मांतर्याम्यमृतः ॥११॥ य आका
शे तिष्ठन्नाकाशादंतरो यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमंतरो
यमयत्येष त आत्मांतर्याम्यमृतः ॥१२॥ यस्तमसि तिष्ठंस्तमसोंतरो यं तमो न
वेद यस्य तमः शरीरं यस्तमोंतरो यमयत्येष त आत्मांतर्याम्यमृतः ॥१३॥ यस्ते
जसि तिष्ठंस्तेजसोंतरो यं तेजो न वेद यस्य तेजः शरीरं यस्तेजोंतरो यमयत्येष

तआत्मांतर्याम्यमृतइत्यधिदैवतमथाधिभूतं ॥१४॥ यः सर्वेषु भूतेषु तिष्ठन्सर्वे
भ्यो भूतेभ्योंतरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वा
णि भूतान्यंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यधिभूतमथाध्यात्मं ॥१५॥
यः प्राणे तिष्ठन्प्राणादंतरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमंतरो यम
यत्येष त आत्मांतर्याम्यमृतः ॥१६॥ यो वाचि तिष्ठन्वाचोंतरो यं वाङ्न वेद यस्य वा
क्शरीरं यो वाचमंतरो यमयत्येष त आत्मांतर्याम्यमृतः ॥१७॥ यश्चक्षुषि ति
ष्ठंश्चक्षुषोंतरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षुरंतरो यमयत्येष त
आत्मांतर्याम्यमृतः ॥१८॥ यः श्रोत्रे तिष्ठञ्छ्रोत्रादंतरो यं श्रोत्रं न वेद यस्य श्रोत्रं
शरीरं यः श्रोत्रमंतरो यमयत्येष त आत्मांतर्याम्यमृतः ॥१९॥ यो मनसि तिष्ठन्म

॥रह०॥
॥२५॥

नसोंतरोयंमनोनवेदयस्यमनःशरीरंयोमनोंतरोयमयत्येषतआत्मांतर्याम्य
मृतः॥२०॥यस्त्वचितिष्ठंस्त्वचोंतरोयंत्वङ्नवेदयस्यत्वक्शरीरंयस्त्वचमंत
रोयमयत्येषतआत्मांतर्याम्यमृतः॥२१॥योविज्ञानेतिष्ठन्विज्ञानादंतरोयं
विज्ञानंनवेदयस्यविज्ञानंशरीरंयोविज्ञानमंतरोयमयत्येषतआत्मांतर्या
म्यमृतः॥२२॥योरेतसितिष्ठन्रेतसोंतरोयंरेतोनवेदयस्यरेतःशरीरंयो
रेतोंतरोयमयत्येषतआत्मांतर्याम्यमृतोऽदृष्टोद्रष्टाऽश्रुतःश्रोताऽमतोमं
ताऽविज्ञातोविज्ञातानान्योतोस्तिद्रष्टानान्योतोस्तिश्रोतानान्योतोस्तिमंतानान्
योतोस्तिविज्ञातैषतआत्मांतर्याम्यमृतोऽतोन्यदार्त्तंततोहोद्दालकआरुणि
रुपरराम॥२३॥ ॥ब्राह्मणं॥ ॥७॥ ॥अथहवाचक्नव्युवाचब्राह्मणाभगवंतो

॥रण्य॥
॥रुस्म॥
॥२५॥

हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद्ब्रह्मो
द्यं जेतेति पृच्छ गार्गीति ॥१॥ साहोवाचाहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदे
हो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वो
पोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गीति ॥२॥
साहोवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे
यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥३॥ स होवाच
यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च
भविष्यच्चेत्याचक्षत आकाशे तदोतं च प्रोतं चेति ॥४॥ साहोवाच नमस्तेस्तु
याज्ञवल्क्य यो म एतं व्यवोचोऽपरस्मै धारयस्वेति पृच्छ गार्गीति ॥५॥ साहोवा

॥ रण्यं ॥

॥ ३६ ॥

त्यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं च
भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति ॥६॥ स होवाच यदूर्ध्वं
गार्गि दिवो यदवाक्पृथिव्या यदंतरा द्यावापृथिवी इमे यद्भूतं च भवच्च भवि
ष्यच्चेत्याचक्षत आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च
प्रोतश्चेति ॥७॥ स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमन
ण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसंगमरस
मगंधमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनंतर
मबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥८॥ एतस्य वा अक्षरस्य प्रशा
सने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गा

॥ रुस्म ॥

॥ ३९ ॥

द्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा
मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्त्ये
तस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः
प्रतीच्योऽन्या यां यां च दिशमन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो
मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः॥९॥ यो वा ए
तदक्षरं गार्ग्यविदित्वाऽस्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षस
हस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रै
ति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः॥१०॥
तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ श्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्य

॥३८॥

दतोस्तिद्रष्टृनान्यदतोस्तिश्रोतृनान्यदतोस्तिमंतृनान्यदतोस्तिविज्ञात्रेत
स्मिन्नुखल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्चेति॥११॥साहोवाचब्राह्मणाभ
गवंतस्तदेवबहुमन्येध्वंयदस्मान्नमस्कारेणमुच्येध्वंनवैजातुयुष्माकमि
मंकश्चिद्ब्रह्मोद्यंजेतेतिततोहवाचक्नव्युपरराम॥१२॥ ॥ब्राह्मणं॥ ॥८॥
अथहैनंविदग्धःशाकल्यःपप्रच्छकतिदेवायाज्ञवल्क्येतिसहैतयैव
निविदाप्रतिपेदेयावंतोवैश्वदेवस्यनिविद्युच्यंतेत्रयश्चत्रीचसहस्रेत्योमि
तिहोवाचकत्येवदेवायाज्ञवल्क्येतित्रयस्त्रिंशदित्योमितिहोवाचकत्येवदे
वायाज्ञवल्क्येतिषडित्योमितिहोवाचकत्येवदेवायाज्ञवल्क्येतित्रयइत्योमि
तिहोवाचकत्येवदेवायाज्ञवल्क्येतिद्वावित्योमितिहोवाचकत्येवदेवायाज्ञव

४. त्रीचशतात्रयश्च

॥बृह०॥ ॥३८॥

ल्क्येत्यध्यर्ध इत्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच
कतमे त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥१॥ स होवाच महिमान एवै
षामेते त्रयस्त्रिंशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एका
दश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशा
विति ॥२॥ कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च
चंद्रमाश्च नक्षत्राणि चैते वसव एतेषु हीदं वसु सर्वं हितमिति तस्माद्वस
व इति ॥३॥ कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्माच्छ
रीरान्मर्त्यादुत्क्रामंत्यथ रोदयंति तस्माद्रुद्रा इति ॥४॥ कतम आदित्या इति द्वा
दश वै मासाः संवत्सरस्यैत आदित्या एते हीदं सर्वमाददाना यंति ते यदिदं

२ तद्यद्रोदयंति

सर्वमाददानायंतितस्मादादित्याइति॥५॥कतमइंद्रःकतमःप्रजापतिरितिस्त
नयित्नुरेवेंद्रोयज्ञःप्रजापतिरितिकतमःस्तनयित्नुरित्यशनिरितिकतमो
यज्ञइतिपशवइति॥६॥कतमेषळित्यग्निश्चपृथिवीचवायुश्चांतरिक्षंचा
दित्यश्चद्यौश्चैतेषळेतेहीदंसर्वंषळिति॥७॥कतमेतेत्रयोदेवाइतीम
एवत्रयोलोकाएषुहीमेसर्वेदेवाइतिकतमौतौद्वौदेवावित्यन्नंचैवप्राणश्चे
तिकतमोऽध्यर्धइतियोयंपवतइति॥८॥तदाहुर्यदयमेकइवैवपवतेथ
कथमध्यर्धइतियदस्मिन्निदंसर्वमध्यार्ध्नोत्तेनाध्यर्धइतिकतमएकोदे
वइतिप्राणइतिसब्रह्मत्यदित्याचक्षते॥९॥पृथिव्येवयस्यायतनमग्निर्लोको
मनोज्योतिर्योवैतंपुरुषंविद्यात्सर्वस्यात्मनःपरायणंसवैवेदितास्याद्या

य२

ज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ शा
रीरः पुरुषः स एष वदैव शाकल्य तस्य का देवतेत्यमृतमिति होवाच ॥१०॥ काम
एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परा
यणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं
यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति स्त्रिय
इति होवाच ॥११॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं वि
द्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ
सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य
तस्य का देवतेति सत्यमिति होवाच ॥१२॥ आकाश एव यस्यायतनꣳ श्रोत्रं लोको

य

मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य
वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रोत्रः प्रातिश्रुत्क
ः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति दिश इति होवाच ॥ १३ ॥ तम ए
व यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः पराय
णꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं
यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य तस्य का देवतेति मृत्यु
रिति होवाच ॥ १४ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं वि
द्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ
सर्वस्यात्मनः परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्य तस्य

कादेवतेति स्त्रिय इति होवाच ॥१५॥ आप एव यस्यायतनꣳ हृदयं लोको मनो ज्योति
र्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्याद्याज्ञवल्क्य वेद वा
अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष व
देव शाकल्य तस्य का देवतेति वरुण इति होवाच ॥१६॥ रेत एव यस्यायतनꣳ
हृदयं लोको मनो ज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदि
ता स्याद्याज्ञवल्क्य वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवा
यं पुत्रमयः पुरुषः स एष वदेव शाकल्य तस्य का देवतेति प्रजापतिरिति होवाच ।
॥१७॥ शाकल्येति होवाच याज्ञवल्क्य त्वाꣳ स्विदिमे ब्राह्मणा अंगारावक्षयण
मक्रता ३ इति ॥१८॥ याज्ञवल्क्येति होवाच शाकल्यो यदिदं कुरुपंचालानां ब्रा

णानत्यवादीः किं ब्रह्म विद्वानिति दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ
सदेवाः सप्रतिष्ठाः ॥१९॥ किंदेवतोऽस्यां प्राच्यां दिश्यसीत्यादित्यदेवत इति स आ
दित्यः कस्मिन्प्रतिष्ठित इति चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितमिति रूपेष्वि
ति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति हृदय इति हो
वाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवंत्ये
वमेवैतद्याज्ञवल्क्य ॥२०॥ किंदेवतोऽस्यां दक्षिणायां दिश्यसीति यमदेवत इति स
यमः कस्मिन्प्रतिष्ठित इति यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति दक्षिणायामि
ति कस्मिन्नु दक्षिणा प्रतिष्ठितेति श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददा
ति श्रद्धायां ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति हृदय इति हो

वाच्च हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीत्येवमेवैतद्या
ज्ञवल्क्य ॥२१॥ किंदेवतोस्यां प्रतीच्यां दिश्यसीति वरुणदेवत इति स वरुणः
कस्मिन्प्रतिष्ठित इत्यप्स्विति कस्मिन्न्वापः प्रतिष्ठिता रेतसीति कस्मिन्नु रेतः प्र
तिष्ठितमिति हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदया
दिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीत्येवमेवैतद्याज्ञवल्क्य ॥२२॥
किंदेवतोस्यामुदीच्यां दिश्यसीति सोमदेवत इति स सोमः कस्मिन्प्रतिष्ठित इ
ति दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठितेति सत्य इति तस्मादपि दीक्षितमाहुः
सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति हृदय इति
होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीत्येवमेवैतद्या

॥६५॥

॥बृह॰॥ ॥४१॥

वल्क्य॥२३॥ किंदेवतोऽस्यां ध्रुवायां दिश्यसीत्यग्निदेवत इति सोऽग्निः कस्मिन्प्रतिष्ठि
त इति वाचीति कस्मिन्नु वाक्प्रतिष्ठितेति हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितमिति॥
॥२४॥ अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतदन्यत्रास्मन्मन्यासै यद्ध्येतदन्यत्रा
स्मत्स्याच्छ्वानो वैनदद्युर्वयांसि वैनद्विमथ्नीरन्निति॥२५॥ कस्मिन्नु त्वं चात्मा च
प्रतिष्ठितौ स्थ इति प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इति कस्मिन्न्व
पानः प्रतिष्ठित इति व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इत्युदान इति कस्मिन्नुदा
नः प्रतिष्ठित इति समान इति स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि
शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते न रिष्यत्येतान्यष्टावायतनान्यष्टौ
लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान्पुरुषान्निरुह्य प्रत्युह्यात्यक्रामत्तं त्वौ

२ इति

॥कृष्ण॥ ॥४१॥

पनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्द्धा ते विपतिष्यतीति तं ह न मेने
शाकल्यस्तस्य ह मूर्द्धा विपपातापि हास्य परिमोषिणोऽस्थीन्यपजह्रुरन्यन्मन्यमा
नाः ॥२६॥ अथ होवाच ब्राह्मणा भगवंतो यो वः कामयते स मा पृच्छतु सर्वे वा माप्ट
च्छत यो वः कामयते तं वः पृच्छामि सर्वान्वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥
॥२७॥ तान्हैतैः श्लोकैः पप्रच्छ ॥ यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा ॥ तस्य
लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥१॥ त्वच एवास्य रुधिरं प्रस्यंदि त्वच उत्प
टः ॥ तस्मात्तदातृण्णात्प्रैति रसो वृक्षादिवाहतात् ॥२॥ मांसान्यस्य शकराणि
किनाटं स्नाव तत्स्थिरं ॥ अस्थीन्यंतरतो दारूणि मज्जा मज्जोपमा कृता ॥३॥ यद्वृ
क्षो वृक्णो रोहति मूलान्नवतरः पुनः ॥ मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूला

तो२

॥ बृह० ॥ ॥ रत्ये ॥

॥ ४२ ॥

प्ररोहति ॥४॥ रेतस इति मा वोचत जीवतस्तत्प्रजायते ॥ धानारुह इव वै वृक्षो
ऽञ्जसा प्रेत्य संभवः ॥५॥ यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ॥ मर्त्यः स्विन्मृत्यु
नावृक्णः कस्मान्मूलात्प्ररोहति ॥६॥ जात एव न जायते को न्वेनं जनयेत्पुनः ॥ वि
ज्ञानमानंदं ब्रह्म रातिर्दातुः परायणं ॥ तिष्ठमानस्य तद्विद इति ॥७॥ २८॥ ॥ ब्रा
ह्मणं ॥ ॥९॥ ॥ इति बृहदारण्यके तृतीयोऽध्यायः ॥ ॥३॥ ॥ हरिः ॐ ॥ ॥ जनको ह
वैदेह आसांचक्रेऽथ ह याज्ञवल्क्य आवव्राज तं होवाच याज्ञवल्क्य किमर्थमचा
रीः पशूनिच्छन्नण्वन्तानित्युभयमेव सम्राडिति होवाच ॥१॥ यत्ते कश्चिदब्रवीत्त
च्छृणवामेत्यब्रवीन्मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान्पितृमानाचा
र्यवान्ब्रूयात्तथा तच्छैलिनोऽब्रवीद्वाग्वै ब्रह्मेत्यवदतो हि किं स्यादित्यब्रवीत्तु

॥ कुरुन ॥

॥ ४२ ॥

नेतस्यायतनंप्रतिष्ठांनमेऽब्रवीदित्येकपाद्वाएतत्सम्राळितिसवैनोब्रूहियाज्ञ
वल्क्यवागेवायतनमाकाशःप्रतिष्ठाप्रज्ञेत्येनदुपासीतकाप्रज्ञतायाज्ञवल्क्य
वागेवसम्राळितिहोवाचवाचावैसम्राड्बंधुःप्रज्ञायतऋग्वेदोयजुर्वेदःसाम
वेदोऽथर्वांगिरसइतिहासःपुराणंविद्याउपनिषदःश्लोकाःसूत्राण्यनुव्याख्या
नानिव्याख्यानानीष्टंहुतमाशितंपायितमयंचलोकःपरश्चलोकःसर्वाणि
चभूतानिवाचैवसम्राट्प्रज्ञायंतेवाग्वैसम्राट्परमंब्रह्मनैनंवाग्जहातिसर्वा
ण्येनंभूतान्यभिक्षरंतिदेवोभूत्वादेवानप्येतियएवंविद्वानेतदुपास्तेहस्त्यृष
भंसहस्रंददामीतिहोवाचजनकोवैदेहःसहोवाचयाज्ञवल्क्यःपितामेऽमन्य
तनाननुशिष्यहरेतेति॥२॥यदेवतेकश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मउ

334

॥बृह०॥ ॥४३॥

देङ्कः शौल्बायनः प्राणो वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छौल्बायनोऽब्रवीत्प्राणो वै ब्रह्मेत्यप्राणतो हि किं स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राळिति स वै नो ब्रूहि याज्ञवल्क्य प्राण एवायतनमाकाशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता याज्ञवल्क्य प्राण एव सम्राळिति होवाच प्राणस्य वै सम्राट्कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्य वै सम्राट्कामाय प्राणो वै सम्राट्परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य

॥रण्य॥

॥रुक्म॥ ॥४३॥

हरेतेति॥३॥यदेवतेकश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मेवर्कुर्वार्ष्णश्चक्षुर्वै
ब्रह्मेतियथामातृमान्पितृमानाचार्यवान्ब्रूयात्तथातद्वार्ष्णोऽब्रवीच्चक्षुर्वैब्रह्मे
त्यपश्यतोहिकिंस्यादित्यब्रवीत्तुतेतस्यायतनंप्रतिष्ठांनमेऽब्रवीदित्येकपाद्वा
एतत्सम्राळितिसवैनोब्रूहियाज्ञवल्क्यचक्षुरेवायतनमाकाशःप्रतिष्ठासत्य
मित्येनदुपासीतकासत्यतायाज्ञवल्क्यचक्षुरेवसम्राळितिहोवाचचक्षुषावै
सम्राट्पश्यन्तमाहुरद्राक्षीरितिसआहाद्राक्षमितितत्सत्यंभवतिचक्षुर्वैसम्रा
ट्परमंब्रह्मनैनंचक्षुर्जहातिसर्वाण्येनंभूतान्यभिक्षरन्तिदेवोभूत्वादेवानप्ये
तियएवंविद्वानेतदुपास्तेहस्त्यृषभंसहस्रंददामीतिहोवाचजनकोवैदेहःस
होवाचयाज्ञवल्क्यःपितामेऽमन्यतनाननुशिष्यहरेतेति॥४॥यदेवतेकश्चि

॥ १६ ॥ ॥ रुण्ड ॥

॥ ४४ ॥

दब्रवीत्तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मा
तृमान्पितृमानाचार्यवान्ब्रूयात्तथा तद्भारद्वाजोऽब्रवीच्छ्रोत्रं वै ब्रह्मेत्यशृण्वतो हि
किंꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राडिति स वै
नो ब्रूहि याज्ञवल्क्य श्रोत्रमेवायतनमाकाशः प्रतिष्ठाऽनंत इत्येनदुपासीत का
नंतता याज्ञवल्क्य दिश एव सम्राडिति होवाच तस्माद्वै सम्राडपि यां कां च दिशं
गच्छति नैवास्या अंतं गच्छत्यनंता हि दिशो दिशो वै सम्राट् श्रोत्रंꣳ श्रोत्रं वै सम्राट्
परमं ब्रह्म नैनंꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा देवानप्येति य
एवं विद्वानेतदुपास्ते हस्त्यृषभंꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवा
च याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥५॥ यदेव ते कश्चिदब्रवी

से ३

॥ कुल्म ॥

॥ ५५ ॥

337

लन्छृणवामेत्यब्रवीन्मेसत्यकामोजाबालोमनोवैब्रह्मेतियथामातृमान्पितृमा
नाचार्यवान्ब्रूयात्तथातज्जाबालोब्रवीन्मनोवैब्रह्मेत्यमनसोहिकिंस्यादित्यब्र
वीत्तुतेतस्यायतनंप्रतिष्ठांनमेब्रवीदित्येकपाद्वाएतत्सम्राडितिसवैनोब्रूहिया
ज्ञवल्क्यमनएवायतनमाकाशःप्रतिष्ठाऽनंदइत्येनदुपासीतकाऽनंदतायाज्ञ
वल्क्यमनएवसम्राडितिहोवाचमनसावैसम्राट्स्त्रियमभिहार्यतेतस्यांप्रति
रूपःपुत्रोजायतेसआनंदोमनोवैसम्राट्परमंब्रह्मनैनंमनोजहातिसर्वाण्ये
नंभूतान्यभिक्षरंतिदेवोभूत्वादेवानप्येतियएवंविद्वानेतदुपास्तेहस्त्यृषभं
सहस्रंददामीतिहोवाचजनकोवैदेहःसहोवाचयाज्ञवल्क्यःपितामेमन्यतना
ननुशिष्यहरेतेति॥६॥यदेवतेकश्चिदब्रवीत्तच्छृणवामेत्यब्रवीन्मेविदग्धःशा

॥ बृह० ॥

॥ ४५ ॥

कल्यो हृदयं वै ब्रह्मेति यथा मातृमान्पितृमानाचार्यवान्ब्रूयात्तथा तच्छाकल्यो
ब्रवीद्धृदयं वै ब्रह्मेत्यहृदयस्य हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्र
वीदित्येकपाद्वा एतत्सम्राळिति स वै नो ब्रूहि याज्ञवल्क्य हृदयमेवायतनमाका
शः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता याज्ञवल्क्य हृदयमेव सम्राळि
ति होवाच हृदयं वै सम्राट् सर्वेषां भूतानामायतनꣳ हृदयं वै सम्राट् सर्वेषां भू
तानां प्रतिष्ठा हृदये ह्येव सम्राट् सर्वाणि भूतानि प्रतिष्ठितानि भवंति हृदयं वै स
म्राट् परमं ब्रह्म नैनꣳ हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरंति देवो भूत्वा दे
वानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जन
को वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥ ॥ अ

॥ रुद्रं ॥

॥ रुद्र ॥

॥ ४५ ॥

स्मणं॥ ॥१॥ ॥ जनको ह वैदेहः कूर्चादुपावसर्पन्नुवाच नमस्तेऽस्तु याज्ञवल्क्यानु
मा शाधीति स होवाच यथा वै सम्राण्महांतमध्वानमेष्यन्रथं वा नावं वा समाददी
तैवमेवैताभिरुपनिषद्भिः समाहितात्मास्येवं वृंदारक आढ्यः सन्नधीतवेद उ
क्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्या
मीत्यथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति॥१॥ इंधो ह वै ना
मैष योऽयं दक्षिणेऽक्षन्पुरुषस्तं वा एतमिंधं संतमिंद्र इत्याचक्षते परोक्षेणैव
परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः॥२॥ अथैतद्वामेऽक्षिणि पुरुषरूपमेषाऽ
स्य पत्नी विराट् तयोरेष संस्तावो य एषोंतर्हृदय आकाशोऽथैनयोरेतदन्नं
य एषोंतर्हृदये लोहितपिंडोऽथैनयोरेतत्प्रावरणं यदेतदंतर्हृदये जालकमि

वाथैनयोरेषास्तृतिः संचरणी येषाहृदयादूर्ध्वानाड्युच्चरति यथाकेशः सहस्रधा
भिन्न एवमस्यैता हिता नाम नाड्योंतर्हृदये प्रतिष्ठिता भवंत्येताभिर्वा एतदास्रवदा
स्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवत्यस्माच्छारीरादात्मनः ॥३॥ तस्य
प्राची दिक्प्राञ्चः प्राणा दक्षिणा दिग्दक्षिणे प्राणाः प्रतीची दिक्प्रत्यञ्चः प्राणा उदी
ची दिगुदञ्चः प्राणा ऊर्ध्वा दिगूर्ध्वाः प्राणा अवाची दिगवाञ्चः प्राणाः सर्वा दिशः
सर्वे प्राणाः स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न
हि सज्यतेऽसितो न व्यथते न रिष्यत्यभयं वै जनक प्राप्तोसीति होवाच याज्ञवल्क्यः
स होवाच जनको वैदेहोऽभयं त्वा गच्छताद्याज्ञवल्क्य यो नो भगवन्नभयं वेदय
से नमस्तेस्त्विमे विदेहा अयमहमस्मि ॥४॥ ॥ब्राह्मणं॥ ॥२॥ ॥जनको ह वैदे

ह याज्ञवल्क्यो जगाम स मेने न वदिष्य इत्यथ ह यज्जनकश्च वैदेहो याज्ञवल्क्य
श्चाग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तं हा
स्मै ददौ तं ह सम्राडेव पूर्वः पप्रच्छ ॥१॥ याज्ञवल्क्य किंज्योतिरयं पुरुष इत्यादित्य
ज्योतिः सम्राडिति होवाचादित्येनैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरुते विपल्ये
तीत्येवमेवैतद्याज्ञवल्क्य ॥२॥ अस्तमित आदित्ये याज्ञवल्क्य किंज्योतिरेवायं पुरु
ष इति चंद्रमा एवास्य ज्योतिर्भवतीति चंद्रमसैवायं ज्योतिषाऽऽस्ते पल्ययते कर्म कुरु
३ ली ते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥३॥ अस्तमित आदित्ये याज्ञवल्क्य चंद्रमस्यस्त
मिते किंज्योतिरेवायं पुरुष इत्यग्निरेवास्य ज्योतिर्भवतीत्यग्निनैवायं ज्योतिषा
ऽऽस्ते पल्ययते कर्म कुरुते विपल्येतीत्येवमेवैतद्याज्ञवल्क्य ॥४॥ अस्तमित आदि

॥बृह०॥

॥४७॥

त्येयाज्ञवल्क्यचंद्रमस्यस्तमितेशांतेऽग्नौकिंज्योतिरेवायंपुरुषइतिवागेवास्य
ज्योतिर्भवतीतिवाचैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीतितस्मा
द्वैसम्राळपियत्रस्वःपाणिर्नविनिर्ज्ञायतेऽथयत्रवागुच्चरत्युपैवतत्रन्ये
तीत्येवमेवैतद्याज्ञवल्क्य॥५॥अस्तमितआदित्येयाज्ञवल्क्यचंद्रमस्यस्तमि
तेशांतेऽग्नौशांतायांवाचिकिंज्योतिरेवायंपुरुषइत्यात्मैवास्यज्योतिर्भव
तीत्यात्मनैवायंज्योतिषास्तेपल्ययतेकर्मकुरुतेविपल्येतीति॥६॥कतमआ
त्मेतियोयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषःससमानःसन्नुभौलोका
वनुसंचरतिध्यायतीवलेलायतीवसहिस्वप्नोभूत्वेमंलोकमतिक्रामतिमृ
त्योरूपाणि॥७॥सवाअयंपुरुषोजायमानःशरीरमभिसंपद्यमानःपाप्मभिः

॥कृष्ण॥

॥४७॥

सः ऽसृज्यते स उत्क्रामन्म्रियमाणः पाप्मनो विजहाति॥८॥ तस्य वा एतस्य पुरुष
स्य द्वे एव स्छाने भवत इदं च परलोकस्छानं च संध्यं तृतीयं स्वप्नस्छानं त
स्मिंत्संध्ये स्छाने तिष्ठन्नेते उभे स्छाने पश्यतीदं च परलोकस्छानं चाथ यथाक्र
मोयं परलोकस्छाने भवति तमाक्रममाक्रम्योभयान्पाप्मन आनंदांश्च पश्य
ति स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय स्वयं विहत्य स्वयं निर्मा
य स्वेन भासा स्वेन ज्योतिषा प्रस्वपित्यत्रायं पुरुषः स्वयंज्योतिर्भवति॥९॥ न त
त्र रथा न रथयोगा न पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजते न तत्रानं
दा मुदः प्रमुदो भवंत्यथानंदान्मुदः प्रमुदः सृजते न तत्र वेशांताः पुष्करिण्यः
स्रवंत्यो भवंत्यथ वेशांतान्पुष्करिण्यः स्रवंत्यः सृजते स हि कर्ता॥१०॥ तदेते श्लो

।।रण्यं।।

।।बृ०।।
।।४८।।

काभवंति।।स्वप्नेनशारीरमभिप्रहत्यासुप्तःसुप्तानभिचाकशीति।।शुक्रमादा
यपुनरैतिस्थानंहिरण्मयःपुरुषएकहंसः।।११।।प्राणेनरक्षन्नवरंकु
लायंबहिःकुलायादमृतश्चरित्वा।।सईयतेऽमृतोयत्रकामंहिरण्मयःपु
रुषएकहंसः।।१२।।स्वप्नांतउच्चावचमीयमानोरूपाणिदेवःकुरुतेबहू
नि।।उतेवस्त्रीभिःसहमोदमानोजक्षदुतेवापिभयानिपश्यन्।।१३।।आरा
ममस्यपश्यंतिनतंपश्यतिकश्चनेति।।तंनायतंबोधयेदित्याहुःदुर्भिषज्यं
हास्मैभवतियमेषनप्रतिपद्यतेऽथोखल्वाहुर्जागरितदेशएवास्यैषइतिया
निह्येवजाग्रत्पश्यतितानिसुप्तइत्यत्रायंपुरुषःस्वयंज्योतिर्भवतिसोऽहंभ
गवतेसहस्रंददाम्यतऊर्ध्वंविमोक्षायब्रूहीति।।१४।।सवाएषएतस्मिन्संप्रसा

।।कस्म।।
।।४८।।

देरत्वाञ्चरित्वादृष्ट्वैव पुण्यंच पापंच पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव

सयत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगोह्ययं पुरुष इत्येवमेवैतद्या

ज्ञवल्क्य सोहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥१५॥ सवा

एष एतस्मिन्स्वप्ने रत्वाचरित्वा दृष्ट्वैव पुण्यंच पापंच पुनः प्रतिन्यायं प्रतियो

न्याद्रवति बुद्धान्तायैव सयत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवत्यसंगोह्य

यं पुरुष इत्येवमेवैतद्याज्ञवल्क्य सोहं भगवते सहस्रं ददाम्यत ऊर्ध्वं विमो

३ वा

क्षायैव ब्रूहीति ॥१६॥ स एष एतस्मिन्बुद्धान्ते रत्वाचरित्वा दृष्ट्वैव पुण्यंच पापं

च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥१७॥ तद्यथा महामत्स्य उभे

कूले अनुसंचरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति

स्वप्नांतं च बुद्धांतं च ॥१८॥ तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य
श्रांतः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अंताय धा
वति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति ॥१९॥ ता वा अस्यै
ता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नस्तावताऽणिम्ना तिष्ठंति शुक्ल
स्य नीलस्य पिंगलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नंतीव जिनं
तीव हस्तीव विच्छाययति गर्त्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्रावि
द्यया मन्यतेऽथ यत्र देव इव राजेवाहमेवेदं सर्वोऽस्मीति मन्यते सोऽस्य पर
मो लोकः ॥२०॥ तद्वा अस्यैतदतिच्छंदा अपहतपाप्माऽभयं रूपं तद्यथा प्रि
यया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवायं पुरुषः प्राज्ञेनात्म

वैमे

नासंपरिष्वक्तो न बाह्यं किंचन वेद नांतरं तद्वा अस्यैतदाप्तकाममात्मकाममका
मं रूपं शोकांतरं ॥२१॥ अत्र पिताऽपिता भवति माताऽमाता लोका अलो
का देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चां
डालोऽचांडालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽन
न्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वाञ्छोकान्हृदयस्य भवति॥
॥२२॥ यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो वि
द्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्॥२३॥
यद्वै तन्न जिघ्रति जिघ्रन्वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यते
विनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत्॥२४॥ यद्वै तन्न

॥बृह॥

॥५०॥

॥रण्यं॥

रसयते रसयन्वै तन्न रसयते न हि रसयितू रसयतेर्विपरिलोपो विद्यते विना
शित्वान्न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं यद्रसयेत्॥२५॥ यद्वै तन्न वदति
वदन्वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वि
तीयमस्ति ततोन्यद्विभक्तं यद्वदेत्॥२६॥ यद्वै तन्न शृणोति शृण्वन्वै तन्न शृ
णोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति
ततोन्यद्विभक्तं यच्छृणुयात्॥२७॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न
हि मंतुर्मतेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोन्यद्वि
भक्तं यन्मन्वीत॥२८॥ यद्वै तन्न स्पृशति स्पृशन्वै तन्न स्पृशति न हि स्प्रष्टुः
स्पृष्टेर्विपरिलोपो विद्यते विनाशित्वान्न तु तद्द्वितीयमस्ति ततोन्यद्विभक्तं

॥रूरुल॥

॥५०॥

यत्स्पृशेत्॥२९॥ यद्वैतन्न विजानाति विजानन्वैतन्न विजानाति नहि विज्ञातु
र्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वान्न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं
यद्विजानीयात्॥३०॥ यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येदन्योऽन्यज्जि
घ्रेदन्योऽन्यद्रसयेदन्योऽन्यद्वदेदन्योऽन्यच्छृणुयादन्योऽन्यन्मन्वीतान्योऽन्यत्स्पृ
शेदन्योऽन्यद्विजानीयात्॥३१॥ सलिल एको द्रष्टाऽद्वैतो भवत्येष ब्रह्मलोकः
सम्राडिति हैनमनुशशास याज्ञवल्क्य एषास्य परमा गतिरेषास्य परमा
संपदेषोऽस्य परमो लोक एषोऽस्य परम आनंद एतस्यैवानंदस्यान्यानि भूता
नि मात्रामुपजीवंति॥३२॥ स यो मनुष्याणां राद्धः समृद्धो भवत्यन्येषाम
धिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनंदोऽ

थयेशतंमनुष्याणामानंदाः सएकः पितॄणांजितलोकानामानंदोथयेशतंपि
तॄणांजितलोकानामानंदाः सएकोगंधर्वलोकआनंदोथयेशतंगंधर्वलोक
आनंदाः सएकः कर्मदेवानामानंदोयेकर्मणादेवत्वमभिसंपद्यंतेथयेशतं
कर्मदेवानामानंदाः सएकआजानदेवानामानंदोयश्चश्रोत्रियोऽवृजिनोऽ
कामहतोथयेशतमाजानदेवानामानंदाः सएकः प्रजापतिलोकआनंदोय
श्चश्रोत्रियोऽवृजिनोऽकामहतोथयेशतंप्रजापतिलोकआनंदाः सएकोब्रह्म
लोकआनंदोयश्चश्रोत्रियोऽवृजिनोऽकामहतोथैषएवपरमआनंदएषब्रह्म
लोकः सम्राडितिहोवाचयाज्ञवल्क्यः सोहंभगवतेसहस्रंददाम्यतऊर्ध्वं
विमोक्षायैवब्रूहीत्यत्रहयाज्ञवल्क्योबिभयांचकारमेधावीराजासर्वेभ्यो

मांतेभ्य उद्दरौत्सीदिति॥३३॥स वा एष एतस्मिन्स्वप्नांते रत्वा चरित्वा दृष्ट्वैव पुण्यं
च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धांतायैव॥३४॥तद्यथाऽनः सु
समाहितमुत्सर्जद्यायादेवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ
उत्सर्जद्याति यत्रैतदूर्ध्वोच्छ्वासी भवति॥३५॥स यत्रायमणिमानं न्येति जे
रया वोपतपता वाणिमानं निगच्छति तद्यथाम्रं वोदुंबरं वा पिप्पलं वा बंधना
त्प्रमुच्यत एवमेवायं पुरुष एभ्योंगेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्या
द्रवति प्राणायैव॥३६॥तद्यथा राजानमायांतमुग्राः प्रत्येनसः सूतग्रामण्योऽ
न्नैः पानैरावसथैः प्रतिकल्पंतेऽयमायात्ययमागच्छतीत्येवꣳ हैवंविदꣳ स
र्वाणि भूतानि प्रतिकल्पंत इदं ब्रह्मायातीदमागच्छतीति॥३७॥तद्यथा राजा

नं प्रयियासंतमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायंत्येवमेवेममात्मान
मंतकाले सर्वे प्राणा अभिसमायंति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥३८॥ ॥ब्रा
ह्मणं ॥ ॥३॥ ॥स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव न्येत्यथैनमेते प्राणा अ
भिसमायंति स एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति स य
त्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्ततेऽथारूपज्ञो भवति ॥१॥ एकीभवति न
पश्यतीत्याहुरेकीभवति न जिघ्रतीत्याहुरेकीभवति न रसयत इत्याहुरेकीभ
वति न वदतीत्याहुरेकीभवति न शृणोतीत्याहुरेकीभवति न मनुत इत्याहु
रेकीभवति न स्पृशतीत्याहुरेकीभवति न विजानातीत्याहुस्तस्य हैतस्य हृ
दयस्याग्रं प्रद्योतते तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्ये

न्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे
प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति तं विद्याकर्मणी
समन्वारभेते पूर्वप्रज्ञा च ॥२॥ तद्यथा तृणजलायुका तृणस्यान्तं गत्वाऽन्यमा
क्रममाक्रम्यात्मानमुपसꣳहरत्येवमेवायमात्मेदꣳ शरीरं निहत्याविद्यां ग
मयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसꣳहरति ॥३॥ तद्यथा पेशस्कारी पेशसो
मात्रामपादायान्यन्नवतरं कल्याणतरꣳ रूपं तनुत एवमेवायमात्मेदꣳ शरी
रं निहत्याविद्यां गमयित्वाऽन्यन्नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं
वा दैवं वा प्राजापत्यं वा ब्राह्मं वाऽन्येषां वा भूतानां ॥४॥ स वा अयमात्मा ब्रह्म विज्ञान
मयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुम

य आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोध
मयो धर्ममयोऽधर्ममयः सर्वमयस्तद्यदेतदिदंमयोऽदोमय इति यथाकारी
यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पु
ण्येन कर्मणा भवति पापः पापेनाथो खल्वाहुः काममय एवायं पुरुष इति स
यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते
तदभिसंपद्यते ॥५॥ तदेष श्लोको भवति ॥ तदेव सक्तः सह कर्मणैति लिंगं म
नो यत्र निषक्तमस्य ॥ प्राप्यांतं कर्मणस्तस्य यत्किंचेह करोत्ययं ॥ तस्माल्लोका
त्पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथाकामयमानो योऽकामो निष्का
म आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामंति ब्रह्मैव सन्ब्रह्माप्येति ॥६॥ न

देषः श्लोको भवति ॥ यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ अथ मर्त्योऽमृतो
भवत्यत्र ब्रह्म समश्नुत इति ॥ तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयी
तैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भ
गवते सहस्रं ददामीति होवाच जनको वैदेहः ॥७॥ तदेते श्लोका भवंति ॥ अणुः
पंथा विततः पुराणो मां स्पृष्टोऽनुवित्तो मयैव ॥ तेन धीरा अपियंति ब्रह्मविदः स्व
र्गं लोकमित ऊर्ध्वं विमुक्ताः ॥८॥ तस्मिन्छुक्लमुत नीलमाहुः पिंगलं हरितं लो
हितं च ॥ एष पंथा ब्रह्मणा हानुवित्तस्तेनैति ब्रह्मवित्पुण्यकृत्तैजसश्च ॥९॥ अं
धं तमः प्रविशंति येऽविद्यामुपासते ॥ ततो भूय इव ते तमो य उ विद्यायां रताः ॥
॥१०॥ अनंदा नाम ते लोका अंधेन तमसावृताः ॥ तांस्ते प्रेत्याभिगच्छंत्यविद्वांसोऽ

बुधा जनाः ॥ ११ ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामा
य शरीरमनुसंज्वरेत् ॥ १२ ॥ यस्यानुवित्तः प्रतिबुद्ध आत्मास्मिन्संदेह्ये गहने प्र
विष्टः ॥ स विश्वकृत्स हि सर्वस्य कर्त्ता तस्य लोकः स उ लोक एव ॥ १३ ॥ इहैव संतोऽथ
विद्मस्तद्वयं न चेदवेदिर्महती विनष्टिः ॥ ये तद्विदुरमृतास्ते भवंत्यथेतरे दुःख
मेवापियंति ॥ १४ ॥ यदैतमनुपश्यत्यात्मानं देवमंजसा ॥ ईशानं भूतभव्यस्य न
ततो विजुगुप्सते ॥ १५ ॥ यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्त्तते ॥ तद्देवा ज्योति
षां ज्योतिरायुर्होपासतेऽमृतं ॥ १६ ॥ यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठितः ॥
तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोऽमृतं ॥ १७ ॥ प्राणस्य प्राणमुत चक्षुषश्च
क्षुरुत श्रोत्रस्य श्रोत्रं ॥ मनसो ये मनो विदुस्ते निचिक्युर्ब्रह्म पुराणमग्र्यं ॥ १८ ॥

मनसैवानुद्रष्टव्यंनेहनानास्तिकिंचन॥मृत्योःसमृत्युमाप्नोतियइहनानेवप
श्यति॥१९॥एकधैवानुद्रष्टव्यमेतदप्रमेयंध्रुवं॥विरजःपरआकाशादज
आत्मामहान्ध्रुवः॥तमेवधीरोविज्ञायप्रज्ञांकुर्वीतब्राह्मणः॥नानुध्याया
द्बहूञ्छब्दान्वाचोविग्लापनंहितदिति॥२०॥सवाएषमहानजआत्मायो
ऽयंविज्ञानमयःप्राणेषुयएषोऽन्तर्हृदयआकाशस्तस्मिंछेतेसर्वस्यवशी
सर्वस्येशानःसर्वस्याधिपतिःसनसाधुनाकर्मणाभूयान्नोएवासाधुनाक
नीयानेषसर्वेश्वरएषभूताधिपतिरेषभूतपालएषसेतुर्विधरणएषां
लोकानामसंभेदायतमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदाने
नतपसाऽनाशकेनैतमेवविदित्वामुनिर्भवत्येतमेवप्रव्राजिनोलोकमिच्छंतः

॥रण्यं॥

॥हह॥

॥५५॥

प्रव्रजंत्येतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते किं प्रजया करिष्यामो येषां
नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैष
णायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति या ह्येव पुत्रैषणा सा वित्तैषणा या
वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः स एष नेति नेत्यात्माऽगृ
ह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसंगो न हि सज्यतेऽसितो न व्यथते
न रिष्यत्येतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरव
मित्युभे उ हैवैष एते तरति नैनं कृताकृते तपतः॥२२॥ तदेतदृचाऽभ्युक्तं॥
एष नित्यो महिमा ब्राह्मणस्य न वर्द्धते कर्मणा नो कनीयान्॥ तस्यैव स्यात्प
दवित्तं विदित्वा न लिप्यते कर्मणा पापकेनेति॥ तस्मादेवंविच्छांतो दांत उप

॥हस्म॥

॥५५॥

रतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नै
नं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपा
२३ पो विरजोऽविचिकित्सो ब्राह्मणो भवत्येष ब्रह्मलोकः सम्राडिति होवाच याज्ञ
वल्क्यः सोऽहं भगवते विदेहान्ददामि मां चापि सह दास्यायेति ॥२२॥ स वा एष
महानज आत्माऽन्नादो वसुदानो विंदते वसु य एवं वेद ॥२३॥ स वा एष महान
जआत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति
य एवं वेद ॥२४॥ ॥ब्राह्मणं॥ ॥४॥ ॥अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतु
र्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि
कात्यायन्यथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥१॥ मैत्रेयीति होवा

॥ बृ॰ ॥ ॥ १४९ ॥

२ ति॥

॥ ५६ ॥

याज्ञवल्क्यः प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मि हंत तेऽनया कात्या
यन्याऽन्तं करवाणीति ॥२॥ सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्ते
न पूर्णा स्यात्कथं तेनामृता स्यामिति नेति नेति होवाच याज्ञवल्क्यो यथैवोपकर
णवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशाऽस्ति वित्तेनेति ॥३॥
सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद त
देव मे विब्रूहीति ॥४॥ स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रि
यमवृधद्धंत तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वे
ति ॥५॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय
पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु का

॥ कृष्ण ॥
॥ ५६ ॥

मायजाया प्रियाभवति न वा अरे पुत्राणां कामाय पुत्राः प्रियाभवंत्यात्मनस्तु का

माय पुत्राः प्रियाभवंति न वा अरे वित्तस्य कामाय वित्तं प्रियंभवत्यात्मनस्तु का

माय वित्तं प्रियंभवति न वा अरे पशूनां कामाय पशवः प्रियाभवंत्यात्मनस्तु का

माय पशवः प्रियाभवंति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियंभवत्यात्मनस्तु का

माय ब्रह्म प्रियंभवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियंभवत्यात्मनस्तु का

माय क्षत्रं प्रियंभवति न वा अरे लोकानां कामाय लोकाः प्रियाभवंत्यात्मनस्तु का

माय लोकाः प्रियाभवंति न वा अरे देवानां कामाय देवाः प्रियाभवंत्यात्मनस्तु का

माय देवाः प्रियाभवंति न वा अरे वेदानां कामाय वेदाः प्रियाभवंत्यात्मनस्तु का

माय वेदाः प्रियाभवंति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवंत्यात्मनस्तु

॥५७॥ कामाय भूतानि प्रियाणि भवंति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु का-
माय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यो मैत्रेय्या-
त्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं॥६॥ ब्रह्म तं परादाद्यो-
न्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्यो-
काण्ड ५ न्यत्रात्मनो लोकान्वेद देवास्तं परादुर्योन्यत्रात्मनो देवान्वेद वेदास्तं परादुर्यो- ॥ब्राह्मण॥
न्यत्रात्मनो वेदान्वेद भूतानि तं परादुर्योन्यत्रात्मनो भूतानि वेद सर्वं तं परादाद्यो- ॥४७॥
न्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानी-
दं सर्वं यदयमात्मा॥७॥ स यथा दुंदुभेर्हन्यमानस्य न बाह्यांछब्दांछक्नुया-
द्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघातस्य वा शब्दो गृहीतः॥८॥ स यथा

खस्य ध्मायमानस्य न बाह्यांछब्दांछक्नुयाद्ग्रहणाय शंखस्य तु ग्रहणेन शंख
ध्मस्य वा शब्दो गृहीतः ॥८॥ स यथा वीणायै वाद्यमानायै न बाह्यांछब्दांछक्नुया
द्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥९॥ स यथार्द्रैधा
ग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरंत्येवं वा अरेऽस्य महतो भूतस्य निःश्व
सितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या
उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पा
यितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्व
सितानि ॥१०॥ स यथा सर्वासामपां समुद्र एकायनमेवं सर्वेषां स्पर्शा
नां त्वगेकायनमेवं सर्वेषां रसानां जिह्वैकायनमेवं सर्वेषां गंधानां ना

सिके एकायनमेवं सर्वेषां रूपाणां चक्षुरेकायनमेवं सर्वेषां शब्दानां श्रो
त्रमेकायनमेवं सर्वेषां संकल्पानां मन एकायनमेवं सर्वासां विद्यानां हृद
यमेकायनमेवं सर्वेषां कर्मणां हस्तावेकायनमेवं सर्वेषामानंदानामुपस्थ
एकायनमेवं सर्वेषां विसर्गाणां पायुरेकायनमेवं सर्वेषामध्वनां पादावे
कायनमेवं सर्वेषां वेदानां वागेकायनं ॥१२॥ सयथा सैंधवघनोऽनंतरोऽबाह्यः
कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनंतरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैते
भ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमी
ति होवाच याज्ञवल्क्यः ॥१३॥ सा होवाच मैत्रेय्यत्रैव मा भगवान्मोहांतमापी
पिपन्न वा अहमिमं विजानामीति स होवाच न वा अरेऽहं मोहं ब्रवीम्यविनाशी

वा अरेऽयमात्माऽनुच्छित्तिधर्मा ॥१४॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्य
ति तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर इतरमभिवदति त
दितर इतरꣳ शृणोति तदितर इतरं मनुते तदितर इतरꣳ स्पृशति तदितर इ
तरं विजानाति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं जिघ्रेत्तत्केन
कꣳ रसयेत्तत्केन कमभिवदेत्तत्केन कꣳ शृणुयात्तत्केन कं मन्वीत तत्केन कꣳ
स्पृशेत्तत्केन कं विजानीयाद्येनेदꣳ सर्वं विजानाति तं केन विजानीयात्स एष ने
ति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो
न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनासि मैत्रे
य्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार ॥१५॥ ॥ब्राह्मणं॥ ॥५॥ ॥

॥अथ वंशः॥ पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात्पौतिमाष्यो गौपवना-
द्गौपवनः कौशिकात्कौशिकः कौंडिन्यात्कौंडिन्यः शांडिल्याच्छांडिल्यः कौशिका-
च्च गौतमाच्च गौतमः॥१॥ आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गा-
र्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात्सैतवः पाराशर्यायणात्पाराशर्या-
यणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायना-
ज्जाबालायनो माध्यंदिनायनान्माध्यंदिनायनः सौकरायणात्सौकरायणः का-
षायणात्काषायणः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिः
॥२॥ घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्या-
त्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रै-

वणेस्त्रैवणिरौपजंधनेरौपजंधनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाज आत्रे
यादात्रेयो मांटेर्मांटिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शांडिल्या
च्छांडिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गा
लवाद्गालवो विदर्भीकौंडिन्याद्विदर्भीकौंडिन्यो वत्सनपातो बाभ्रवाद्वत्स
नपाद्बाभ्रवः पथः सौभरात्पंथाः सौभरोऽयास्यादांगिरसादयास्य आंगिरस
आभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्याम
श्विनौ दधीच आथर्वणाद्दध्यङ्ङाथर्वणोऽथर्वणो दैवादथर्वा दैवो मृत्योः प्रा
ध्वंसनान्मृत्युः प्राध्वंसनः प्रध्वंसनात्प्रध्वंसन एकर्षेरेकर्षिर्विप्रचि
त्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः

परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥३॥ ॥ ब्राह्मणं ॥ ॥६॥ ॥इ
ति बृहदारण्यके चतुर्थोध्यायः ॥ ॥४॥ ॥हरिः ॐ ॥ ॥पूर्णमदः पूर्णमिदं पूर्णा
त्पूर्णमुदच्यते ॥ पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥१॥ ॥ ॐ शांतिः शां
तिः शांतिः ॥ ॥ ॐ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो
वेदोयं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यं ॥१॥ ॥ ब्राह्मणं ॥ ॥१॥ ॥त्रयः प्राजा
पत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा
ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञा
सिष्मेति होचुर्दाम्यतेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति ॥१॥ अथ हैनं म
नुष्या ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्य

ज्ञासिष्मेति होचुर्दत्तेति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति॥२॥ अथ हैनमसु
रा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति
व्यज्ञासिष्मेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदे
वैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत्त्र
यं शिक्षेद्दमं दानं दयामिति॥३॥ ॥ब्राह्मणम्॥२॥ ॥एष प्रजापतिर्यद्धृदय
मेतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरं हृदयमिति हृ इत्येकमक्षरमभिहरंत्यस्मै स्वा
श्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येक
मक्षरमेति स्वर्गं लोकं य एवं वेद॥१॥ ॥ब्राह्मणम्॥३॥ ॥तद्वै तदेतदेव तदास
सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमांल्लोकान्जि

॥ बृह० ॥

६१ ॥

त इन्न्वसावसद्य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यं ह्येव ब्रह्म ॥४॥ ॥
ब्राह्मणं ॥ ॥४॥ आप एवेदमग्र आसुस्ता आपः सत्यमसृजंत सत्यं ब्रह्म ब्रह्म
प्रजापतिं प्रजापतिर्देवांस्ते देवाः सत्यमेवोपासते तदेतत्त्र्यक्षरं सत्यमिति
स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽ
नृतं तदेतदनृतमुभयतः सत्येन परिगृहीतं सत्यभूयमेव भवति नैनं विद्वांसम
नृतं हिनस्ति ॥१॥ तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पु
रुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तावेतावन्योन्यस्मिन्प्रतिष्ठितौ रश्मिभिरे
षोऽस्मिन्प्रतिष्ठितः प्राणैरयममुष्मिन्स यदोत्क्रमिष्यन्भवति शुद्धमेवैत
न्मंडलं पश्यति नैनमेते रश्मयः प्रत्यायंति ॥२॥ य एष एतस्मिन्मंडले पु

॥ रणं ॥

॥ बृह० ॥

६१ ॥

371

रूपस्तस्य भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू
ते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हंति पा
प्मानं जहाति च य एवं वेद ॥ ३ ॥ योयं दक्षिणेऽक्षन्पुरुषस्तस्य भूरिति शिर एकं
शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे
प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हंति पाप्मानं जहाति च य एवं वेद ॥
॥ ४ ॥ ॥ ब्राह्मणं ॥ ५ ॥ ॥ मनोमयोयं पुरुषो भाःसत्यस्तस्मिन्नंतर्हृदये यथा
व्रीहिर्वा यवो वा स एष सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किं
च ॥ १ ॥ ॥ ब्राह्मणं ॥ ६ ॥ ॥ विद्युद्ब्रह्मेत्याहुर्विदानाद्विद्युद्विद्यत्येनं सर्वस्मात्पा
प्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युद्ध्येव ब्रह्म ॥ १ ॥ ॥ ब्राह्मणं ॥ ७ ॥ ॥ वाचं धेनु

मुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हंतकारः स्वधाकारस्त
स्यै द्वौ स्तनौ देवा उपजीवंति स्वाहाकारं च वषट्कारं च हंतकारं मनुष्याः स्वधा
कारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥१॥ ॥ब्राह्मणं॥ ॥८॥ ॥अयमग्नि
र्वैश्वानरो योऽयमंतः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति
यमेतत्कर्णावपिधाय शृणोति स यदोत्क्रमिष्यन् भवति नैनं घोषं शृणोति॥
॥१॥ ॥ब्राह्मणं॥ ॥९॥ ॥यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै
स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमाग
च्छति तस्मै स तत्र विजिहीते यथा लंबरस्य खं तेन स ऊर्ध्व आक्रमते स चंद्र
मसमागच्छति तस्मै स तत्र विजिहीते यथा दुंदुभेः खं तेन स ऊर्ध्व आक्रमते

सलोकमागच्छत्यशोकमहिमंतस्मिन्वसतिशाश्वतीः समाः॥१०॥ ॥ब्राह्मणं॥ ॥१०॥
॥ ॥एतद्वैपरमंतपोयद्व्याहितस्तप्यतेपरमंहैवलोकंजयतियएवंवेदेतद्वै
परमंतपोयंप्रेतमरण्यंहरंतिपरमंहैवलोकंजयतियएवंवेदैतद्वैपरमं
तपोयंप्रेतमग्नावभ्यादधतिपरमंहैवलोकंजयतियएवंवेद॥१॥ ॥ब्राह्मणं॥
॥ ॥११॥ ॥अन्नंब्रह्मेत्येकआहुस्तन्नतथापूयतिवाअन्नमृतेप्राणात्प्राणो
ब्रह्मेत्येकआहुस्तन्नतथाशुष्यतिवैप्राणऋतेऽन्नादेतेहत्वेवदेवतेएक
धाभूयंभूत्वापरमतांगच्छतस्तद्धस्माहप्रातृदःपितरंकिंस्विदेवैवंविदुषे
साधुकुर्यांकिमेवास्माअसाधुकुर्यामितिसहस्माहपाणिनामाप्रातृदकस्त्वे
नयोरेकधाभूयंभूत्वापरमतांगच्छतीतितस्माउहैतदुवाचवीत्यन्नंवैव्यन्ने

॥६६॥

॥६२॥

॥ रथं ॥

हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूता
नि रमंते सर्वाणि ह वा अस्मिन् भूतानि विशंति सर्वाणि भूतानि रमंते य एवं वेद ॥
॥१॥ ॥१२॥ ॥ उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयत्युद्धास्मादुक्थ
विद्वीरस्तिष्ठत्युक्थस्य सायुज्यं सलोकतां जयति य एवं वेद ॥१॥ यजुः प्राणो
वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यंते युज्यंते हास्मै सर्वाणि भूतानि
श्रैष्ठ्याय यजुषः सायुज्यं सलोकतां जयति य एवं वेद ॥२॥ साम प्राणो वै सा
म प्राणे हीमानि सर्वाणि भूतानि सम्यंचि सम्यंचि हास्मै सर्वाणि भूतानि श्रैष्ठ्या
य कल्पंते साम्नः सायुज्यं सलोकतां जयति य एवं वेद ॥३॥ क्षत्रं प्राणो वै क्ष
त्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्रक्षत्रमत्रमाप्नोति क्षत्रस्य सायु

प्राण ॥६३॥

॥ हस्त ॥ ६२

ज्यं सलोकतां जयति य एवं वेद ॥४॥ ॥अन्नम्॥ ॥१३॥ ॥भूमिरंतरिक्षं द्यौरि
त्यष्टावक्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदेषु त्रि
षु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥१॥ ऋचो यजूंषि सामानीत्यष्टाव
क्षराण्यष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावतीयं त्रयी विद्या ता

४५

वद्ध जयति योऽस्या एतदेवं पदं वेद ॥२॥ प्राणोऽपानो व्यान इत्यष्टावक्षराण्यष्टाक्ष
रं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या
एतदेवं पदं वेदाथास्या एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति यद्वै चतुर्थं

३६

तत्तुरीयं दर्शतं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युप
रि तपत्येवं हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥३॥ सैषा गायत्र्ये

तस्मिंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता तद्वै तत्सत्ये प्रतिष्ठितं चक्षुर्वै स
त्यं चक्षुर्हि वै सत्यं तस्माद्यदिदानीं द्वौ विवदमानावेयातामहमदर्शमहमश्रौषमि
ति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत्सत्यं बले प्रतिष्ठितं
प्राणो वै बलं तत्प्राणे प्रतिष्ठितं तस्मादाहुर्बलं सत्यादोगीय इत्येवम्वेषा गा
यत्र्यध्यात्मं प्रतिष्ठिता सा हैषा गयांस्तत्रे प्राणा वै गयास्तत्प्राणांस्तत्रे तद्यद्ग
यांस्तत्रे तस्माद्गायत्री नाम स यामेवामूं सावित्रीमन्वाहैषैव सा स यस्मा अन्वा
ह तस्य प्राणांस्त्रायते ॥४॥ तां हैतामेके सावित्रीमनुष्टुभमन्वाहुर्वागनुष्टु
बेतद्वाचमनुब्रूम इति न तथा कुर्याद्गायत्रीमेव सावित्रीमनुब्रूयाद्यदि ह वा अ
प्येवंविद्बह्विव प्रतिगृह्णाति न हैव तद्गायत्र्या एकंचन पदं प्रति ॥५॥ स य इमांस्

त्रीँल्लोकान्पूर्णान्प्रतिगृह्णीयात्सोस्या एतत्प्रथमं पदमाप्नुयादथ यावतीयं त्रयी वि
द्या यस्तावत्प्रतिगृह्णीयात्सोस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्र
तिगृह्णीयात्सोस्या एतत्तृतीयं पदमाप्नुयादथास्या एतदेव तुरीयं दर्शतं पदं परोरजा
य एष तपति नैव केनचनाप्यं कुत उ एतावत्प्रतिगृह्णीयात्॥६॥ तस्या उपस्थानं
गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे॥ नमस्ते तुरीयाय द
र्शताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यादसावस्मै कामो मा समृद्धी
ति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा॥७॥
एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविदब्रू
था अथ कथं हस्तीभूतो वहसीति मुखं ह्यस्याः सम्राण्न विदांचकारेति होवाच

378

॥ बृह ॥ ॥ रण्यं ॥

॥ ६५ ॥

तस्या अग्निरेव मुखं यदि ह वा अपि बह्विवाग्नावभ्यादधति सर्वमेव तत्संदहत्ये
वं हैवैवंविद्यद्यपि बह्विव पापं कुरुते सर्वमेव तत्संप्साय शुद्धः पूतोऽजरोऽमृ
तः संभवति ॥ ८ ॥ ॥ ब्राह्मणं ॥ ॥ १४ ॥ ॥ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं ॥
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १ ॥ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यू
ह रश्मीन्समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ॥ योऽसावसौ पुरुषः सो
ऽहमस्मि ॥ २ ॥ वायुरनिलममृतमथेदं भस्मान्तं शरीरं ॥ ॐ ३ क्रतो स्मर कृतं
स्मर क्रतो स्मर कृतं स्मर ॥ ३ ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयु
नानि विद्वान् ॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ॥ ४ ॥ १ ॥
॥ ॥ ब्राह्मणं ॥ ॥ १५ ॥ ॥ इति बृहदारण्यके पंचमोऽध्यायः ॥ ॥ ५ ॥ ॥ हरिः ॐ ॥ ॥

॥ रुद्रम ॥
॥ ६५ ॥

॥ यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्ये
ष्ठश्च श्रेष्ठश्च स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥१॥ यो ह वै वसिष्ठं वेद व
सिष्ठः स्वानां भवति वाग्वै वसिष्ठा वासिष्ठः स्वानां भवत्यपि च येषां बुभूषति य एवं वे
द ॥२॥ यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षु
षा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥३॥
यो ह वै संपदं वेद सं हास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपच्छ्रोत्रे हीमे सर्वे वे
दा अभिसंपन्नाः सं हास्मै पद्यते यं कामं कामयते य एवं वेद ॥४॥ यो ह वा आयत
नं वेदायतनं स्वानां भवत्यायतनं जनानां मनो वा आयतनमायतनं स्वानां भ
वत्यायतनं जनानां य एवं वेद ॥५॥ यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभिः

रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद॥ ६॥ ते हेमे प्राणा अहꣳश्रे
यसे विवदमाना ब्रह्म जग्मुस्तद्धोचुः को नो वसिष्ठ इति तद्धोवाच यस्मिन्व उत्क्रांत इ
दꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति॥ ७॥ वाग्घोच्चक्राम सा संवत्सरं प्रोष्या
गत्योवाच कथमशकत मदृते जीवितुमिति ते होचुर्यथा कला अवदंतो वाचा प्रा
णंतः प्राणेन पश्यंतश्चक्षुषा शृण्वंतः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रे
तसैवमजीविष्मेति प्रविवेश ह वाक्॥ ८॥ चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्यागत्यो
वाच कथमशकत मदृते जीवितुमिति ते होचुर्यथांधा अपश्यंतश्चक्षुषा प्राणं
तः प्राणेन वदंतो वाचा शृण्वंतः श्रोत्रेण विद्वाꣳसो मनसा प्रजायमाना रेतसैवमजी
विष्मेति प्रविवेश ह चक्षुः॥ ९॥ श्रोत्रꣳ होच्चक्राम तत्संवत्सरं प्रोष्यागत्योवाच क

थमशकतमदृतेजीवितुमितितेहोचुर्यथाबधिराअशृण्वंतःश्रोत्रेणप्राणंतःप्रा
णेनवदंतोवाचापश्यंतश्चक्षुषाविद्वाꣳसोमनसाप्रजायमानारेतसैवमजीवि
ष्मेतिप्रविवेशहश्रोत्रं॥१०॥मनोहोच्चक्रामतत्संवत्सरंप्रोष्यागत्योवाचकथम
शकतमदृतेजीवितुमितितेहोचुर्यथामुग्धाअविद्वाꣳसोमनसाप्राणंतःप्राणे
नवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणप्रजायमानारेतसैवमजीविष्मे
तिप्रविवेशहमनः॥११॥रेतोहोच्चक्रामतत्संवत्सरंप्रोष्यागत्योवाचकथमश
कतमदृतेजीवितुमितितेहोचुर्यथाक्लीबाअप्रजायमानारेतसाप्राणंतःप्राणे
नवदंतोवाचापश्यंतश्चक्षुषाशृण्वंतःश्रोत्रेणविद्वाꣳसोमनसैवमजीविष्मेति
प्रविवेशहरेतः॥१२॥अथहप्राणउत्क्रमिष्यन्यथामहासुहयःसैंधवःपड्वीश

शंकून्त्संवृहेदेवं हैवेमान्प्राणान्त्संबबर्ह ते हो चुर्मा भगव उत्क्रमीर्न वै शक्ष्याम
स्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥१३॥ सा ह वागुवाच यद्वा
अहं वासिष्ठास्मि त्वं तद्वसिष्ठोसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोसीति चक्षु
र्यद्वा अहं संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदाय
तनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे कि
मन्नं किं वास इति यदिदं किंचाश्वभ्य आ कृमिभ्य आ कीटपतंगेभ्यस्तत्तेन्नमापो
वास इति न ह वा अस्यानन्नं जग्धं भवति नानन्नं परिगृहीतं य एवमेतदनस्या
न्नं वेद तद्विद्वांसः श्रोत्रिया अशिष्यंत आचामंत्यशित्वाऽचामंत्येतमेव तदनम
नग्नं कुर्वंतो मन्यंते तस्मादेवंविदशिष्यन्नाचामेदशित्वाऽचामेदेतमेव तदन्नम

नग्नं कुरुते ॥१४॥ ॥ब्राह्मणं॥ ॥१॥ ॥श्वेतकेतुर्ह वा आरुणेयः पंचालानां परिषद
माजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमारा३
इति स भो३ इति प्रतिशुश्रावानुशिष्टोन्वसि पित्रेत्योमिति होवाच ॥१॥ वेत्थ यथेमाः
प्रजाः प्रयत्यो विप्रतिपद्यंता३ इति नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यंता३
इति नेति हैवोवाच वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्य
ता३ इति नेति हैवोवाच वेत्थो यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा
समुत्थाय वदंती३ इति नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृया
णस्य वा यत्कृत्वा देवयानं वा पंथानं प्रतिपद्यंते पितृयाणं वापि हि न ऋषेर्वचः
श्रुतं ॥ द्वे सृती अशृणवं पितृणामहं देवानामुत मर्त्यानां ॥ ताभ्यामिदं विश्वमेज

॥ छां० ॥

॥ ६८ ॥

॥ ग्रंथ ॥

स्समेति यदंतरा पितरं मातरं चेति ॥ नाहमत एकंचन वेदेति होवाच ॥ ३ ॥ अथैनं वस
त्योपमंत्रयांचक्रे ऽनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं तं होवाचेति
वाव किल नो भवान्पुराऽनुशिष्टानवोच इति कथं सुमेध इति पंच मा राजन्यबंधुः प्रश्नान
प्राक्षीत्ततो नैकंचन वेदेति कतमे त इतीह प्रतीकान्युदाजहार ॥ आस
होवाच तथा नस्त्वं तात जानीथा यथा यदहं किंच वेद सर्वमहं तत्तुभ्यमवोचं प्रे
हि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति भवानेव गच्छत्विति स आजगाम गौतमो य
त्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहृत्योदकमाहारयांचकाराथ हास्मा अ
र्घ्यं चकार तं होवाच वरं भगवते गौतमाय दद्म इति ॥ ४ ॥ स होवाच प्रतिज्ञातो म
एष वरो यां तु कुमारस्यांते वाचमभाषथास्तां मे ब्रूहीति ॥ ५ ॥ स होवाच दैवेषु वै गौ

॥ छां० ॥

॥ ६८ ॥

तम तद्दूरेषु मानुषाणां ब्रूहीति ॥६॥ स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गो
अश्वानां दासीनां प्रवाराणां परिधानस्य मा नो भवान्बहोरनन्तस्यापर्यन्तस्याभ्यव
दान्यो भूदिति स वै गौतम तीर्थेनेच्छासा इत्युपैम्यहं भवन्तमिति वाचा ह स्मैव पू
र्व उपयन्ति स होपायनकीर्त्या उवास ॥७॥ स होवाच तथा नस्त्वं गौतम मापराधा
स्तव च पितामहा यथेयं विद्येतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं
वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ॥८॥ असौ वै लोकोऽग्निर्गौत
म तस्यादित्य एव समिद्रश्मयो धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फु
लिङ्गास्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवति ॥
॥१॥ पर्जन्यो वाव अग्निर्गौतम तस्य संवत्सर एव समिदभ्राणि धूमो विद्युदर्चिर

शनिरंगारा ह्रादुनयो विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति ॥१०॥ अयं वै लोको ऽग्निर्गौतम तस्य पृथिव्येव समिदग्निर्धूमो रात्रिरर्चिश्चंद्रमा अंगारा नक्षत्राणि विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवति ॥११॥ पुरुषो वा अग्निर्गौतम तस्य व्यात्तमेव समित्प्राणो धूमो वागर्चिश्चक्षुरंगाराः श्रोत्रं विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति ॥१२॥ योषा वा अग्निर्गौतम तस्या उपस्थ एव समिल्लोमानि धूमो योनिरर्चिर्यदंतः करोति तेंगारा अभिनंदा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवत्यथ यदा म्रियते ॥१३॥ अथैनमग्न

येहरंलितस्याग्निरेवाग्निर्भवति समित्समिद्धूमो धूमोऽर्चिरर्चिरंगारा अंगारा
विस्फुलिंगा विस्फुलिंगास्तस्मिन्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै
पुरुषो भास्वरवर्णः संभवति ॥१४॥ ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां स
त्यमुपासते तेऽर्चिरभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणप
क्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्या
द्वैद्युतं तान्वैद्युतान्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति ते तेषु ब्रह्मलोकेषु
पराः परावतो वसंति तेषां न पुनरावृत्तिः ॥१५॥ अथ ये यज्ञेन दानेन तपसा लोका
ञ्जयंति ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीय
माणपक्षाद्यान्षण्मासान्दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकाच्चं

॥ ७० ॥

चंद्रं ते प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र भक्षयंति तेषां यदा तत्पर्यवैत्यथेममेवाकाशमभिनिष्पद्यंते आकाशाद्वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवंति त एवमेवानुपरिवर्त्तंतेऽथ य एतौ पंथानौ न विदुस्ते कीटाः पतंगा यदिदं दंदशूकं ॥ १६ ॥ ॥ ब्राह्मणं ॥ ॥ २ ॥ ॥ स यः कामयेत महत्प्राप्नुयामित्युदगयन आपूर्यमाणपक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वौदुंबरे कंसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमूह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्यावृताज्यं संस्कृत्य पुंसा नक्षत्रेण मंथं संनीय जुहोति यावंतो देवास्त्वयि जातवेदस्तिर्यंचो घ्नंति पुरुषस्य कामांस्तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामैस्तर्प

॥ बृह० ॥
॥ ७० ॥

यं तु स्वाहा ॥ यातिरश्वी निपद्यते हं विधरणी इति तां त्वा घृतस्य धारया यजे सं राध
नीम ह ऽ स्वाहा प्रजापते न त्वदेतान्यन्य इति त्वलीयां जुहोति ॥१॥ ज्येष्ठाय स्वाहा श्रे
ष्ठाय स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति प्राणाय स्वाहा वसिष्ठाये स्वाहेत्य
ग्नौ हुत्वा मंथे संस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मंथे सं
स्रवमवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति श्रो
त्राय स्वाहा ऽयतनाय स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति मनसे स्वाहा प्रजात्यै
स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवम
वनयति ॥२॥ अग्नये स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति सोमाय स्वाहे
त्यग्नौ हुत्वा मंथे संस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनय

॥ ७१ ॥

तिभुवः स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मंथे सं
स्रवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति ब्रह्म
णे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति क्षत्त्राय स्वाहेत्यग्नौ हुत्वा मंथे
संस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति भवि
ष्यते स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मं
थे संस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति पृ
थिव्यै स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयत्यंतरिक्षाय स्वाहेत्यग्नौ हुत्वा
मंथे संस्रवमवनयति दिवे स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति दि
ग्भ्यः स्वाहेत्यग्नौ हुत्वा मंथे संस्रवमवनयति तेजसे स्वाहेत्यग्नौ हुत्वा मं

॥ ७१ ॥

थे सꣳस्रवमवनयति श्रियै स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति लक्ष्म्यै
स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति सवित्रे स्वाहेत्यग्नौ हुत्वा मंथे सꣳ
स्रवमवनयति सरस्वत्यै स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति विश्वेभ्यो
देवेभ्यः स्वाहेत्यग्नौ हुत्वा मंथे सꣳस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हु
त्वा मंथे सꣳस्रवमवनयति ॥३॥ अथैनमभिमृशति भ्रमदसि ज्वलद
सि पूर्णमसि प्रस्तब्धमस्येकसभमसि हिंकृतमसि हिंक्रियमाणमस्युद्गी
थमस्युद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमस्यार्द्रे संदीप्तमसि विभूर
सि प्रभूरस्यन्नमसि ज्योतिरसि निधनमसि संवर्गोसीति ॥४॥ अथैनमुद्यच्छ
त्यामꣳस्यामꣳहि ते महि ॥ स हि राजेशानोऽधिपतिः स माꣳराजेशानोधिपतिं क

॥छरू॥

॥७२॥

रोऽस्मीति॥५॥अथैनमाचामति तत्सवितुर्वरेण्यं॥मधुवाताऋतायतेमधुक्षरं
तिसिंधवः॥माध्वीर्नःसंत्वोषधीः॥भूःस्वाहा॥भर्गोदेवस्यधीमहि॥मधुनक्त
मुतोषसोमधुमत्पार्थिवꣳरजः॥मधुद्यौरस्तुनःपिता॥भुवःस्वाहा॥धियोयो
नःप्रचोदयात्॥मधुमान्नोवनस्पतिर्मधुमाꣳअस्तुसूर्यः॥माध्वीर्गावोभवं
तुनः॥स्वःस्वाहेति॥सर्वांचसावित्रीमन्वाहसर्वाश्चमधुमतीःसर्वाश्चव्याहृ
तीरहमेवेदꣳसर्वंभूयासंभूर्भुवःस्वाहेत्यंततआचम्यपाणीप्रक्षाल्यजघने
नाग्निंप्राक्शिराःसंविशतिप्रातरादित्यमुपतिष्ठतेदिशामेकपुंडरीकमस्यहं
मनुष्याणामेकपुंडरीकंभूयासमितियथेतमेत्यजघनेनाग्निमासीनोवꣳ
शंजपति॥६॥तꣳहैतमुद्दालकआरुणिर्वाजसनेयाययाज्ञवल्क्यायांतेवा

स्वः ८

॥रण्यं॥

॥रुस्म॥

॥७२॥

393

सिन उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिंचेज्जायेरं छाखाः प्ररोहेयुः पला
शानीति॥७॥ एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैंग्यायांतेवासिने
उक्त्वोवाचापि य एनꣳ शुष्के स्थाणौ निषिंचेज्जायेरं छाखाः प्ररोहेयुः पलाशा
नीति॥८॥ एतमु हैव मधुकः पैंग्यश्चूलाय भागवित्तयेंतेवासिन उक्त्वोवाचापि
य एनꣳ शुष्के स्थाणौ निषिंचेज्जायेरं छाखाः प्ररोहेयुः पलाशानीति॥९॥ एत
मु हैव चूलो भागवित्तिर्जानकय आयस्थूणायांतेवासिन उक्त्वोवाचापि य एनꣳ
शुष्के स्थाणौ निषिंचेज्जायेरं छाखाः प्ररोहेयुः पलाशानीति॥१०॥ एतमु हैव
जानकिरायस्थूणः सत्यकामाय जाबालायांतेवासिन उक्त्वोवाचापि य एनꣳ शु

२ य

ष्के स्थाणौ निषिंचेज्जायेरं छाखाः प्ररोहेयुः पलाशानीति॥११॥ एतमु हैव स

॥ बृह॰ ॥

॥ ७३ ॥

॥ रामः ॥

सत्यकामो जाबालोंऽतेवासिभ्य उक्त्वोवाचापि य एनं शुष्के स्थाणौ निषिंचेज्जायेरं
छाखाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वाऽनंतेवासिने वा ब्रूयात् ॥ १२ ॥
चतुरौदुंबरो भवत्यौदुंबरः स्रुव औदुंबरश्चमस औदुंबर इध्म औदुंबर्या उ
पमंथन्यो दश ग्राम्याणि धान्यानि भवंति व्रीहियवास्तिलमाषा अणुप्रियंगवो
गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान्पिष्टान्दधनि मधुनि घृत
उपसिंचत्याज्यस्य जुहोति ॥ १३ ॥ ॥ ब्राह्मणं ॥ ॥ ३ ॥ ॥ एषां वै भूतानां पृथिवी
रसः पृथिव्या आपोऽपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फला
नां पुरुषः पुरुषस्य रेतः ॥ १ ॥ स ह प्रजापतिरीक्षांचक्रे हंतास्मै प्रतिष्ठां कल्पया
नीति स स्त्रियं ससृजे तां सृष्ट्वाऽध उपास्त तस्मात्स्त्रियमध उपासीत स्त्री वै

॥ बृहस्प ॥

॥ ७३ ॥

धासएतंप्रांचंग्रावाणमात्मनएवसमुदपारयत्तेनैनामभ्यसृजत्॥२॥तस्यावे
दिरुपस्थोलोमानिबर्हिश्चर्माधिषवणेसमिद्धोमध्यतस्तौमुष्कौसयावान्ह
वैवाजपेयेनयजमानस्यलोकोभवतितावानस्यलोकोभवतियएवंविद्वान
धोपहासंचरत्यासांस्त्रीणांसुकृतंवृंक्तेऽथयइदमविद्वानधोपहासंचर
त्यास्यस्त्रियःसुकृतंवृंजते॥३॥एतद्धस्मवैतद्विद्वानुद्दालकआरुणिराहैत
द्धस्मवैतद्विद्वान्नाकोमौद्गल्यआहैतद्धस्मवैतद्विद्वान्कुमारहारितआहब
हवोमर्याब्राह्मणायनानिरिंद्रियाविसुकृतोऽस्माल्लोकात्प्रयंतियइदमविद्वांसोऽधोपहासंचरंतीतिबहुवाइदंसुप्तस्यवाजाग्रतोवारेतःस्कंदति॥४॥त
दभिमृशेदनुवामंत्रयेतयन्मेऽद्यरेतःपृथिवीमस्कान्त्सीद्यदोषधीरप्यसरद्य

॥ ७४ ॥

दध्यः॥ इदमहं तद्रेत आददे पुनर्मामैत्विंद्रियं पुनस्तेजः पुनर्भगः॥ पुनरग्निर्धि
ष्ण्या यथास्थानं कल्पंतामित्यनामिकांगुष्ठाभ्यामादायांतरेण स्तनौ वा भ्रुवौ
वा निमृज्यात्॥ ५॥ अथ यद्युदक आत्मानं परिपश्येत्तदभिमंत्रयेत मयि तेज
इंद्रियं यशो द्रविणं सुकृतमिति श्रीर्ह वा एषा स्त्रीणां यन्मलोद्वासास्तस्मान्म
लोद्वाससं यशस्विनीमभिक्रम्योपमंत्रयेत॥ ६॥ सा चेदस्मै न दद्यात्काममे
नामवक्रीणीयात्सा चेदस्मै नैव दद्यात्काममेनां यष्ट्या वा पाणिना वोपहत्यातिक्रा
मेदिंद्रियेण ते यशसा यश आददइत्ययशा एव भवति॥ ७॥ सा चेदस्मै दद्या
दिंद्रियेण ते यशसा यश आदधामीति यशस्विनावेव भवतः॥ ८॥ स यामिच्छे
त्कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखं संधायोपस्थमस्या अभिमृ

॥ कृष्ण ॥
॥ ७४ ॥

स्य जपेदंगादंगात्संभवसि हृदयादधिजायसे॥ स त्वमंगकषायोसि दिग्धविद्धा
मिव मादयेमाममूं मयीति॥९॥ अथ यामिच्छेन्न गर्भं दधीतेति॥ तस्यामर्थं निष्ठा
य मुखेन मुखं संधायाभिप्राण्यापान्यादिंद्रियेण ते रेतसा रेत आदद इत्यरे
ता एव भवति॥१०॥ अथ यामिच्छेद्गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मु
खं संधायापान्याभिप्राण्यादिंद्रियेण ते रेतसा रेत आदधामीति गर्भिण्ये
व भवति॥११॥ अथ यस्य जायायै जारः स्यात्तं चेद्द्विष्यादामपात्रेऽग्निमुपसमा
धाय प्रतिलोमं शरबर्हिस्तीर्त्वा तस्मिन्नेतास्तिस्रः शरभृष्टीः प्रतिलोमाः सर्पि
षाक्ता जुहुयान्मम समिद्धे होषीः प्राणापानौ त आददेसाविति मम समिद्धेहौषीः
पुत्रपशूंस्त आददेसाविति मम समिद्धेहौषीरिष्टासुकृते त आददेसाविति म

॥बृह०॥ ॥रण्यं॥

॥७५॥

मसमिद्धे होषीरन्नापराकृन्नौतआददेसाविति सवाएषनिरिंद्रियोविसुकृ-
दस्माल्लोकात्प्रैतियमेवंविद्ब्राह्मणःशपतितस्मादेवंविच्छ्रोत्रियस्यदारेण
नोपहासमिच्छेदुतह्येवंवित्परोभवति॥१२॥अथयस्यजायामार्त्तवंविंदे
त्र्यहंकंसेनपिबेदहतवासानैनांवृषलोनवृषल्युपहन्यात्त्रिरात्रांतआ-
प्लुत्यव्रीहीनवघातयेत्॥१३॥सयइच्छेत्पुत्रोमेशुक्लोजायेतवेदमनुब्रुवी-
तसर्वमायुरियादितिक्षीरोदनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरौज-
नयितवै॥१४॥अथयइच्छेत्पुत्रोमेकपिलःपिंगलोजायेतद्वौवेदावनुब्रु-
वीतसर्वमायुरियादितिदध्योदनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरौ
जनयितवै॥१५॥अथयइच्छेत्पुत्रोमेश्यामोलोहिताक्षोजायेतत्रीन्वेदाननु

॥कृस्म॥

॥७५॥

श्रुवीतसर्वमायुरियादितिह स्थौदनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरौजन
यितवै॥१६॥अथयइच्छेद्दुहितामेपंडिताजायेतसर्वमायुरियादितितिलौ
दनंपाचयित्वासर्पिष्मंतमश्नीयातामीश्वरौजनयितवै॥१७॥अथयइच्छे
त्पुत्रोमेपंडितोविजिगीतःसमितिंगमःशुश्रूषितांवाचंभाषिताजायेतस
र्वान्वेदाननुब्रुवीतसर्वमायुरियादितिमांसौदनंपाचयित्वासर्पिष्मंतम
श्नीयातामीश्वरौजनयितवाऔक्ष्णेनवाआर्षभेणवा॥१८॥अथाभिप्रा
तरेवस्थालीपाकावृताज्यंचेष्टित्वास्थालीपाकस्योपघातंजुहोत्यग्नयेस्वा
हानुमतयेस्वाहादेवायसवित्रेसत्यप्रसवायस्वाहेतिहुत्वोद्धृत्यप्राश्ना
तिप्राश्येतरस्याःप्रयच्छतिप्रक्षाल्यपाणीउदपात्रंपूरयित्वातेनैनांत्रिर

॥रण्यं॥

॥बृह०॥

॥७६॥

म्युक्षत्स्फत्तिष्ठातोविश्वावसोऽन्यामिच्छप्रफर्व्यं संजायांपत्यासहेति॥१९॥
अथैनामभिपद्यतेऽमोहमस्मिसात्वंꣳसात्वमस्यमोअहंसामाऽहमस्मिऋ
क्त्वंद्यौरहंपृथिवीत्वं॥तावेहिसꣳरभावहैसहरेतोदधावहैपुंꣳसेपुत्राय
वित्तयइति॥२०॥अथास्याऊरूविहापयतिविजिहीथांद्यावापृथिवीइति
तस्यामर्थंनिष्ठायमुखेनमुखꣳसंधायत्रिरेनामनुलोमामनुमार्ष्टिविष्णु
र्योनिंकल्पयतुत्वष्टारूपाणिपिꣳशतु॥आसिंचतुप्रजापतिर्धातागर्भं
दधातुते॥गर्भंधेहिसिनीवालिगर्भंधेहिपृथुष्टुके॥गर्भंतेअश्विनौदे
वावाधत्तांपुष्करस्रजौ॥२१॥हिरण्मयीअरणीयाभ्यांनिर्मंथतामश्विनौ॥
तंतेगर्भꣳहवामहेदशमेमासिसूतये॥यथाग्निगर्भापृथिवीयथाद्यौ

॥बृह०॥

॥७६॥

401

रिं द्रेणगर्भिणी॥ वायुर्दिशां॥ यथा गर्भ एवं गर्भं दधामि तेऽसाविति नाम गृह्णाति॥
॥२२॥ सोष्यंतीमद्भिरभ्युक्षति॥ यथा वायुः पुष्करिणीं समिंजयति सर्वतः॥ ए
वा ते गर्भ एजतु सहावैतु जरायुणा॥ इंद्रस्यायं व्रजः कृतः सार्गलः सपरिश्र
यः॥ तमिंद्र निर्जहि गर्भेण सावरां सहेति॥ २३॥ जातेऽग्निमुपसमाधायांक
आधाय कंसे पृषदाज्यं सन्नीय पृषदाज्यस्योपघातं जुहोत्यस्मिं सहस्रं
पुष्यासमेधमानः स्वे गृहे॥ अस्योपसंद्यां मा छेत्सीत्प्रजया च पशुभिश्च स्वाहा॥
मयि प्राणांस्त्वयि मनसा जुहोमि स्वाहा॥ यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहा श्री ३
करं॥ अग्निष्टत्स्विष्टकृद्विद्वान्स्विष्टं सुहुतं करोतु नः स्वाहेति॥ २४॥ अथास्या
युष्यं करोति दक्षिणं कर्णमभिनिधाय वाग्वागिति त्रिरथ दधि मधु घृतं सन्नी

यानं तर्हि तेन जातरूपेण प्राशयति॥ भूस्त्वे दधामि भुवस्त्वे दधामि स्वस्त्वे दधामि
भूर्भुवः स्वः सर्वं त्वयि दधामीति॥२५॥ अथास्य नामधेयं करोति वेदोऽसीति तद
स्यैतद्गुह्यमेव नाम भवति॥२६॥ अथैनमभिमन्त्रयति॥ अश्मा भव परशुर्भव
हिरण्यमस्तृतं भव॥ आत्मा वै पुत्रनामासि स जीव शरदः शतमिति॥२७॥ अ
थैनं मात्रे प्रदाय स्तनं प्रयच्छति॥ यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा व
सुविद्यः सुदत्रः॥ येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः इति॥
॥२८॥ अथास्य मातरमभिमन्त्रयते॥ इलासि मैत्रावरुणी वीरे वीरमजीजनत्सा
त्वं वीरवती भव याऽस्मान्वीरवतोऽकरदिति तं वा एतमाहुरतिपिता बताभू
रतिपितामहो बताभूः परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन य एव

यं विदेधाब्राह्मणस्य पुत्रो जायत इति॥२९॥ ॥ब्राह्मणं॥ ॥४॥ ॥अथ वंशः॥ ॥
पौतिमाषीपुत्रः कात्यायनीपुत्रात्कात्यायनीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो भा
रद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्र औपस्वस्तीपुत्रा
दौपस्वस्तीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रः कात्यायनीपुत्रात्कात्यायनी
पुत्रः कौशिकीपुत्रात्कौशिकीपुत्र आलंबीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैय्या
घ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः॥१॥ आत्रेयीपुत्रादात्रेयी
पुत्रो गौतमीपुत्राद्गौतमीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पा
राशरीपुत्रो वात्सीपुत्राद्वात्सीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणी
पुत्राद्वार्कारुणीपुत्र आर्तभागीपुत्रादार्तभागीपुत्रः शौंगीपुत्राच्छौंगीपुत्रः

२ वार्कारुणीपुत्राद्

॥हरिः॥ ॥७८॥

सांकृतीपुत्रात्सांकृतीपुत्र आलंबायनीपुत्रादालंबायनीपुत्र आलंबीपुत्रादालंबीपुत्रो जायंतीपुत्राज्जायंतीपुत्रो मांडूकायनीपुत्रान्मांडूकायनीपुत्रो मांडूकीपुत्रान्मांडूकीपुत्रः शांडिलीपुत्राच्छांडिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः क्रौंचिकीपुत्राभ्यां क्रौंचिकीपुत्रौ वैदभ्नतीपुत्राद्वैदभ्नतीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात्प्राचीनयोगीपुत्रः सांजीवीपुत्रात्सांजीवीपुत्रः प्राश्नीपुत्रादासुरीवासिनः प्राश्नीपुत्र आसुरायणादासुरायण आसुरेरासुरिः ॥२॥ याज्ञवल्क्याद्याज्ञवल्क्य उद्दालकादुद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवा जिह्वावतो बाध्योगाज्जिह्वावान्बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरि

४ पुत्रःप्राश्नी

॥रण्वं॥ ॥हक्ष॥ ॥७८॥

उसमानसा

तात्कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः क
श्यपो नैध्रुविर्वाचो वागम्भिण्या अम्भिण्यादित्यादादित्यानीमानि शुक्लानि यजूं
षि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥३॥ सांजीवीपुत्रात्सांजीवीपुत्रो मा
ण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो माहित्थेर्माहित्थिर्वाम
कक्षायणाद्वामकक्षायणः शाण्डिल्याच्छाण्डिल्यो वात्स्याद्वात्स्यः कुश्रेः कुश्रिर्यज्ञ
वचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः
प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥४॥ ॥ब्राह्मणं॥ ॥५॥
इति बृहदारण्यके षष्ठोऽध्यायः ॥६॥ ॥किंज्योतिस्तव भानुमानहनि मे रात्रौ प्र
दीपादिकं किंज्योती रविदीपदर्शनविधौ किंज्योतिराख्याहि मे ॥ चक्षुस्तस्य निमील

॥ इति बृहदारण्यकसमाप्तिदलं ॥

॥ रण्य ॥

॥ कदम ॥

॥ ७९ ॥

नं १६

॥अथश्वेताश्वतरोपनिषत्प्रारंभ मङ्गलं॥

Acc. No. 4867.

श्वेताश्वततरोपनिषद्.

folio - 10.

॥श्वेता॰॥ ॥१॥

॥पनि॰॥

श्रीगणेशाय नमः॥ ॥ॐ नमः परमऋषिभ्यो नमो ब्रह्मविद्यासंप्रदायकर्तृभ्यः॥ ॥ब्रह्मवादिनो वदंति॥ किंकारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः॥ अधिष्ठिताः केन सुखेतरेषु वर्त्तामहे ब्रह्मविदो व्यवस्थामिति॥ १॥ कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिंत्यं॥ संयोग एषां न त्वात्मभावादात्माप्यनीशः सुखदुःखहेतोः॥ २॥ ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढां॥ यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः॥ ३॥ तमेकनेमिं त्रिवृतं षोडशांतं शतार्द्धारं विंशतिप्रत्यराभिः॥ अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहं॥ ४॥ पंचस्रोतोंबुं पंचयोन्युग्रवक्रां पंचप्राणोर्मिं पंचबुद्ध्यादिमूलं॥

॥राम॥ ॥१॥

पंचावर्त्तां पंचदुःखौघवेगां पंचाशद्भेदां पंचपर्वामधीमः ॥५॥ सर्वाजीवे स
र्वसंस्थे बृहंते तस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे ॥ पृथगात्मानं प्रेरितारं च मत्वा जु
ष्टस्ततस्तेनामृतत्वमेति ॥६॥ उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं स्वप्रतिष्ठा
क्षरं च ॥ अत्रांतरं वेदविदो विदित्वा लीना ब्रह्मणि तत्परा योनिमुक्ताः ॥७॥ सं
युक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः ॥ अनीशश्चात्मा बध्य
ते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥८॥ ज्ञाज्ञौ द्वावजावीशानीशावजा ह्ये
का भोक्तृभोगार्थयुक्ता ॥ अनंतश्चात्मा विश्वरूपो ह्यकर्त्ता त्रयं यदा विंदते ब्रह्ममे
तत् ॥९॥ क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ॥ तस्याभिध्या
नाद्योजनात्तत्त्वभावाद्भूयश्चांते विश्वमायानिवृत्तिः ॥१०॥ ज्ञात्वा देवं सर्वपाशा

॥श्वेता॥

॥२॥

पहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥ तस्याभिध्यानात्तृतीयं देहभेदे विश्वै-
श्वर्यं केवल आप्तकामः ॥११॥ एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदि-
तव्यं हि किंचित् ॥ भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥
१२॥ वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिंगनाशः ॥ स भूय एवें-
धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे ॥१३॥ स्वदेहमरणिं कृत्वा प्रण-
वं चोत्तरारणिं ॥ ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत् ॥१४॥ तिले-
षु तैलं दधिनीव सर्पिरापः स्रोतस्स्वरणिषु चाग्निः ॥ एवमात्मात्मनि गृह्यतेऽ-
सौ सत्येनैनं तपसा योऽनुपश्यति ॥१५॥ सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवा-
र्पितं ॥ आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परं ॥१६॥

॥पनि॥

॥राम॥

॥२॥

॥इति श्वेताश्वतरोपनिषदि प्रथमोध्यायः॥ ॥१॥ ॥युंजानः प्रथमं मनस्तत्वा
य सविता धियः॥ अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत्॥१॥ युक्तेन म
नसा वयं देवस्य सवितुः सवे॥ सुवर्गेयाय शक्त्या॥२॥ युक्त्वाय मनसा देवा
न्सुवर्यतो धिया दिवं॥ बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान्॥३॥
युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः॥ वि होत्रा दधे व
युनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः॥४॥ युंजे वां ब्रह्म पूर्व्यं नमोभि
र्विश्लोक एतु पथ्येव सूरेः॥ शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दि
व्यानि तस्थुः॥५॥ अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते॥ सोमो यत्राति
रिच्यते तत्र संजायते मनः॥६॥ सवित्रा प्रसवेन जुषेत ब्रह्म पूर्व्यं॥ तत्र यो

॥श्वेता॥

॥२॥

निं कृणवसे न हि ते पूर्तमक्षिपत्॥७॥ त्रिरुन्नतं स्थाप्य समं शरीरं हृदींद्रिया
णि मनसा सन्निवेश्य॥ ब्रह्मोडुपेन प्रतरेद्विद्वान्स्रोतांसि सर्वाणि भयावहानि॥
८॥ प्राणान्प्रपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत॥ दुष्टाश्वयुक्त
मिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः॥९॥ समे शुचौ शर्करावह्निवालुकावि
वर्जिते शब्दजलाश्रयादिभिः॥ मनोनुकूले न तु चक्षुपीडने गुहानिवाताश्रये
णे प्रयोजयेत्॥१०॥ नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशी
नां॥ एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे॥११॥ पृथ्व्याप्यते
जोनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते॥ न तस्य रोगो न जरा न मृत्युः प्रा
प्तस्य योगाग्निमयं शरीरं॥१२॥ लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौ

॥प.मि.॥

॥राम॥

॥३॥

414

ष्टं वंच॥ गंधः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदंति॥१३॥ यथैव बिंबं
मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधांतं॥ तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृ
तार्थो भवते वीतशोकः॥१४॥ यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रप
श्येत्॥ अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥१५॥ एषो ह देवः
प्रदिशोनु सर्वाः पूर्वो हि जातः स उ गर्भे अंतः॥ स एव जातः स जनिष्यमाणः प्रत्य
ङ् जनास्तिष्ठति सर्वतोमुखः॥१६॥ यो देवोग्नौ यो प्सु विश्वं भुवनमाविवेश॥ य
ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः॥१७॥ ॥इति श्वेताश्वतरो
पनिषदि द्वितीयोध्यायः॥ ॥२॥ ॥य एको जालवानीशत ईशानीभिः सर्वां
ल्लोकानीशत ईशानीभिः॥ य एवैक उद्भवे संभवे च य एतद्विदुरमृतास्ते भवंति॥१॥

एकोहिरुद्रोनद्वितीयायतस्थुर्यइमांल्लोकानीशतईशनीभिः॥प्रत्यङ्जनास्ति
ष्ठतिसंचुकोचांतकालेसंसृज्यविश्वाभुवनानिगोपाः॥२॥विश्वतश्चक्षुरुतवि
श्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥संबाहुभ्यांधमतिसंपतत्रैर्द्यावा
भूमीजनयन्देवएकः॥३॥योदेवानांप्रभवश्चोद्भवश्चविश्वाधिकोरुद्रोमहर्षिः॥
हिरण्यगर्भंजनयामासपूर्वंसनोबुद्ध्याशुभयासंयुनक्तु॥४॥यातेरुद्रशि
वातनूरघोरापापकाशिनी॥तयानस्तनुवाशंतमयागिरिशंताभिचाकशीहि॥
५॥यामिषुंगिरिशंतहस्तेबिभर्ष्यस्तवे॥शिवांगिरित्रतांकुरुमाहिंसीःपुरुषं
जगत्॥६॥ततःपरंब्रह्मपरंबृहंतंयथानिकायंसर्वभूतेषुगूढं॥विश्वस्यै
कंपरिवेष्टितारमीशंतंज्ञात्वाऽमृताभवंति॥७॥वेदाहमेतंपुरुषंमहांतमा

दित्यवर्णं तमसः परस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयना
य ॥८॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित् ॥ वृक्ष
इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं ॥९॥ ततो यदुत्तरतरं तदरू
पमनामयं ॥ य एतद्विदुरमृतास्ते भवंत्यथेतरे दुःखमेवापियंति ॥१०॥ सर्वानन
शिरोग्रीवः सर्वभूतगुहाशयः ॥ सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः ॥११॥
महान्प्रभुर्वै पुरुषः सत्वस्यैष प्रवर्त्तकः ॥ सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिर
व्ययः ॥१२॥ अंगुष्ठमात्रः पुरुषोंतरात्मा सदा जनानां हृदये सन्निविष्टः ॥ हृदा म
नीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति ॥१३॥ सहस्रशीर्षा पुरुषः स
हस्राक्षः सहस्रपात् ॥ स भूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशांगुलं ॥१४॥ पुरुष एवे

॥श्वेता॥ ॥५॥

॥धनि॥

दं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति॥१५॥ सर्वतः
पाणिपादं तत्सर्वतोक्षिशिरोमुखं॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥१६॥
सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं॥ सर्वस्य प्रभुमीशानं सर्वस्य शरणं सु
हृत॥१७॥ नवद्वारे पुरे देही हंसो लेलायते बहिः॥ वशी सर्वस्य लोकस्य स्थाव
रस्य चरस्य च॥१८॥ अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्य
कर्णः॥ स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महांतं॥१९॥ अणोरणी
यान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः॥ तमक्रतुं पश्यति वीतशोको
धातुः प्रसादान्महिमानमीशं॥२०॥ वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वग
तं विभुत्वात॥ जन्मनिरोधं प्रवदंति यस्य ब्रह्मवादिनो हि प्रवदंति नित्यं॥२१॥ ॥

॥राम॥ ॥५॥

इति श्वेताश्वतरोपनिषदि तृतीयोध्यायः॥ ॥श्री॥ ॥य एकोऽवर्णो बहुधा
शक्तियोगाद्वर्णाननेकान्निहितार्थो दधाति॥ विचैति चांते विश्वमादौ स देवः
स नो बुद्ध्या शुभया संयुनक्तु॥१॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चंद्रमाः॥
तदेव शुक्रं तद्ब्रह्म तदापस्तत्प्रजापतिः॥२॥ त्वं स्त्री पुमानसि त्वं कुमार उत वा
कुमारी॥ त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः॥३॥ नीलः पतंगो
हरितो लोहिताक्षस्तडिद्गर्भ ऋतवः समुद्राः॥ अनादिमत्त्वं विभुत्वेन वर्त्तसे यतो
जातानि भुवनानि विश्वा॥४॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमा
नां स्वरूपाः॥ अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः॥५॥ द्वा
सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्य

त्वे ४

नश्नन्नन्यो अभिचाकशीति ॥ ६ ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शो
चति मुह्यमानः ॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमेति वीतशोकः ॥ ७ ॥
ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ॥ यस्तन्न वेद किं
मृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ८ ॥ छंदांसि यज्ञाः क्रतवो व्र
तानि भूतं भव्यं यच्च वेदा वदंति ॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चा
न्यो मायया सन्निरुद्धः ॥ ९ ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ तस्याऽ
वयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ १० ॥ यो योनिं योनिमधितिष्ठत्येको
यस्मिन्निदं सं च वि चैति सर्वं ॥ तमीशानं वरदं देवमीड्यं निचाय्येमां शांति
मत्यंतमेति ॥ ११ ॥ यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ॥ हिर

ण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ॥१२॥ यो देवानामधिपो य
स्मिंल्लोका अधिश्रिताः ॥ य ईशेऽस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥
॥१३॥ सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं ॥ विश्वस्यैकं
परिवेष्टितारं ज्ञात्वा शिवं शांतिमत्यंतमेति ॥१४॥ स एव काले भुवनस्य गोप्ता वि
श्वाधिपः सर्वभूतेषु गूढः ॥ यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृ
त्युपाशांश्छिनत्ति ॥१५॥ घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गू
ढं ॥ विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥१६॥ एष देवो विश्व
कर्मा महात्मा सदा जनानां हृदये सन्निविष्टः ॥ हृदा मनीषा मनसाभिक्लृप्तो य एतद्वि
दुरमृतास्ते भवंति ॥१७॥ यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केव

॥श्वे.ता.॥

॥७॥

॥श्रनि.॥

लः॥ तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी॥१८॥ नैनमूर्ध्वं न ति
र्यंचं न मध्ये परिजग्रभत्॥ न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः॥१९॥ न संदृशे
तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं॥ हृदा हृदिस्थं मनसा य एनमे
वं विदुरमृतास्ते भवंति॥२०॥ अजात इत्येवं कश्चिद्भीरुः प्रपद्ये॥ रुद्र यत्ते दक्षि
णं मुखं तेन मां पाहि नित्यं॥२१॥ मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो
अश्वेषु रीरिषः॥ वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः सदमित्त्वा हवामहे॥२२॥
इति श्वेताश्वतरोपनिषदि चतुर्थोऽध्यायः॥ ॥४॥ ॥ द्वे अक्षरे ब्रह्मपरे त्वनंते
विद्याविद्ये निहिते यत्र गूढे॥ क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्
तु सोऽन्यः॥१॥ यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः॥

॥राम॥

॥७॥

ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत्॥२॥एकैकं जा
लं बहुधा विकुर्वन्नस्मिन्क्षेत्रे संहरत्येष देवः॥भूयः सृष्ट्वा पतयस्तथेशः सर्वा
धिपत्यं कुरुते महात्मा॥३॥सर्वा दिश ऊर्ध्वमधश्च तिर्यक्प्रकाशयन्भ्राजते
यद्वनड्वान्॥एवं स देवो भगवान्वरेण्यो योनिःस्वभावानधितिष्ठत्येकः॥४॥य
च्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान्परिणामयेद्यः॥सर्वमेतद्विश्वम
धितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः॥५॥तद्वेदगुह्योपनिषत्सु गूढं
तद्ब्रह्मा वेदते ब्रह्मयोनिं॥ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अमृता वै ब
भूवुः॥६॥गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता॥स विश्व
रूपस्त्रिगुणास्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः॥७॥अंगुष्ठमात्रो र

॥श्वेता०॥

॥८॥

वितुल्यरूपः संकल्पाहंकारसमन्वितो यः॥ बुद्धेर्गुणेनात्मगुणेन चैव आ-
राग्रमात्रो ह्यवरोपि दृष्टः॥८॥ वालाग्रशतभागस्य शतधा कल्पितस्य च॥ भा-
गो जीवः स विज्ञेयः स चानंत्याय कल्पते॥९॥ नैव स्त्री न पुमानेष न चैवायं न-
पुंसकः॥ यद्यच्छरीरमादत्ते तेन तेन स युज्यते॥१०॥ संकल्पनस्पर्शनदृष्टिहो-
मैर्ग्रासांबुवृष्ट्या चात्मविवृद्धिजन्मा॥ कर्मानुगान्यनुक्रमेण देही स्थानेषु रू-
पाण्यभिसंप्रपद्यते॥११॥ स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणै-
र्वृणोति॥ क्रियागुणैरात्मगुणैश्च तेषां संयोगहेतुरपरोपि दृष्टः॥१२॥ अनाद्य-
नंतं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं॥ विश्वस्यैकं परिवेष्टितारं ज्ञा-
त्वा देवं मुच्यते सर्वपाशैः॥१३॥ भावग्राह्यमनीडाख्यं भावाभावकरं शिवं॥ कला-

॥पवि०॥

॥रामः॥

॥८॥

सर्गकरं देवं ये विदुस्तेजहुस्तनुं॥१४॥ ॥इति श्वेताश्वतरोपनिषदि पंचमोध्यायः॥
॥५॥ ॥स्वभावमेके कवयो वदंति कालं तथान्ये परिमुह्यमानाः॥ देवस्यैष महिमा
तु लोके येनेदं भ्राम्यते ब्रह्मचक्रं॥१॥ येनावृतं नित्यमिदं हि सर्वं ज्ञः कालकालो गु
णी सर्वविद्यः॥ तेनेशितं कर्म विवर्त्तते ह पृथिव्यप्तेजोनिलखानि चिंत्यं॥२॥ त
त्कर्म कृत्वा विनिवर्त्य भूयस्तत्त्वस्य तत्त्वेन समेत्य योगं॥ एकेन द्वाभ्यां त्रिभिरष्टभि
र्वा कालेन चैवात्मगुणैश्च सूक्ष्मैः॥३॥ आरभ्य कर्माणि गुणान्वितानि भावांश्च स
र्वान्विनियोजयेद्यः॥ तेषामभावे कृतकर्मनाशः कर्मक्षये याति स तत्त्वतोन्यः॥४॥
आदिः स संयोगनिमित्तहेतुः परस्त्रिकालादकलोपि दृष्टः॥ तं विश्वरूपं भवभू
तमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वं॥५॥ स वृक्षकालाकृतिभिः परोन्यो यस्मा

॥श्वेता॥ ॥४॥

लपंचः परिवर्त्ततेयं॥धर्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम॥६॥
तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं। पतिं पतीनां परमं परस्ताद्वि
दाम देवं भुवनेशमीड्यं॥७॥ न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च
दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च॥८॥ न तस्य क
श्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिंगं। स कारणं करणाधिपाधिपो न
चास्य कश्चिज्जनिता न चाधिपः॥९॥ यस्तंतुनाभ इव तंतुभिः प्रधानजैः स्वभावतो दे
व एकः। समावृणोति स नो दधातु ब्रह्माप्ययं॥१०॥ एको देवः सर्वभूतेषु गूढः सर्वव्या
पी सर्वभूतांतरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥
११॥ एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोति। तमात्मस्थं ये नुप

॥प नि॥ ॥राम॥ ॥१॥

श्यंति धीरास्तेषां सुखं शाश्वतं नेतरेषां ॥१२॥ नित्यो नित्यानां चेतनश्चेतनानामेको ब
हूनां यो विदधाति कामान् ॥ तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥
१३॥ न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः॥ तमेव भांतम
नु भाति सर्वं तस्य भासा सर्वमिदं विभाति ॥१४॥ एको हंसो भुवनस्यास्य मध्ये स एवाग्निः
सलिले सन्निविष्टः॥ तमेव विदित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनाय ॥१५॥ स
विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः॥ प्रधानक्षेत्रज्ञपतिर्गुणे
शः संसारबंधस्थितिमोक्षहेतुः॥१६॥ स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भुवन
स्यास्य गोप्ता॥ य ईशेस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय ॥१७॥ यो ब्रह्माणं
विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ॥ तंह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै श

स्या० ४

॥श्वेतम॥

॥६०॥

रणमहं प्रपद्ये ॥१८॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं ॥ अमृतस्य परं से
तुं दग्धेंधनमिवानलं ॥१९॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः ॥ तदा देव
मविज्ञाय दुःखस्यांतो भविष्यति ॥२०॥ तपःप्रभावाद्देवप्रसादाच्च ब्रह्म ह श्वेता
श्वतरोऽथ विद्वान् ॥ अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजु
ष्टं ॥२१॥ वेदांते परमं गुह्यं पुराकल्पे प्रचोदितं ॥ नाप्रशांताय दातव्यं नापुत्राय
नाशिष्याय वै पुनः ॥२२॥ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ॥ तस्यैते कथिता
ह्यर्थाः प्रकाशंते महात्मनः प्रकाशंते महात्मन इति ॥२३॥ ॥इति श्रीमच्छ्वेता
श्वतरोपनिषदि षष्ठोऽध्यायः ॥ ॥६॥ ॥समाप्तेयमुपनिषत् ॥ ॥सहनाव
वतु ॥ सह नौ भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधीतमस्तु ॥ मा विद्विषावहै

॥पनि॥

॥राम॥

॥६०॥

१३१

नंबर १६

॥अथबृहन्नारायणीयोपनिषदारंभः॥

Acc. No. 4868.
बृहन्नारायणीयोपनिषत्.
folio - 25.

॥नारा॥
॥१॥

श्रीगणेशायनमः॥ ॥हरिःॐ॥ ॥सहनाववतु॥सहनौभुनक्तु॥सहवीर्यं
करवावहै॥तेजस्विनावधीतमस्तुमाविद्विषावहै॥ ॥ॐशांतिःशांतिःशां
तिः॥ ॥ॐ॥अंभस्यपारेभुवनस्यमध्येनाकस्यपृष्ठेमहतोमहीयान्॥शुक्रे
णज्योतींषिसमनुप्रविष्टःप्रजापतिश्चरतिगर्भेअंतः॥यस्मिन्निदंसंच
विचैतिसर्वंयस्मिन्देवाअधिविश्वेनिषेदुः॥तदेवभूतंतदुभव्यमाइदं
तदक्षरे परमेव्योमन्॥येनावृतंखंचदिवंमहींचयेनादित्यस्तपतिते
जसाभ्राजसाच॥यमंतःसमुद्रेकवयोवयंतितदक्षरेपरमेप्रजाः॥यतः
प्रसूताजगतःप्रसूतीतोयेनजीवान्व्यससर्जभूम्यां॥यदोषधीभिःपुरुषान्प
शूंश्चविवेशभूतानिचराचराणि॥अतःपरंनान्यदणीयसंहिपरात्प

वा२

॥पनि॥
॥राम॥
॥१॥

रं यन्महतो महांतं॥ यदेकमव्यक्तमनंतरूपं विश्वं पुराणं तमसः परस्तात्॥ त
देवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनां॥ इष्टापूर्तं बहुधा जातं जाय
मानं विश्वं बिभर्ति भुवनस्य नाभिः॥ तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः॥
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः॥ सर्वे निमेषा जज्ञिरे विद्युतः
पुरुषादधि॥ कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः॥ अर्धमासा मासा ऋ
तवः संवत्सरश्च कल्पंतां॥ स आपः प्रदुघे उभे इमे अंतरिक्षमथो सुवः॥ नेन
मूर्ध्वं न तिर्यंचं न मध्ये परिजग्रभत्॥ न तस्येशे कश्चन तस्य नाम महद्यशः॥
न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं॥ हृदा मनीषा मनसा
भिक्लृप्तो य एनं विदुरमृतास्ते भवंति॥ अद्भ्यः संभूतो हिरण्यगर्भ इत्यष्टौ॥ ए

॥प नि॥

॥नारा॥
॥२॥

षहिदेवः प्रदिशोनु सर्वाः पूर्वोहि जातः स उ गर्भे अंतः॥ स विजायमानः स जनि
ष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥ विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोहस्त उत विश्वतस्पात्॥ संबाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जन
यन्देव एकः॥ वेनस्तत्पश्यन्विश्वा भुवनानि विद्वान्यत्र विश्वं भवत्येकनीलं॥
यस्मिन्निदꣳ संच विचैकꣳ स ओतः प्रोतश्च विभुः प्रजासु॥ प्रतद्वोचेदमृतं
नु विद्वान्गंधर्वो नाम निहितं गुहासु॥ त्रीणि पदानि निहिता गुहासु यस्तद्वेद स पि
तुः पिता सत्॥ स नो बंधुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा॥ यत्र
देवा अमृतमानशानास्तृतीये धामान्यध्यैरयंत॥ परि द्यावापृथिवी यंति स
द्यः परि लोकान्परि दिशः परि सुवः॥ ऋतस्य तंतुं विततं विचृत्य तदपश्यत्तद

॥राम॥
॥२॥

भवत्प्रजासु॥ परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च॥ प्रजा
पतिः प्रथमजा ऋतस्यात्मनात्मानमभिसंबभूव॥ सदसस्पतिमद्भुतं प्रियमिंद्र
स्य काम्यं॥ सनिं मेधामयासिषं॥ उद्दीप्यस्व जातवेदो पघ्नन्निर्ऋतिं मम॥ पशूं
श्च मह्यमावह जीवनं च दिशो दिश॥ मा नो हिंसीज्जातवेदो गामश्वं पुरुषं जगत्॥
अबिभ्रदग्न आगहि श्रिया मा परिपालय॥ पुरुषस्य विद्म सहस्राक्षस्य महादेव
स्य धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ त
न्नो रुद्रः प्रचोदयात्॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि॥ तन्नो दंतिः प्रचो
दयात्॥ तत्पुरुषाय विद्महे चक्रतुंडाय धीमहि॥ तन्नो नंदिः प्रचोदयात्॥ तत्पु
रुषाय विद्महे महासेनाय धीमहि॥ तन्नः षण्मुखः प्रचोदयात्॥ तत्पुरुषाय वि

॥नारा०॥

॥३॥

म्हे सुपर्णपक्षाय धीमहि॥ तन्नो गरुडः प्रचोदयात्॥ वेदात्मनाय विद्महे हि

रण्यगर्भाय धीमहि॥ तन्नो ब्रह्मः प्रचोदयात्॥ नारायणाय विद्महे वासुदेवा

य धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धी

महि॥ तन्नो नारसिंहः प्रचोदयात्॥ भास्कराय विद्महे महद्युतिकराय धीम

हि॥ तन्नो आदित्यः प्रचोदयात्॥ वैश्वानराय विद्महे लालीलाय धीमहि॥ त

न्नो अग्निः प्रचोदयात्॥ कात्यायनाय विद्महे कन्यकुमारि धीमहि॥ तन्नो दु

र्गिः प्रचोदयात्॥ सहस्रपरमा देवी शतमूला शतांकुरा॥ सर्वं हरतु मे पापं दू

र्वा दुःस्वप्ननाशिनी॥ कांडात्कांडात्प्ररोहंती परुषः परुषः परि॥ एवा नो दूर्वे प्र

तनु सहस्रेण शतेन च॥ या शतेन प्रतनोषि सहस्रेण विरोहसि॥ तस्यास्ते दे

॥पंनि०॥

॥राम॥

॥३॥

वीष्टकेविधेमहविषावयं॥अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरा॥शिरसा
धारयिष्यामिरक्षस्वमांपदेपदे॥भूमिर्धेनुर्धरणीलोकधारिणी॥उद्धृतासि
वराहेण कृष्णेनशतबाहुना॥मृत्तिकेहनमेपापंयन्मयादुष्कृतंकृतं॥मृत्ति
केब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठि
तं॥मृत्तिकेप्रतिष्ठितेसर्वंतन्मेनिर्णुदमृत्तिके॥त्वयाहतेनपापेनगच्छामिपरमां
गतिं॥यतइंद्रभयामहेततोनोअभयंकृधि॥मघवंछग्धितवतन्नऊतयेवि
द्विषोविमृधोजहि॥स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी॥वृषेंद्रःपुरएतु
नःस्वस्तिदाअभयंकरः॥स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः॥स्व
स्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातु॥आपांतमन्युस्तृपल

॥नारा॰॥
॥४॥

॥प त्रि॰॥

प्रश्नमा धुनिः शर्मा मीवां छहमा ऽ रुजीबी॥ सोमो विश्वान्यतसा वनानि नार्वागिंद्रं
प्रतिमानानि देभुः॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः॥ स बु
ध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ स्योना पृथिवि भवान्दक्ष
रा निवेशनी॥ यच्छानः शर्म सप्रथाः॥ गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥
ईश्वरीं ऽ सर्वभूतानां तामिहोपह्वये श्रियं॥ श्रीर्मे भजतु॥ अलक्ष्मीर्मे नश्यतु॥
विष्णुमुखा वै देवाश्छंदोभिरिमांल्लोकाननपजय्यमभ्यजयन्॥ महाँ ऽ इंद्रो
वज्रबाहुः षोडशी शर्म यच्छतु॥ स्वस्ति नो मघवा करोतु हंतु पाप्मानं योस्मान्द्वेष्टि॥
सोमानं ऽ स्वरणं कृणुहि ब्रह्मणस्पते॥ कक्षीवंतं य औशिजं॥ शरीरं यज्ञशम
लं कुशीदं तस्मिंन्सीदतु योस्मान्द्वेष्टि॥ चरणं पवित्रं विततं पुराणं येन पूतस्त

॥राम॥
॥४॥

रतिदुष्कृतानि॥ तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम॥ सजो
षा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहं छूर विद्वान्॥ जहि शत्रूँ२ रप मृधो
नुदस्वाथाभयं कृणुहि विश्वतो नः॥ सुमित्रा न आप ओषधयः संतु दुर्मित्रास्त
स्मै भूयासुर्यो स्मान्द्वेष्टि यं च वयं द्विष्मः॥ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधा
तन॥ महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः॥ उशती
रिव मातरः॥ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ॥ आपो जनयथा च
नः॥ हिरण्यशृंगं वरुणं प्रपद्ये तीर्थं मे देहि याचितः॥ यन्मया भुक्तमसाधूनां
पापेभ्यश्च प्रतिग्रहः॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं॥ तन्म इंद्रो व
रुणो बृहस्पतिः सविता च पुनंतु पुनः पुनः॥ नमोग्नये प्सुमते नम इंद्राय नमो

॥नारा॥

॥५॥

॥पनि॥

वरुणाय नमो वारुण्यै नमोऽद्भ्यः॥ यदपां क्रूरं यदमेध्यं यदशांतं तदपगच्छ
तात्॥ अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात्॥ तन्नो वरुणो राजापा
णिनाह्यवमर्शतु॥ सोहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः॥ नाकस्यपृ
ष्ठमारुह्य गच्छेद्ब्रह्मसलोकतां॥ यश्चाप्सु वरुणः स पुनात्वघमर्षणः॥ इ
मं मे गंगे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या॥ असिक्नि
या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया॥ ऋतं च सत्यं चाभीद्धा
त्तपसोध्यजायत॥ ततो रात्रिरजायत ततः समुद्रो अर्णवः॥ समुद्रादर्णवा
दधि संवत्सरो अजायत॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥
सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्॥ दिवं च पृथिवीं चांतरिक्षमथो

॥राम॥

॥५॥

२ पुनंतुऋषयः

सुवः॥यत्पृथिव्याꣳरजः स्वमांतरिक्षे विरोदसी॥इमाꣳस्तदापो वरुणः पुना
त्वघमर्षणः॥पुनंतु वसवः पुनातु वरुणः पुनात्वघमर्षणः॥एषभूतस्यम
ध्ये भुवनस्य गोप्ता॥एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयं॥द्यावापृथि
व्योर्हिरण्मयꣳसꣳश्रितꣳ सुवः॥स नः सुवः सꣳशिशाधि॥आर्द्रं ज्वलति
ज्योतिरहमस्मि॥ज्योतिर्ज्वलति ब्रह्माहमस्मि॥योहमस्मि ब्रह्माहमस्मि॥अ
हमस्मि ब्रह्माहमस्मि॥अहमेवाहं मां जुहोमि स्वाहा॥अकार्यकार्यवकीर्णी
स्तेनो भ्रूणहा गुरुतल्पगः॥वरुणोपामघमर्षणस्तस्मात्पापात्प्रमुच्यते॥
रजोभूमिस्त्वमाꣳरोदयस्व प्रवदंति धीराः॥आक्रान्त्समुद्रः प्रथमे विधर्मं
जनयन्प्रजा भुवनस्य राजा॥वृषापवित्रे अधिसानो अव्ये बृहत्सोमो वावृ

॥नारा॰॥

॥ ६ ॥

५॥ममंवचमसुवेनावभावैकात्मायुनाय॥

धेसुवानइंदुः॥१॥परस्ताद्यन्नोगुहासुममंचक्र तुंडाय धीमहि तीक्ष्णदंष्ट्रा

यधीमहि परिप्रतिष्ठितं दे षुर्य छ तु र धात नाऋषो अर्णवः सुवीराजे

कंच॥२॥रुद्रोरुद्रश्चदंतिश्चनंदिः षण्मुख एव च॥गरुडो ब्रह्मविष्णुश्च

नारसिंहस्तथैव च॥आदित्योग्निश्च दुर्गिश्च क्रमेण द्वादशांभासि॥

॥८॥जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः॥स नः पर्षदति

दुर्गाणि विश्वा नावेव सिंधुं दुरितात्यग्निः॥तामग्निवर्णां तपसा ज्वलंतीं वै

रोचनीं कर्मफलेषु जुष्टां॥दुर्गां देवीं शरणमहं प्रपद्ये सुतरसि तरसे न

मः॥अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥पूश्च पृथ्वी

बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥विश्वानि नो दुर्गहा जातवेदः

॥पानि॰॥

॥राम॥

॥ ६ ॥

440.

सिंधुंननावादुरितातिपर्षि॥अग्नेअत्रिवन्नमसागृणानोस्माकंबोध्यविता
तनूनां॥पृतनाजितंसहमानमुग्रमग्निंहुवेमपरमात्सधस्थात्॥सनः
पर्षदतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः॥प्रत्नोषिकमीड्योअ
ध्वरेषुसनाच्चहोतानव्यश्चसत्सि॥स्वांचाग्नेतनुवंपिप्रयस्वास्मभ्यंच
सौभगमायजस्व॥गोभिर्जुष्टमयुजोनिषिक्तंतवेंद्रविष्णोरनुसंचरेम॥ना
कस्यपृष्ठमभिसंवसानोवैष्णवींलोकइहमादयंतां॥२॥जातवेदसेचतुर्द
श॥२॥भूरन्नमग्नयेपृथिव्यैस्वाहाभुवोन्नंवायवेंतरिक्षायस्वाहासुवरन्न
मादित्यायदिवेस्वाहाभूर्भुवःसुवरन्नंचंद्रमसेदिग्भ्यःस्वाहानमोदेवेभ्यःस्व
धापितृभ्योभूर्भुवःसुवरन्नमों॥३॥भूरग्नयेपृथिव्यैस्वाहाभुवोवायवेंत

॥नारा॰॥

॥७॥

२ गन ॐ॥

रिक्षाय स्वाहा सुवरादित्याय दिवे स्वाहा भूर्भुवः सुवश्चंद्रमसे दिग्भ्यः स्वाहा न
मो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरों ॥४॥ भूरग्नये च पृथिव्ये च महते च
स्वाहा भुवो वायवे चांतरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च मह
ते च स्वाहा भूर्भुवः सुवश्चंद्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा
नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवर्महरों ॥५॥ पाहि नो अग्न एनसे स्वा
हा ॥ पाहि नो विश्ववेदसे स्वाहा ॥ यज्ञं पाहि विभावसो स्वाहा ॥ सर्वं पाहि शत
क्रतो स्वाहा ॥६॥ पाहि नो अग्न एकया ॥ पाह्युत द्वितीयया ॥ पाह्यूर्जं तृतीय
या ॥ पाहि गीर्भिश्चतसृभिर्वसो स्वाहा ॥७॥ यश्छंदसामृषभो विश्वरूपश्छंदो
भ्यश्छंदांस्याविवेश ॥ सचाः शिक्यः पुरोवाचोपनिषदिंद्रो ज्येष्ठ इंद्रियाय ऋ

॥पनि॰॥

॥राम॥

॥७॥

छंदः ॐ॥

षिभ्यो नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवः ॥८॥ नमो ब्रह्मणे धारणं मे अ
स्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ॐ ॥९॥
ऋतं तपः सत्यं तपः श्रुतं तपः शांतं तपो दमस्तपः शमस्तपो दानं तपो यज्ञस्त
पो भूर्भुवः सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥१०॥ यथा वृक्षस्य संपुष्पितस्य दूराद्गंधो
वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वाति यथासिधारां कर्ते वहितामवक्रामे यद्यु
वे युवे हवा विहवा विक्रयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् ॥११॥
यु४ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जंतोः ॥ तमक्रतुं पश्य
तिवीतशोको धातुः प्रसादान्महिमानमीशं ॥ सप्त प्राणाः प्रभवंति तस्मात्सप्ता
र्चिषः समिधः सप्त जिह्वाः ॥ सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहि

ताः सप्त सप्त ॥ अतः समुद्रा गिरयश्च सर्वेस्मात्स्यंदंते सिंधवः सर्वरूपाः ॥ अतश्च विश्वा ओषधयो रसाश्च येनैष भूतस्तिष्ठत्यंतरात्मा ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणां ॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं सरूपां ॥ अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्यः ॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम ॥ अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यं ॥ समुद्रादूर्मिर्मधुमां उदारदुपांशुना सममृतत्वमानट् ॥ घृतस्य नाम गुह्यं यदस्ति

जिह्वा देवानाममृतस्य नाभिः॥ वयं नाम प्रब्रवामा घृतेनास्मिन्यज्ञे धारयामान
मोभिः॥ उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत्॥ चत्वारि शृङ्गा
त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो
देवो मर्त्याꣳ आ विवेश॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्ववि
न्दन्॥ इन्द्र एकꣳ सूर्य एकं जजान वेनादेकꣳ स्वधया निष्टतक्षुः॥ यो देवानां प्रथ
मं पुरस्ताद्विश्वाधिको रुद्रो महर्षिः॥ हिरण्यगर्भं पश्यत जायमानꣳ स नो देवः
शुभया स्मृत्या संयुनक्तु॥ यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्या
योऽस्ति कश्चित्॥ वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वं॥
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः॥ परेण नाकं निहितं

॥नारा॥ ॥९॥

गुहायां विभ्राजते यद्यतयो विशन्ति ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयो
गाद्यतयः शुद्धसत्वाः ॥ ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे ॥
दहरं विपापं वरवेश्मभूतं यत्पुंडरीकं पुरमध्यसंस्थं ॥ तत्रापि दहं गगनं
विशोकस्तस्मिन्यदंतस्तदुपासितव्यं ॥ यो वेदादौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठि
तः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥१२॥ अज्ञोन्य आविवेशा सर्वे चा
चारि च ॥१३॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवं ॥ विश्वं नारायणं देवमक्ष
रं परमं प्रभुं ॥ विश्वतः परमं नित्यं विश्वं नारायणं हरिं ॥ विश्वमेवेदं पुरुष
स्तद्विश्वमुपजीवति ॥ पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं ॥ नारा
यणं महाज्ञेयं विश्वात्मानं परायणं ॥ नारायणः परो ज्योतिरात्मा नारायणः परः ॥

।पनि। ॥राम॥ ॥९॥

४ हृदयं तद्विजानीयात्

नारायणः परं ब्रह्म तत्त्वं नारायणः परः॥ नारायणः परो ध्याता ध्यानं नारायणः प
रः॥ यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा॥ अंतर्बहिश्च तत्सर्वं व्याप्य नारा
यणः स्थितः॥ अनंतमव्ययं कविं समुद्रें तं विश्वशंभुवं॥ पद्मकोशप्रतीकाशं
हृदयं चाप्यधोमुखं॥ अधो निष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति॥ ज्वालमा
लाकुलं भाति विश्वस्यायतनं महत्॥ संततं शिराभिस्तु लंबत्याकोशसन्निभं॥
तस्यांते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितं॥ तस्य मध्ये महानग्निर्विश्वार्चि
र्विश्वतोमुखः॥ सोग्रभुग्विभजंतिष्ठन्नाहारमजरः कविः॥ तिर्यगूर्ध्वमधःशा
यी रश्मयस्तस्य संतताः॥ संतापयति स्वं देहमापादतलमस्तकं॥ तस्य मध्ये व
ह्निशिखा अणीयोर्ध्वा व्यवस्थिता॥ नीलतोयदमध्यस्था विद्युल्लेखेव भास्वरा॥

नीवारशूकवत्तन्वीपीताभास्वत्तनूपमा॥तस्याःशिखायामध्येपरमात्माव्यवस्थि
तः॥सब्रह्मसशिवःसहरिःसेंद्रःसोक्षरःपरमःस्वराट्॥१३॥अपिवासंतेलाषद्:
च॥१३॥आदित्योवाएषएतन्मंडलंतपतितत्रतात्रचस्तदृचामंडलंसऋचां
लोकोथयएषएतस्मिन्मंडलेर्चिर्दीप्यतेतानिसामानिससाम्नांलोकोथयएष
एतस्मिन्मंडलेर्चिषिपुरुषस्तानियजूंषिसयजुषामंडलंसयजुषांलोकः
सैषात्रय्येवविद्यातपतियएषोंतरादित्येहिरण्मयःपुरुषः॥१४॥आदित्योवै
तेजओजोबलंयशश्चक्षुःश्रोत्रमात्मामनोमन्युर्मनुर्मृत्युःसत्योमित्रोवायुरा
काशःप्राणोलोकपालःकःकिंकंतत्सत्यमन्नममृतोजीवोविश्वःकतमःस्वयंभुः
प्रजापतिःसंवत्सरइतिसंवत्सरोसावादित्योयएषपुरुषएषभूतानामधि

पति ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिता
ꣳ समानलोकतामाप्नोति य एवं वेद इत्युपनिषत् ॥ १५ ॥ निधनपतये नमः ॥
निधनपतान्तिकाय नमः ॥ ऊर्ध्वाय नमः ॥ ऊर्ध्वलिंगाय नमः ॥ हिरण्याय नमः ॥ हि
रण्यलिंगाय नमः ॥ सुवर्णाय नमः ॥ सुवर्णलिंगाय नमः ॥ दिव्याय नमः ॥ दिव्यलिं
गाय नमः ॥ भवाय नमः ॥ भवलिंगाय नमः ॥ शर्वाय नमः ॥ शर्वलिंगाय नमः ॥ शि
वाय नमः ॥ शिवलिंगाय नमः ॥ ज्वलाय नमः ॥ ज्वललिंगाय नमः ॥ आत्माय न
मः ॥ आत्मलिंगाय नमः ॥ परमाय नमः ॥ परमलिंगाय नमः ॥ एतत्सोमस्य सू
र्यस्य सर्वलिंगꣳ स्थापयति पाणिमंत्रं पवित्रं ॥ १६ ॥ सद्योजातं प्रपद्यामि सद्यो
जाताय वै नमो नमः ॥ भवे भवे नातिभवे भजस्व मां भवोद्भवाय नमः ॥ १७ ॥ वामदे

वायनमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय
नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमना
य नमो मनोन्मनाय नमः॥१८॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यः
सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥१९॥ तत्पुरुषाय विद्महे महादेवाय धी
महि॥ तन्नो रुद्रः प्रचोदयात्॥२०॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवों॥२१॥ नमो हिरण्य
बाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयें बिकापतय उमापतये पशु
पतये नमो नमः॥२२॥ ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगलं॥ उर्ध्वरेतं वि
रूपाक्षं विश्वरूपाय वै नमो नमः॥२३॥ सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु॥

॥ राम ॥
॥ ११ ॥

पुरुषो वै रुद्रः सन्महो नमो नमः॥ विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं
च यत्॥ सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥२४॥ कद्रुद्राय प्रचेतसे मीढु
ष्टमाय तव्यसे॥ वोचेम शंतमं हृदे॥ सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु।
॥२५॥ यस्य वैकंकत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठंत्यथो प्रति
ष्ठित्यै॥२६॥ कृणुष्व पाज इति पंच॥२७॥ अदितिर्देवा गंधर्वा मनुष्याः पितरोऽसुरा
स्तेषां सर्वभूतानां माता मेदिनी महती मही सावित्री गायत्री जगत्युर्वी पृथ्वी
बहुला विश्वा भूता कतमा काया सा सत्येत्यमृतेति वसिष्ठः॥२८॥ आपो वा इदं
सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः संम्राडा
पो विराडापः स्वराडापश्छंदांस्यापो ज्योतींष्यापो यजूंष्यापः सत्यमापः स

र्यी देवता आपो भूर्भुवः सुवरापः ॐ ॥ २९ ॥ आपः पुनंतु पृथिवीं पृथिवी पूता पुना
तु मां ॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं म
म ॥ सर्वं पुनंतु मामापोऽसतां च प्रतिग्रहं स्वाहा ॥ ३० ॥ अग्निश्च मामन्युश्च मन्यु
पतयश्च मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां ॥ यदह्ना पापमकार्षं ॥ मनसा वाचा हस्ता
भ्यां ॥ पद्भ्यामुदरेण शिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंच दुरितं मयि ॥ इदमहं मा
ममृतयोनौ ॥ सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ३१ ॥ सूर्यश्च मामन्युश्च मन्युपतयश्च
मन्युकृतेभ्यः ॥ पापेभ्यो रक्षंतां ॥ यद्रात्र्या पापमकार्षं ॥ मनसा वाचा हस्ताभ्यां ॥ प
द्भ्यामुदरेण शिश्ना ॥ रात्रिस्तदवलुंपतु ॥ यत्किंच दुरितं मयि ॥ इदमहं माममृत
योनौ ॥ सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ३२ ॥ ॐ मित्येकाक्षरं ब्रह्म ॥ अग्निर्देवता ॥

ब्रह्म इत्यार्षं॥ गायत्रंछंदं परमात्मं स्वरूपं॥ सायुज्यं विनियोगं॥ ॐ॥ आयातु
वरदा देवी अक्षरं ब्रह्मसंमितं॥ गायत्री छंदसां मातेदं ब्रह्म जुषस्व नः॥ यदह्ना कु
रुते पापं तदह्ना प्रतिमुच्यते॥ यद्रात्रिया कुरुते पापं तद्रात्रिया प्रतिमुच्यते॥
सर्ववर्णे महादेवि संध्याविद्ये सरस्वति॥ ॐ॥ ओजोसि सहोसि बलमसि भ्राजो
सि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरों गायत्री
मावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छंदर्षीनावाहयामि श्रिय
मावाहयामि गायत्र्या गायत्री छंदो विश्वामित्र ऋषिः सविता देवताग्निर्मुखं ब्रह्मा
शिरो विष्णुर्हृदयं रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा
श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विंशत्यक्षरा त्रिपदा षट्कुक्षिः पंचशी

॥नारा॥ ६ हमर्व यंतितयः सुसंमधुक्षरं तिलद्रुसूतदाफऽपोऽयः॥

॥१३॥

र्णोपनयने विनियोगः॥ॐ भूः॥ ॐ भुवः॥ ॐ सुवः॥ ॐ महः॥ ॐ जनः॥ ॐ तपः॥ ॐ
सत्यं॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ॐ
मापो ज्योतिरसोमृतं ब्रह्म भूर्भुवः सुवरों॥३५॥ उत्तमे शिखरे जाते भूम्यां पर्वत
मूर्द्धनि॥ ब्राह्मणेभ्योभ्यनुज्ञाता गच्छ देवि यथासुखं॥ स्तुतो मया वरदा वेदमाता
प्रचोदयंती पवने द्विजाता॥ आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रजातुं
ब्रह्मलोकं॥३६॥ घृणिः सूर्य आदित्यो न प्रभा वात्यक्षरं मधुक्षरं तिलद्रुसं॥ ॥राम॥ ॥१३॥
तेद्रस मापो ज्यो तीरसोमृतं ब्रह्म भूर्भुवः सुवरों॥३७॥ ब्रह्म मेतु मां॥ मधु मेतु
मां॥ ब्रह्ममेव मधु मेतु मां॥ यास्ते सोम प्रजा वत्सोभिसो अहं॥ दुःष्वप्नहं दुरुष्वह॥
यास्ते सोम प्राणांः स्तान्जुहोमि॥ त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्॥ ब्रह्महत्यां

सत्यंपे३

वारते घ्नंति॥ये ब्राह्मणास्त्रिसुपर्णं पठंति॥ते सोमं प्राप्नुवंति॥आसहस्रात्संक्तिं पु
नंति॥ॐ॥३॥ब्रह्ममेधया॥मधुमेधया॥ब्रह्ममेव मधुमेधया॥अद्यानो देव
सवितः प्रजावत्सावीः सौभगं॥परा दुःष्वप्नियं सुव॥विश्वानि देव सवितर्दुरिता
नि परासुव॥यद्भद्रं तन्म आसुव॥मधुवाता ऋतायते मधुक्षरंति सिंधवः॥मा
ध्वीर्नः संत्वोषधीः॥मधु नक्तमुतोषसि मधुमत्पार्थिवं रजः॥मधु द्यौरस्तु नः
पिता॥मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः॥माध्वीर्गावो भवंतु नः॥य इ
मं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्॥भ्रूणहत्यां वा एते घ्नंति॥ये ब्राह्मणा
स्त्रिसुपर्णं पठंति॥ते सोमं प्राप्नुवंति॥आसहस्रात्संक्तिं पुनंति॥ॐ॥३॥ब्रह्म
मेधवा॥मधुमेधवा॥ब्रह्ममेव मधुमेधवा॥ब्रह्मा देवानां पदवीः कवीनामृषिर्वि

॥नारा॥
॥१४॥

प्राणां महिषो मृगाणां॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रे
भन्॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वर
सदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥ ऋचे त्वा रुचे त्वा समि
त्स्रवंति सरितो न धेनाः॥ अंतर्हृदा मनसा पूयमानाः॥ घृतस्य धारा अभिचाकशी
मि॥ हिरण्ययो वेतसो मध्य आसां॥ तस्मिन्त्सुपर्णो मधुकृत्कुलायी॥ भजन्नास्ते
मधु देवताभ्यः॥ तस्यासते हरयः सप्त तीरे॥ स्वधां दुहाना अमृतस्य धारां॥ य इ
दं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात्॥ वीरहत्यां वा एते घ्नंति॥ ये ब्राह्मणास्त्रि
सुपर्णं पठंति॥ ते सोमं प्राप्नुवंति॥ आसहस्रात्पंक्तिं पुनंति॥ ॐ॥५०॥ मेधा देवी जु
षमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना॥ त्वया जुष्टा जुषमाणा दुरुक्तान्बृ

॥पुनि॥

॥राम॥
॥१४॥

हृद्देम विदथे सुवीराः॥ त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया॥ त्वया जुष्टश्चित्रं विंदते वसु सा नो जुषस्व द्रविणेन मेधे॥४१॥ मेधां म इंद्रो ददातु मेधां देवी सरस्वती॥ मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजो॥ अप्सरासु च या मेधा गंधर्वेषु च यन्मनः॥ देवी मेधा सरस्वती सा मां मेधा सुरभिर्जुषतां स्वाहा॥४२॥ आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या॥ ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषतां॥४३॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयींद्र इंद्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥४४॥ अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु॥ पर्णं वनस्पतेरिवाभि नः शीयतां रयिः सा

||नारा.||
||१५||

||पद्धि.||

चतान्नः शचीपतिः ||४५|| परं मृत्यो अनु परेहि पंथां यस्ते स्व इतरो देवयानात् || चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ||४६|| वाते प्राणं मनसान्वारभामहे प्रजापतिं यो भुवनस्य गोपाः || स नो मृत्योस्त्रायतां पात्वंहसो ज्योग्जीवा जरामशीमहि ||४७|| अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुंचः || प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः ||४८|| हरिं हरंतमनुयंति देवा विश्वस्येशानं वृषभं मतीनां || ब्रह्म सरूपमनु मेदमागादयनं मा विवधीर्विक्रमस्व ||४९|| शल्कैरग्निमिंधान उभौ लोकौ सनेमहं || उभयोर्लोकयोर्ऋध्वाति मृत्युं तराम्यहं ||५०|| मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः || प्रजां मा मे रीरिष आयुरुग्र नृ

||राम||
||१५||

458

वक्षसं त्वा हविषा विधेम॥५१॥मा नो महांतमुत मा नो अर्भकं मा न उक्षंतमुत
मा न उक्षितं॥मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥
॥५२॥मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥वीरा
न्मा नो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम ते॥५३॥प्रजापते न त्वदे
तान्यन्यो विश्वा जातानि परि ता बभूव॥यत्कामास्ते जुहुमस्तन्नो अस्तु वयं
स्याम पतयो रयीणां॥५४॥स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी॥वृषे
द्रः पुर एतु नः स्वस्तिदा अभयंकरः॥५५॥त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्ध
नं॥उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय माऽमृतात्॥५६॥ये ते सहस्रमयुतं
पाशा मृत्यो मर्त्याय हंतवे॥तान्यज्ञस्य मायया सर्वानव यजामहे॥५७॥मृत्य

॥नारा०॥

॥९६॥

वेस्वाहाम्द स्य वेस्वाहा॥५८॥ देवकृतस्यैनसोवयजनमसिस्वाहा॥ मनुष्यकृत
स्यैनसोवयजनमसिस्वाहा॥ पितृकृतस्यैनसोवयजनमसिस्वाहा॥ आत्मकृ
तस्यैनसोवयजनमसिस्वाहा॥ अन्यकृतस्यैनसोवयजनमसिस्वाहा॥ अस्म
त्कृतस्यैनसोवयजनमसिस्वाहा॥ यद्दिवाच नक्तं चैनश्चकृम तस्यावयजन
मसिस्वाहा॥ यत्स्वपंतश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसिस्वाहा॥ यत्सु
षुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसिस्वाहा॥ यद्विद्वांसश्चाविद्वां
सश्चैनश्चकृम तस्यावयजनमसिस्वाहा॥ एनस एनसोवयजनमसिस्वाहा॥५९॥
यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनं॥ अरावायो नो अभि
दुच्छुनायते तस्मिन् तदेनो वसवो निधेतन स्वाहा॥६०॥ कामोकार्षीन्मन्युरकार्षीन्नमो नमः॥

॥पनि०॥

॥राम॥

॥९६॥

कामोकार्षीत्कामः करोति नाहं करोमि कामः कर्त्ता नाहं कर्त्ता कामः कारयिता नाहं
कारयिता एष ते काम कामाय स्वाहा ॥६१॥ मन्युरकार्षीन्नमो नमः ॥ मन्युरका
र्षीन्मन्युः करोति नाहं करोमि मन्युः कर्त्ता नाहं कर्त्ता मन्युः कारयिता नाहं कार
यिता एष ते मन्यो मन्यवे स्वाहा ॥६२॥ तिलां जुहोमि सरसां सपिष्टान् गंधार
मम चित्ते रमंतु स्वाहा ॥ गावो हिरण्यं धनमन्नपानं सर्वेषां श्रियै स्वाहा ॥
श्रियं च लक्ष्मीं च पुष्टिं च कीर्तिं चानृण्यतां ॥ ब्रह्मण्यं बहुपुत्रतां ॥ श्रद्धां मेधे
प्रजाः संददातु स्वाहा ॥६३॥ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानु
गाः ॥ तिलाः पुनंतु मे पापं यत्किंचिद्दुरितं मयि स्वाहा ॥ चोरस्यान्नं नवश्राद्धं ब्र
ह्महा गुरुतल्पगः ॥ गोस्तेयं सुरापानं भ्रूणहत्या तिलाः शांतिं शमयंतु स्वा

हा॥ श्रीश्च लक्ष्मीश्च पुष्टिश्च कीर्त्तिं चानृण्यतां॥ ब्रह्मण्यं बहुपुत्रतां॥ श्रद्धामेधे
प्रज्ञा तु जातवेदः संददातु स्वाहा॥ ६४॥ प्राणापानव्यानोदानसमाना मे शुध्यं
तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राण
रेतो बुध्याकूतिसंकल्पा मे शुध्यं तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वा
हा॥ त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनि मे शुध्यं तां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा॥ शिरःपाणिपादपार्श्वपृष्ठोरूदरजंघशिश्नो
पस्थपायवो मे शुध्यं तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा॥ उत्तिष्ठ
पुरुष हरितलोहितपिंगलाक्षि देहि देहि ददापयिता मे शुध्यं तां ज्योतिरहं
विरजा विपाप्मा भूयासं स्वाहा॥ ६५॥ पृथिव्यप्तेजोवाय्वाकाशा मे शुध्यं तां

ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ शब्दस्पर्शरूपरसगंधा मे शुध्यं॥
तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ मनोवाक्कायकर्माणि मे शुध्य
तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ अव्यक्तभावैरहंकारै ज्योतिर
तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ आत्मा मे शुध्यंतां ज्योतिरहं विरजा विपा
हं विरजा विपाप्मा भूयासꣳ स्वाहा॥ अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ
प्मा भूयासꣳ स्वाहा॥ अंतरात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ क्षुधे
स्वाहा॥ परमात्मा मे शुध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा॥ क्षुधे
स्वाहा॥ क्षुत्पिपासाय स्वाहा॥ विविट्यै स्वाहा॥ ऋग्विधानाय स्वाहा॥ कषोत्क
यस्वाहा॥ क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीं नाशयाम्यहं॥ अभूतिमसमृद्धिं च
सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा॥ अन्नमयप्राणमयमनोमयविज्ञानमया

नं दमयामेभुछ्युंतां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा ॥ ६६ ॥ अग्नये
स्वाहा ॥ विश्वेभ्यो देवेभ्यः स्वाहा ॥ ध्रुवाय भूमाय स्वाहा ॥ ध्रुवक्षितये स्वाहा ॥
अच्युतक्षितये स्वाहा ॥ अग्नये स्विष्टकृते स्वाहा ॥ धर्माय स्वाहा ॥ अधर्माय स्वा
हा ॥ अद्भ्यः स्वाहा ॥ ओषधिवनस्पतिभ्यः स्वाहा ॥ रक्षोदेवजनेभ्यः स्वाहा ॥ गृह्ये
भ्यः स्वाहा ॥ अवसानेभ्यः स्वाहा ॥ अवसानपतिभ्यः स्वाहा ॥ सर्वभूतेभ्यः स्वाहा ॥
कामाय स्वाहा ॥ अंतरिक्षाय स्वाहा ॥ यदेजति जगति यच्च चेष्टति नाम्नो भागो
यन्नाम्ने स्वाहा ॥ पृथिव्यै स्वाहा ॥ अंतरिक्षाय स्वाहा ॥ दिवे स्वाहा ॥ सूर्याय स्वा
हा ॥ चंद्रमसे स्वाहा ॥ नक्षत्रेभ्यः स्वाहा ॥ इंद्राय स्वाहा ॥ बृहस्पतये स्वाहा ॥ प्रजा
पतये स्वाहा ॥ ब्रह्मणे स्वाहा ॥ स्वधा पितृभ्यः स्वाहा ॥ नमो रुद्राय पशुपतये स्वा

॥ राम ॥
॥ १९ ॥

हा॥ देवेभ्यः स्वाहा॥ पितृभ्यः स्वधास्तु॥ भूतेभ्यो नमः॥ मनुष्येभ्यो हंता॥ प्रजा
पतये स्वाहा॥ परमेष्ठिने स्वाहा॥ यथा कूपः शतधारः सहस्रधारो अक्षितः॥
एवा मे अस्तु धान्यं सहस्रधारमक्षितं॥ धनधान्यै स्वाहा॥ ये भूताः प्रचरं
ति दिवा नक्तं बलिमिच्छंतो वितुदस्य प्रेष्याः॥ तेभ्यो बलिं पुष्टिकामो हरा
मि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा॥ ६७॥ ॐ तद्ब्रह्म॥ ॐ तद्वायुः॥ ॐ तदा
त्मा॥ ॐ तत्सत्यं॥ ॐ तत्सर्वं॥ ॐ तत्पुरोर्नमः॥ अंतश्चरति भूतेषु गुहायां
विश्वमूर्तिषु॥ त्वं यज्ञस्त्वं विष्णुस्त्वं वषट्कारस्त्वमिंद्रस्त्वं रुद्रस्त्वं ब्रह्मा त्वं प्र
जापतिः॥ ॐ भूर्भुवः सुवर्महर्जनस्तपः सत्यं तद्ब्रह्म तदाप आपो ज्योती रसो
मृतं ब्रह्म भूर्भुवः सुवरों॥ ६८॥ श्रद्धायां प्राणे निविश्यामृतं जुहोमि॥ श्रद्धा
प्राणाय स्वाहा॥

ॐ ४
विष्णुस्त्व ३
तंत २

॥नाराना॥

॥१९॥

अपानायस्वाहा॥१ २ ३ उदानायस्वाहा॥ व्यानायस्वाहा॥

याम पानेनिविष्टोमृतंजुहोमि॥ श्रद्धायांव्यानेनिविष्टोमृतंजुहोमि॥ श्रद्धायामुदानेनिविष्टोमृतंजुहोमि॥ श्रद्धायाᳫं समानेनिविष्टोमृतंजुहोमि॥ समानायस्वाहा॥ ब्रह्मणिम आत्मामृतत्वाय॥ अमृतोपस्तरणमसि॥ श्रद्धायांप्राणेनिविष्टोमृतंजुहोमि॥ शिवोमाविशाप्रदाहाय॥ प्राणायस्वाहा॥ श्रद्धायामपानेनिविष्टोमृतंजुहोमि॥ शिवोमाविशाप्रदाहाय॥ अपानायस्वाहा॥ श्रद्धायांव्यानेनिविष्टोमृतंजुहोमि॥ शिवोमाविशाप्रदाहाय॥ व्यानायस्वाहा॥ श्रद्धायामुदानेनिविष्टोमृतंजुहोमि॥ शिवोमाविशाप्रदाहाय॥ उदानायस्वाहा॥ श्रद्धायाᳫं समानेनिविष्टोमृतंजुहोमि॥ शिवोमाविशाप्रदाहाय॥ समानायस्वाहा॥ ब्रह्मणिम आत्मामृतत्वाय॥ अमृतापिधानमसि॥ ६॥ श्रद्धायांप्राणेनिवि

॥पनि॰॥

॥राम॥

॥१९॥

श्यामृतं हुतं ॥ प्राणमन्नेनाप्यायस्व ॥ श्रद्धायामपाने निविश्यामृतं हुतं ॥
अपानमन्नेनाप्यायस्व ॥ श्रद्धायां व्याने निविश्यामृतं हुतं ॥ व्यानमन्ने
नाप्यायस्व ॥ श्रद्धायामुदाने निविश्यामृतं हुतं ॥ उदानमन्नेनाप्यायस्व ॥
श्रद्धायां समाने निविश्यामृतं हुतं ॥ समानमन्नेनाप्यायस्व ॥ ७० ॥ अंगु
ष्ठमात्रः पुरुषोंगुष्ठं च समाश्रितः ॥ ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्व
भुक् ॥ ७१ ॥ वाङ्म आसन् ॥ नसोः प्राणः ॥ अक्ष्योश्चक्षुः ॥ कर्णयोः श्रोत्रं ॥ बा
ह्वोर्बलं ॥ ऊर्वोरोजः ॥ अरिष्टा विश्वान्यंगानि तनूः तनुवा मे सह ॥ नमस्ते
अस्तु मा मा हिंसीः ॥ ७२ ॥ वयः सुपर्णा उपसेदुरिंद्रं प्रियमेधा ऋषयो ना
धमानाः ॥ अप ध्वांतमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ७३ ॥

॥नारा॰॥
॥२०॥

प्राणानां ग्रंथिरसि रुद्रो मा विशांतकः ॥ तेनान्नेनाप्यायस्व ॥ ७४ ॥ नमो रुद्राय वि
ष्णवे मृत्युर्मे पाहि ॥ ७५ ॥ त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्प
रि ॥ त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ ७६ ॥ शिवेन मे सं
तिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठस्व ब्रह्मवर्चसेन मे संतिष्ठस्व
यज्ञस्यर्द्धिमनुसंतिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः ॥ ७७ ॥ सत्यं प
रं परं सत्यं सत्येन न सुवर्गाल्लोकाच्च्यवंते कदाचन सतां हि सत्यं तस्मा
त्सत्ये रमंते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं त
स्मात्तपसि रमंते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमंते शम इत्यरण्ये
मुनयस्तस्माच्छमे रमंते दानमिति सर्वाणि भूतानि प्रशंसंति दानान्नातिदु

॥पनि॥

॥राम॥
॥२०॥

ध्रूरं तस्माद्दाने रमंते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुश्चरं
तस्माद्धर्मे रमंते प्रजन इति भूयांसस्तस्माद्भूयिष्ठाः प्रजायंते तस्माद्भूयिष्ठाः
प्रजनने रमंतेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह त
स्मादग्निहोत्रे रमंते यज्ञ इति यज्ञेन हि देवा दिवं गतास्तस्माद्यज्ञे रमंते मानस
मिति विद्वांसस्तस्माद्विद्वांस एव मानसे रमंते न्यास इति ब्रह्मा ब्रह्मा हि परः
परो हि ब्रह्मा तानि वा एतान्यवराणि परांसि न्यास एवात्यरेचयद्य एवं वेदे
त्युपनिषत् ॥७८॥ प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार
किं भगवंतः परमं वदंतीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोच
ते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्मात्सत्यं परमं वदंति तपसा

॥नारा॰॥

॥२९॥

॥प नि॰॥

देवा देवतामग्र आयंतपसर्षयः सुवरन्वविंदंतपसा सपत्नान्प्रणुदामारा
ती स्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदंति दमेन दांताः किल्बिषमवधू
न्वंति दमेन ब्रह्मचारिणः सुवरगच्छंदमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठि
तं तस्माद्दमः परमं वदंति शमेन शांताः शिवमाचरंति शमेन नाकं मुनयो
न्वविंदंछमो भूतानां दुराधर्षं शमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदंति
दानं यज्ञानां वरूथं दक्षिणा लोके दातारं सर्वभूतान्युपजीवंति दानेनारा
तीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं पु
मं वदंति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंति धर्मे
ण पापमपनुदंति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदंति प्रजननं वै प्र

॥राम॥

॥२९॥

तिष्ठा लोके साधु प्रजायास्तंतुं तन्वानः पितृणामनृणो भवति तदेव तस्या
अनृणं तस्मात्प्रजननं परमं वदंति अग्नयो वै त्रयी विद्या देवयानः पंथा गार्हप
त्य ऋक् पृथिवी रथंतरमन्वाहार्यपचनो यजुरंतरिक्षं वामदेव्यमाहवनी
यः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदंत्यग्निहोत्रं सायंप्रात
र्गृहाणां निष्कृतिः स्विष्टं सुहुतं यज्ञक्रतूनां प्रायणं सुवर्गस्य लोकस्य ज्यो
तिस्तस्मादग्निहोत्रं परमं वदंति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासु
रानपानुदंत यज्ञेन द्विषंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं पर
मं वदंति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋ
षयः प्रजा असृजंत मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदंति न्यास इ

॥नारा॥ ॥२२॥

सहकुमारो मनीषिणो ब्रह्माणं ब्रह्मावित्प्रश्नः कतमः स्वयंभुः प्रजापतिः संवत्सर इति संव
त्सरोसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति
रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायंते ओषधि
वनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया
मेधा मेधया मनीषा मनीषया मनो मनसा शांतिः शांत्या चित्तं चित्तेन स्मृतिः स्मृ
त्या स्मारः स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददत्सर्वाण्येता
नि ददात्यन्नात्प्राणा भवंति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानंदो
ब्रह्मयोनिः स वा एष पुरुषः पंचधा पंचात्मा येन सर्वमिदं प्रोतं पृथिवी चांतरिक्षं
च द्यौश्च दिशश्चावांतरदिशाश्च स वै सर्वमिदं जगत्स स भूतं स भव्यं जिज्ञास

॥पद्मि॥ ॥राम॥ ॥२२॥

472

कूलत्वरतजारयिष्ठाःश्रद्धासत्योमहस्वांतुमसोपारिष्ठाज्ञात्वांतमेवंमनसाहृदा
चभूयोनमृत्युमुपयाहि विद्वांस्तस्मान्न्यासमेषांतपसामतिरिक्तमाहुर्वसु
रण्वोविभूरसिप्राणेत्वमसिसंधाताब्रह्मंस्त्वमसिविश्वसृत्तेजोदास्त्वमस्य
ग्नेरसिवर्चोदास्त्वमसिसूर्यस्यद्युम्नोदास्त्वमसिचंद्रमसउपयामगृहीतोसि
ब्रह्मणेत्वामहसॐमित्यात्मानंयुंजीत एतद्वैमहोपनिषदंदेवानांगुह्यंयएवं
वेदब्रह्मणोमहिमानमाप्नोतितस्माद्ब्रह्मणोमहिमानमित्युपनिषत्॥ ७९॥ त
स्यैवंविदुषोयज्ञस्यात्मायजमानःश्रद्धापत्नीशरीरमिध्ममुरोवेदिर्लोमानिब
र्हिर्वेदःशिखाहृदयंयूपःकामआज्यंमन्युःपशुस्तपोग्निर्दमःशमयितादक्षि
णावाग्घोताप्राणउद्गाताचक्षुरध्वर्युर्मनोब्रह्माश्रोत्रमग्नीद्यावद्ध्रियतेसादी

क्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचर
त्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्य
दस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधं यत्प्रातर्मध्यंदिनं सायं
च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चा
तुर्मास्यानि य ऋतवस्ते पशुबंधा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः स
र्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रं सत्रं य
एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वादित्यस्य सायुज्यं ग
च्छत्यथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चंद्रमसः सायुज्यं
त्येतौ वै सूर्याचंद्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो

सलोकतामाप्नो २

महिमानमाप्नोतितस्माद्ब्रह्मणोमहिमानमित्युपनिषत्॥८०॥ ॥इतिनारायणी
योपनिषत्समाप्ता॥ ॥ॐभूस्त्वेकंपंचाशच्छतंजालवेदसेचतुर्दशाभूरग्नेभू
रग्नयेभूरग्नयेचैकमेकंपाहिपाहिचत्वारिचत्वारियश्छंदसांछंदनमोब्रह्म
णऋतंतपोयथावृक्षस्यैकमेकमणोरणीयांश्चतुस्त्रिंशत्सहस्रशीर्षं
षड्डूर्ध्वातिरादित्योवाएषआदित्योवैतेजएकमेकंनिधनपतयेत्रयोविंशति
तिःसद्योजातंत्रीणिवामदेवैकमघोरेभ्यस्तत्पुरुषायछंदईशानोनमोहिर
ण्यबाहवएकमेकमृतंसत्यंसर्वोवैचत्वारिकद्रुद्रायत्रीणियस्यवैकंकं
तीकृणुष्वपाजोदितिरापोवाइदंसर्वमेकमापःपुनंतुचत्वार्यग्निश्चसूर्य
श्चमनवनवोमितिचत्वार्यायातुपंचौजोसिदशोत्तमेचत्वारिघृणिस्त्रीणिब्र

||नारा०||

||२४||

लभेतु मां यास्ते ब्रह्म मेधवा अश्रा देवानो मिदं वीरहत्यां मे कान्न विंड्ढि ज्ञातिरे कान्न
विंड्ढि ज्ञाति र्मेधा देवी मेधां मह्यं ईश्वरां तारि चत्वार्यो मां मेधा द्दे मयि मेधा मेकं म पेतु
परं वात प्राण ममुत्र भूयाद्द रिंड्ढि ज्ञाल्कै रग्नि माच्छिदो म त्यो मा नो म हां त मा न
स्तोके प्रजापते स्वस्तिदा विश्वात्र्यं बकं यो ते सहस्त्रं द्वे द्वे मत्य वेस्वाहे कं देव कृत
स्येनस्येकादश्राय द्दो देवाः कामो काषीन्मन्यु रकाषीद्वे द्वे तिलां जुहोमि पंच चलि
लाः रुद्दमाः स स प्राणाः पंचप्रथिवी पंचेद श्राउन ये स्वाहे कं चत्वारिंड्ढि ज्ञा दोन कृ
मन व श्रद्धायां प्राणे निविष्ट श्रतु र्विंड्ढि ज्ञातिः श्रद्धायां दश्रां गुष्ठ मात्रः पुरुषो द्वे
वाङ्म आसन्न सो वयः सुपर्णाः प्राणा नां ग्रथिर सिद्वे द्वे न मो रुद्राये कं त्व म मे
द्युत्तिर्द्वे ज्ञि वे न मे संतिष्ठ स्व सत्यं प्राजापत्य स्त स्ये व मे कं मे कं म ज्ञीति:||६||

||पत्नि||

||राम||

||२४||

476

ॐ शांतिः शांतिः शांतिः ॥ ॥ इति श्रीमद्बृहन्नारायणीयोपनिषत्समाप्ता ॥ ॥ लिपिः श्रीक्षात्रब्रह्मविदां सूर्यभ गुरुदाहृता ॥ पंचम्यंशस्यपारे चेतत्त्वनिर्णयबोधकाः ॥ १ ॥ ॥ श्री ॥ ॥

॥नारा॰॥

॥२५॥

॥इति बृहन्नारायणीयोपनित्समाप्तिदलं॥

॥श्रीनि॰॥

॥राम॥

॥२५॥

[OrderDescription]
,CREATED=08.10.20 12:22
,TRANSFERRED=2020/10/08 at 14:25:19
,PAGES=477
,TYPE=STD
,NAME=S0003938
,Book Name=M-1928-UPNISHAD SANGRAH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF

FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF

FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF

FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF
,FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF

FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,FILE416=00000416.TIF
,FILE417=00000417.TIF
,FILE418=00000418.TIF
,FILE419=00000419.TIF
,FILE420=00000420.TIF
,FILE421=00000421.TIF
,FILE422=00000422.TIF
,FILE423=00000423.TIF
,FILE424=00000424.TIF
,FILE425=00000425.TIF
,FILE426=00000426.TIF
,FILE427=00000427.TIF
,FILE428=00000428.TIF
,FILE429=00000429.TIF
,FILE430=00000430.TIF
,FILE431=00000431.TIF
,FILE432=00000432.TIF
,FILE433=00000433.TIF
,FILE434=00000434.TIF
,FILE435=00000435.TIF
,FILE436=00000436.TIF
,FILE437=00000437.TIF
,FILE438=00000438.TIF
,FILE439=00000439.TIF

FILE440=00000440.TIF
,FILE441=00000441.TIF
,FILE442=00000442.TIF
,FILE443=00000443.TIF
,FILE444=00000444.TIF
,FILE445=00000445.TIF
,FILE446=00000446.TIF
,FILE447=00000447.TIF
,FILE448=00000448.TIF
,FILE449=00000449.TIF
,FILE450=00000450.TIF
,FILE451=00000451.TIF
,FILE452=00000452.TIF
,FILE453=00000453.TIF
,FILE454=00000454.TIF
,FILE455=00000455.TIF
,FILE456=00000456.TIF
,FILE457=00000457.TIF
,FILE458=00000458.TIF
,FILE459=00000459.TIF
,FILE460=00000460.TIF
,FILE461=00000461.TIF
,FILE462=00000462.TIF
,FILE463=00000463.TIF
,FILE464=00000464.TIF
,FILE465=00000465.TIF
,FILE466=00000466.TIF
,FILE467=00000467.TIF

FILE468=00000468.TIF
,FILE469=00000469.TIF
,FILE470=00000470.TIF
,FILE471=00000471.TIF
,FILE472=00000472.TIF
,FILE473=00000473.TIF
,FILE474=00000474.TIF
,FILE475=00000475.TIF
,FILE476=00000476.TIF
,FILE477=00000477.TIF
,